The Aruna Sanskrit Language Series

# The Bhagavad Gita Reader

## Sanskrit/English Parallel Text

A.K. Aruna

PDF version

*New and Improved!*

The Aruna Sanskrit Language Series

# The Bhagavad Gita Reader

## Sanskrit/English Parallel Text

A.K. Aruna

*PDF version*

Second Edition

Upasana Yoga Media

*Second edition* 2012
Copyright © 2012 Upasana Yoga
All rights reserved.
No part of this publication may be reproduced or distributed in any form or by any means without the prior written permission of the publisher.

ISBN (PDF): 978-1-938597-03-9

Edited by Francelia Sevin

"Using This Book" by Francelia Sevin
Copyright © 2012 Francelia Sevin

Published by
Upasana Yoga Media
Palm Desert, CA
www.UpasanaYoga.org

This ebook is licensed for your personal enjoyment only. This ebook may not be re-sold or given away to other people. If you would like to share this book with another person, please purchase an additional copy for each recipient. If you're reading this book and did not purchase it, or it was not purchased for your use only, then please return and purchase your own copy. Thank you for respecting the hard work of this author.

# Invocation

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥

*Nārāyaṇaṃ namaskṛtya naraṃ caiva narottamam.*

*Devīṃ sarasvatīṃ caiva tato jayam udīrayet.*

Bowing to Lord *Nārāyaṇa* (*Kṛṣṇa*), to *Nara*, the best of men [namely *Arjuna*], and to the Goddess [of knowledge] *Sarasvatī*, then may one commence the [lore called] *Jaya* (Victory).

*Mahābhārata* 1.1

# The Aruna Sanskrit Language Series

*The Aruna Sanskrit Language Series* is a groundbreaking series of media that enriches the study of both the Sanskrit language and Vedanta. The six titles currently in the series are highly flexible and cross-referenced, guiding readers through Sanskrit basics to proficient level—unlocking the vocabulary and grammar and helping them comprehend the deeper meaning of the Bhagavad Gita. These titles are available through the publishing arm of Upasana Yoga at www.UpasanaYoga.org.

## Other Titles in *The Aruna Sanskrit Language Series* (available in Print & PDF)

The Aruna Sanskrit Grammar Reference

The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita Chapter Two

The Bhagavad Gita Dictionary

The Bhagavad Gita Reader: Sanskrit/English Parallel Text

The Sanskrit Reading Tutor: *Read It, Click It, Hear It!* (only in PDF)

# Other Titles by A.K. Aruna

The Bhagavad Gita: Victory Over Grief And Death

Patanjali Yoga Sutras: Translation and Commentary in the Light of Vedanta Scripture

Patanjali Yoga Sutras: A Translation in the Light of Vedanta Scripture

# Content


**Acknowledgments** Pg. 9

**Using This Book** 10

Reading the Chapter Introductions 10
Reading the Verses 11
Reading the Prose 11
Using the Translation 12
Using Appendix 1: Key to Terms in Devanagari 13
Using the Other Appendixes 14
Complement Your Reading with a Dictionary 15
The Importance of Reading in Vocabulary Acquisition 15
Repeated Readings Will Increase Your Fluency & Comprehension 16
More Resources for Reading & Learning 17
Sanskrit Pronunciation 18
Deeper Gita Study 18
Home Study Groups 18

**The Bhagavad Gita**

Introduction to the *Bhagavad Gītā* Pg. 20

1 **अर्जुन-विषाद-योग** *Arjuna*'s Sorrow 27
*Arjuna-viṣāda-yoga*

2 **साङ्ख्य-योग** Knowledge 44
*Sāṅkhya-yoga*

3 **कर्म-योग** Action 70
*Karma-yoga*

# Content (cont.)


| | | | |
|---|---|---|---|
| 4 | ज्ञान-कर्म-सन्न्यास-योग<br>*Jñāna-karma-sannyāsa-yoga* | Knowledge and the Renunciation of Action | Pg. 86 |
| 5 | सन्न्यास-योग<br>*Sannyāsa-yoga* | Renunciation of Action | 102 |
| 6 | ध्यान-योग<br>*Dhyāna-yoga* | Contemplation | 114 |
| 7 | ज्ञान-विज्ञान-योग<br>*Jñāna-vijñāna-yoga* | Knowledge and Its Assimilation | 132 |
| 8 | अक्षर-ब्रह्म-योग<br>*Akṣara-brahma-yoga* | Imperishable Reality | 145 |
| 9 | राज-विद्या-राज-गुह्य-योग<br>*Rāja-vidyā-rāja-guhya-yoga* | King of All Knowledge, King of All Secrets | 158 |
| 10 | विभूति-योग<br>*Vibhūti-yoga* | Glories | 173 |
| 11 | विश्व-रूप-दर्शन-योग<br>*Viśva-rūpa-darśana-yoga* | Vision of the Cosmic Form | 189 |
| 12 | भक्ति-योग<br>*Bhakti-yoga* | Devotion | 211 |
| 13 | क्षेत्र-क्षेत्रज्ञ-विभाग-योग<br>*Kṣetra-kṣetrajña-vibhāga-yoga* | Distinction of the Field and the Knower of the Field | 221 |
| 14 | गुण-त्रय-विभाग-योग<br>*Guṇa-traya-vibhāga-yoga* | Distinction of the Three *Guṇa*s | 237 |
| 15 | पुरुषोत्तम-योग<br>*Puruṣottama-yoga* | The Being Who Transcends | 249 |

# Content (cont.)


16 **दैवासुर-सम्पद्-विभाग-योग** Distinction Between Worthy and Unworthy Dispositions 260
*Daivāsura-sampad-vibhāga-yoga*

17 **श्रद्धा-त्रय-विभाग-योग** Distinction of the Three *Sraddhās* 271
*Śraddhā-traya-vibhāga-yoga*

18 **मोक्ष-सन्न्यास-योग** Renunciation That Gives Complete Freedom 283
*Mokṣa-sannyāsa-yoga*

The Bhagavad Gita—Prose 313

**Appendixes**

1: Key to Terms in Devanagari 349
2: About the Author 359
3: About the Publisher 360
4: Resources 361

**References** 367

# Acknowledgments

Timeless adoration to my *guru*, Swami Dayananda Saraswati, a brilliant link in the tradition between the original knowledge of reality and today. Under his tutelage, many gifted teachers are reinvigorating the Vedanta teaching tradition throughout India—and the world—in many different languages.

For this book, I am indebted to Arthur A. Macdonell (1854 - 1930) from whose works—*A Sanskrit Grammar for Students* (Oxford University Press, Third Edition 1927, in reprint as recently as 1997), *A Vedic Grammar for Students*, and *A Practical Sanskrit Dictionary*—I have learned most of the Sanskrit grammar that I know. In preparing this book I have also relied upon Sir Monier Williams' *A Sanskrit-English Dictionary* and his *A Dictionary, English and Sanskrit*, V. P. Apte's *The Practical Sanskrit-English Dictionary*, Krishna Vishor's *Gita Prakasa*, and finally Amritsariya Ram Bhanot's *Shrimad Bhagavad Gita with Amritavarshini Tika*. For the Sanskrit analysis and presentation of the *Gita*, we are all indebted to the *Bhashya* of Sri Sankaracarya. For the concise English rendering of the import of the verses, again I fall at the feet of my teacher, Swami Dayananda Saraswati. His four volume *Bhagavadgita Home Study Course* clearly expounds the depth and breadth of *Vyāsa*'s and *Śaṅkara*'s vision to the English speaking world of today.

And finally I wish to thank you the readers, who have provided me an opportunity through this work to deepen my knowledge of the Sanskrit language and Bhagavad Gita.

# Using This Book

*The Bhagavad Gita Reader: Sanskrit/English Parallel Text* is a versatile resource that makes it possible for students at all levels of reading Sanskrit—and especially intermediate and less experienced readers—to gain and apply reading skills in context by reading the *Bhagavad Gītā*. The side-by-side *Devanāgarī* verses, *Devanāgarī* prose, and English translation will help you to become a fluent reader of Sanskrit as well as to develop a deep understanding of the *Gītā* verses.

This book is first and foremost a *reader*. In order to infer the meaning of what you are reading, in order to truly comprehend it, research suggests that you must recognize and understand about 90 percent (Hatcher, Hulme, and Ellis 1995) or 95 percent (Laufer 1989) of the words in a text. This is why parallel text is such a powerful tool. As you read the *Bhagavad Gītā* verses, you can quickly and easily refer to the parallel text—both the prose and the English translation—as needed so that your comprehension is assured.

The original Sanskrit verses, in *Devanāgarī*, appear on the left-hand pages (in this electronic PDF they are on the top of the pages). The opposing pages (the bottom of the electronic PDF pages) present the same verses in easier-to-understand prose order in the first column and their English translation in the second column. By reading the *Gītā* verses daily, you can begin to read the Sanskrit as effortlessly as your native language. Work your way down each of the respective pages or columns—reading the original verses, the prose versions, or the English renderings. You can also quickly relate these three by reading across. Understanding of what you are reading is greatly enhanced by this exercise. You'll find that you build fluency and comprehension with every read.

## Reading the Chapter Introductions

The chapter introductions, in English with essential Sanskrit terms in *Devanāgarī*, will orient you to the original Sanskrit *Gītā* chapters that follow them. These introductions are extremely helpful in gaining the most from your reading, setting the scene and providing context in the light of Advaita

Vedanta. In the introductions, the transliteration is given for *Devanāgarī* terms on first occurrence. This is different from the English verse translations, which do not provide transliteration. (For transliteration of all *Devanāgarī* terms in the introductions and the verse translations, refer to Appendix 1: Key to Devanagari Terms.)

## Reading the Verses

The original Sanskrit *Gītā* verses on the left-hand pages are presented in *Devanāgarī* in their entirety, with nothing added or eliminated. As you gain fluency, you will look less at the opposing pages and more at the original verses on the left-hand pages.

## Reading the Prose

The prose presentation of the verses (in the first column of right-hand pages) quickly brings you to an understanding of the meaning of the verses—well before you fully develop the difficult skill of unraveling the grammar that is packed into verse form. Breaking with tradition, all words in the prose are grammatically split apart. For example, in the first verse of the *Bhagavad Gītā*, धृतराष्ट्र उवाच (*Dhṛtarāṣṭra uvāca*) is shown in the prose as धृत-राष्ट्रः उवाच (*Dhṛta-rāṣṭraḥ uvāca*). The compounded words धृत (*dhṛta*) and राष्ट्र (*rāṣṭra*) are separated with a hyphen. In addition, the *visarga* (:/*ḥ*), dropped because the following उ (*u*) in उवाच (*uvāca*), is restored. This helps you see the individual words with their full grammatical form.

Interspersed in the prose (as well as in the English translation in the next column) are terms in brackets and parentheses. **Terms in brackets** have been added to help you comprehend the meaning and context, as well as to help you understand the not-so-obvious references of certain pronouns that are found in some verses. **Terms in parentheses** are synonyms for the preceding words or are definitions (in Sanskrit or English) of the preceding term.

Following the eighteen chapters of the *Bhagavad Gītā* is the **combined prose version** of all the

verses in paragraph form (see The *Bhagavad Gītā*—Prose). This section is for intermediate and advanced students who wish to further practice their reading and comprehension skills, but who may or not yet be skilled enough to fully grasp meaning in verse form at their relatively fast reading speed. To help maintain speed in reading, the phonetic Sanskrit *sandhi* rules have been reapplied in the combined prose section, and the compound-word hyphenation has been removed, e.g., धृत-राष्ट्रः उवाच (see the previous example) has been changed back to धृतराष्ट्र उवाच, so the text flows easily in pronunciation.

## Using the Translation

The English translation is out of the way, in its own column, to deemphasize it. This helps lessen dependence on the English as a medium for understanding the Sanskrit. Because certain Sanskrit terms have a depth of technical and cultural meaning packed into them or intentionally have multiple meanings, they are retained in the translation. The English translation of these Sanskrit terms that are not proper names is given in parentheses at their first occurrence. All of the terms that are in the *Bhagavad Gītā* verses are well explained in *The Bhagavad Gita Dictionary* (Aruna 2012)—see Appendix 4: Resources.

After the initial translation of these terms, the original Sanskrit is then used throughout. These terms are sometimes clarified in later verses in parenthetical commentary. The use of Sanskrit terms makes for better readability of the translation—during this language study and especially after this study—because there are no equivalent, concise expressions in English for these Sanskrit words (nor need they be manufactured!).

Likewise, **transliteration** of *Devanāgarī* terms is not provided within the translation of the verses. If you are unsure of a *Devanāgarī* word, try reading it first, then check yourself by looking it up in Appendix 1 (see "Using Appendix 1: Key to Devanagari Terms," which follows).

Because terms added to help you comprehend meaning are in brackets, you won't confuse editorial commentary with the actual translation. This feature is sorely lacking in other existing translations.

After you gain better understanding of the verses, you may skip over these bracketed comments as you read. Likewise, you may skip over the synonyms in parentheses in later readings. These practices will help you connect your English understanding of the verses to the original Sanskrit words used in the verses.

**Epithets** are employed far more frequently in older Sanskrit texts, such as the *Bhagavad Gītā*, than in modern English. Often they are placed in the verse simply for filling the requirements of meter. Therefore, unless the epithets (more than 200 in the 701 verses of the *Bhagavad Gītā*) have a meaningful employment in the context, they are rendered in the translation simply as the name of the addressed (e.g., "O *Arjuna*" instead of "O Son of [Your Mother] *Kuntī*"). Translations of these epithets can be found in *The Bhagavad Gita Dictionary*, as well as in *The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary* (Aruna 2012). See Appendix 4: Resources for descriptions of these and other books.

The English translation of the verses also doubles as an **answer key** to the exercises found in *The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita Chapter Two* (Aruna 2012), which are cross-referenced to the verses. The *Aruna Coursebook's* vocabularies and exercises provide chapter/verse references for all of the phrases and verses so that you can find them in this text in their full verse, prose, and translation—and in the context of surrounding verses. If only our classroom teachers were as thorough in their lessons and answers!

# Using Appendix 1: Key to Terms in Devanagari

Appendix 1 provides the transliteration of the *Devanāgarī* terms that appear in the English portions of each chapter (i.e., the Introduction, chapter introductions, and English translations of the verses) so that, if you are reading an unfamiliar term, you can be sure you are reading the *Devanāgarī* correctly. All the *Devanāgarī* terms in Appendix 1: Key to Devanagari Terms are listed alphabetically by chapter *in which they first appear*. This organization makes it possible to use the appendix in a variety of ways:

When you come across an unfamiliar word in *Devanāgarī*, first try to read it, then check yourself by looking up the word in Appendix 1. If you did not read it correctly, go back and read it in context now that you know what it is. In this way, you will quickly build word recognition.

You can use the terms listed for each chapter to preview the *Devanāgarī* terms before you begin reading the verses. Literacy research indicates that previewing vocabulary before you read it in context increases vocabulary acquisition (Izumi, 1995). Acquiring vocabulary is an essential part of learning to read any language.

If you don't know what a term means or you want to build your comprehension of its shades of meaning, look it up in *The Bhagavad Gita Dictionary*, if the word in a *Gītā* verse, or in another Sanskrit dictionary (see "Complement Your Reading with a Dictionary," which follows). In this way, you will hone your dictionary skills as well as build comprehension—for lifelong reading success.

The chapter-by-chapter listing tells you which *Devanāgarī* words you need to be able to read fluently by the end of each chapter—because many of them appear in later chapters. Practice reading the words until you are completely comfortable before you go on to reading the next chapter. If, as you read, you come across terms that you don't know, add them to the chapter list so that you can review them.

## Using the Other Appendixes

Appendix 2 provides biographical information about author/teacher A.K. Aruna, and Appendix 3 provides general background about the publisher and contact information. Appendix 4: Resources lists recommended media to enhance your studies, including other titles in *The Aruna Sanskrit Language Series*.

# Complement Your Reading with a Dictionary

One thing that sets apart good readers—in any language—from struggling ones is the use of a dictionary. Language learners who use a bilingual dictionary (such as *The Bhagavad Gita Dictionary*) to look up words as they read learn more vocabulary than those who do not (Luppescu and Day 1993). But it isn't simply using a dictionary that matters; it's how you use it. Research (Wen and Johnson 1997) shows that struggling readers do not engage in a process of decision making when they look up words. Good readers do. When you are using a dictionary during your reading, consider asking yourself the three questions that good readers ask themselves (Wen and Johnson 1997, p. 36):

1. Is it necessary to consult the dictionary?
2. What information in the dictionary is relevant?
3. Is the information worth writing down and, if so, in [Sanskrit] or in English?

If you are unfamiliar with a large percentage of the words in a verse, avoid looking up every single word. Instead, focus on the words you think are most necessary to comprehending the verse as a whole. You can also try guessing at the meaning of a word and then checking yourself by looking it up in the dictionary.

# The Importance of Reading in Vocabulary Acquisition

Building your vocabulary is an essential part of becoming a proficient Sanskrit reader. You need to be able to automatically recognize words *and* understand what they mean. In fact, a fluent reader could be defined as one who is able to not only decode text automatically (quickly and accurately), but who is also able to immediately understand the meaning of individual words so that the mind can concentrate on overall comprehension.

Literacy research in vocabulary acquisition indicates that extensive reading is the number one way that native speakers of a language acquire vocabulary (Saragi, Nation, and Meister 1978). Like native

speakers, language learners can also acquire vocabulary through reading (Krashen 1982). By working with this parallel text of the *Bhagavad Gītā* then, it is possible to expand your vocabulary and deepen your comprehension of terms, especially if you use a dictionary as you read (see the previous section "Complement Your Reading with a Dictionary") and also use vocabulary lists. The vocabulary lists provided in the *Aruna Coursebook*, which covers the second chapter, and in the *Gita Sanskrit Key*, which covers the entire *Bhagavad Gītā*, are specifically designed to help you acquire the vocabulary.

Learning vocabulary in context by reading is effective, but by adding explicit instruction in vocabulary (i.e., exposure to words and their meanings outside the reading context) to your routine, you extend the benefits you gain from reading (Paribakht and Wesche 1997). This is likely due to the fact that it takes multiple exposures to a word for it to become part of your vocabulary (Beck, McKeown, and Omanson 1987). That said, there is no reason to delay reading and no substitute for the act of reading. Only by reading can you infer the context-based meanings of words and begin to grasp connotations. Because many words in the *Bhagavad Gītā* are repeated, you will have repeated exposures to them. Not only will you acquire the terms as part of your reading vocabulary; you will begin understanding the referential meanings and thus comprehend the text at a deeper level.

## Repeated Readings Will Increase Your Fluency & Comprehension

When you begin to read the *Bhagavad Gītā* verses, you'll find that the parallel prose and English translation provide a lot of support. No matter the competency level at which you begin your reading, by the end of your first reading you will have improved significantly. If you are a beginning reader and you feel frustrated by your first reading, take heart. It is not unusual for a first reading to be "at frustration level" for a beginner. In fact, it is often the second reading that is "at instructional level" (Samuels 1997); that is, at a level at which you are able to achieve. With each reading of the text, you will read with greater accuracy and speed. If you are a beginning reader of Sanskrit, try repeated readings of one chapter of the *Bhagavad Gītā* at a time (e.g., chapter 2 so that you may also work with *The Sanskrit Reading Tutor: Read It, Click It, Hear It!* [Aruna 2012]—see Appendix 4: Resources).

Whatever your proficiency level, when you finish reading the entire *Bhagavad Gītā*, read it again, referring to the parallel text as much as you need to. As you repeat the readings of the text, however, gradually reduce the support of the parallel text. You may find yourself naturally looking less and less at the prose and the translation when you have read the text a few times. If not, intentionally reduce your dependency on them by covering the translation and/or the entire right-hand page. Give yourself opportunities to focus completely on the verses (you can always uncover a section of prose or English if you really need to refer to it).

By rereading the *Bhagavad Gītā* many times and gradually reducing your dependence on the supports of the parallel prose and translation, your ability to automatically recognize Sanskrit words will increase. Automatic word recognition not only increases the rate at which you are able to read but also frees up your mind from decoding tasks to refocus on word meaning and overall comprehension of the text (Samuels 1997). Repeated readings of a text lead to automatic word recognition, fluency, and comprehension.

## More Resources for Reading & Learning

Many of the cross-referenced resources of the *Aruna Sanskrit Language Series* can be used to great benefit standing alone. However, when used in conjunction, they are an even more powerful learning tool. They may be used as an aid or auxiliary to classroom instruction, but are specifically designed to help those who are not necessarily in a formal classroom setting, who are working individually or in a small group. Because the materials are flexible, they can accommodate small groups of learners who are at diverse levels. Group members that use the *Aruna Series* materials and meet on a regular basis will make steady progress as they help one another learn. Appendix 4: Resources describes the materials in the *Aruna Sanskrit Language Series*, as well as other resources.

# Sanskrit Pronunciation

If you are unsure of how to properly pronounce a word, it is best to ask a native speaker. If a native speaker is not available to work with you, refer to *The Sanskrit Reading Tutor*, which enables you to click on the parts of the verses of *Bhagavad Gītā*, chapter 2, to hear them. See Appendix 4: Resources for a description of *Tutor* and other helpful materials.

# Deeper *Gītā* Study

The resources in the *Aruna Sanskrit Language Series* are informed not only by a lifetime of study of Sanskrit but also by a lifetime of study of the *Bhagavad Gītā* and *Advaita Vedānta*. However, because the primary focus of the *Aruna Series* is Sanskrit language, it is limited. It does not attempt to unfold the vision of reality conveyed by the *Bhagavad Gītā* in the way that only a proper teacher, schooled in the methodology of unfoldment, can. If you are interested in studying the vision of the *Gītā* more deeply, one of the best resources is *The Bhagavadgita Home Study Course* (Dayanada 2004). This indepth unfoldment by Swami Dayananda Saraswati is precise and thorough, yet the language and explanations are highly accessible for modern readers. Many people across North America and throughout the world meet in small home-study groups to read and discuss the *Bhagavad Gītā* using this resource. (See Appendix 4: Resources for more information.)

# Home Study Groups

If you are currently making your way through *The Bhagavadgita Home Study Course* (Dayanada 2004), you will find the resources in *The Aruna Sanskrit Language Series* a way of furthering your learning, penetrating the meaning of the Sanskrit verses even more deeply. The texts in *The Aruna Sanskrit Language Series* can also be used as quick-yet-thorough reference guides to the grammar of written Sanskrit, especially as it appears in the *Bhagavad Gītā*. In fact, used together, the resources provide in-depth analysis of every word in the

*Bhagavad Gītā*. Every word, compound word, sentence, and topic is unfolded—in accordance with the ancient core tradition and free from New Age accretion. Therefore, nothing stands between you and the original text. You will understand what *Arjuna* heard in Sanskrit from Lord *Kṛṣṇa*.

# The *Bhagavad Gītā*

**भगवत्** ***bhagavat*** (*bhág-a-vat*) *m*. (*fr.* √भज् दाने dispense) ईश्वर the Lord, the one who is said to have the six-fold virtues (*bhaga*s/attainments) in absolute measure: *jñāna*/knowledge, *vairāgya*/dispassion, *vīrya*/power, *yaśas*/fame, *śrī*/wealth, and *aiśvarya*/lordship.

# Introduction to the *Bhagavad Gītā*

The भगवद् गीता (*Bhagavad Gītā*) is a report of a dialogue (in the Sanskrit language) between अर्जुन (*Arjuna*), the greatest warrior of his time, and कृष्ण (*Kṛṣṇa*) his friend and mentor. It is set at the start of a huge war, involving millions of soldiers, over the right of succession for a kingdom in north-central India, five thousand years ago. Two groups of cousins (all in the कुरु/*Kuru* clan) laid claim to the kingdom. On one side was Prince अर्जुन and his brothers, the five sons of the deceased King पाण्डु (*Pāṇḍu*). On the other side was King दुर्योधन (*Duryodhana*) and his brothers, the ninety-nine sons of King धृत-राष्ट्र (*Dhṛta-rāṣṭra*), who was the brother of King पाण्डु. The भगवद् गीता is centrally located in the much larger story, now called the महा-भारत (*Mahā-bhārata*), attributed to the near-mythical व्यास (*Vyāsa*), the greatest ever Indian writer and editor.

The antecedents that led to this war and the account of the war and its aftermath are covered in the rest of the महा-भारत. The भगवद् गीता starts with an introduction to the scene of the dialogue. In the first chapter, सञ्जय (*Sañjaya*), the minister to King धृत-राष्ट्र, brings the king up to date on what had happened at the war front. सञ्जय-'s narration forms the text of the भगवद् गीता. सञ्जय doesn't require war correspondents and spies. He is endowed with a magical ability to not only see and hear what is going on at the distant battlefield, but also to know the thoughts in the warriors' minds. The महा-भारत is, as teacher Swami Dayananda Saraswati says (2004, The Context of the *Gītā* Vol. 1 pg. 59), a historical poem, an imaginative weaving of drama around certain historical events and people.

कृष्ण was the most attractive divinity, the Lord incarnate, during अर्जुन-'s time and became the most celebrated focus of all Indian arts. अर्जुन was *the* leader of his time. He fought against unjust aggression and is the greatest mortal martial artist in all of Indian history and mythology. In the middle of the first chapter, सञ्जय finally speaks of these two main characters: अर्जुन commands कृष्ण to drive his chariot between the two armies so that he can get a close look at whom he would have to fight. कृष्ण drives the chariot into position and says, "Behold these assembled कुरु-s."

अर्जुन does not objectively see those lined up against him as warriors, but instead only sees his relatives, teachers, and friends. He subjectively sees only "*my* people." At this, अर्जुन loses his ability to remain the warrior and leader of his side. He questions the previously clear justifications for the war that he and his brothers had discussed with respected counselors—and with कृष्ण himself. A stream of emotionally grounded arguments against the war springs up in अर्जुन. Finally, he collapses on the chariot seat, unable to proceed and wondering if the unthinkable—retreat—is the wisest course.

In the second chapter, knowing full well that the reasons for this war are sound, कृष्ण prods अर्जुन to regain his composure and proceed. But the crisis in अर्जुन-'s heart is not just about the war. It is deeply centered on the purpose of life itself. अर्जुन feels a basic sorrow about the endless limitations of life—even of being a king of a huge empire or the king of heaven. He sees no purpose in a life that makes one struggle against others to gain fleeting moments of enjoyment, which are tainted by their costs. अर्जुन begins to believe that his born duty as a prince and warrior is contrary to his goal. He wonders if he should drop everything and take to a life of renunciation. In fact, he loses sight of what his goal in life is—if it is enjoyment, then it is no longer worth it; if it is duty and justice, he doubts they are worth their cost. Still, अर्जुन knows that कृष्ण is more than a friend. He looks upon कृष्ण as divine and knows that कृष्ण has the wisdom to teach him what the ultimate good is, which अर्जुन believes will solve his predicament. In the eleventh verse of chapter 2, the teaching, the reason for the भगवद् गीता, begins with a discussion—not of war, but of reality and how to live accordingly.

This vision of reality is initially presented in chapter 2 of the भगवद् गीता, from verse 11 to verse 30, and is elaborated throughout the other chapters, especially in chapter 13. This reality is referred to by the terms ब्रह्मन्, आत्मन्, or भगवान् (*Brahman*, *Ātman*, or *Bhagavān*), depending on whether the term is in reference, respectively, to itself, to oneself, or to the universe. This reality is presented in the भगवद् गीता as timeless and locationless. It is the very fabric of the warp-and-woof of time and space, and is the very center of oneself, the observer of this entire universe. The divisions of time and space of the universe—of before and after, inside and outside, up and down—that we each know, are the result of our limited views of the universe from our tiny perspectives. From the perspective of the total, of the

infinite whose center is everywhere, there is only one uniform, timeless, and locationless reality. This is the truly objective vision of the world, free of limited perspective, free of subjectivity. It is seeing reality as it is. This is the vision of the Lord, of भगवान्. It is the ultimate good, the ultimate goal of everyone. The life lived toward and within this goal is without sorrow, is conflict free, meritorious, and filled with complete satisfaction with oneself and the world. It is this vision that is taught in the भगवद् गीता.

Indeed, it is upon this clear vision of reality, taught in the भगवद् गीता and in the core tradition of ancient India literature, that the culture of धर्म (*dharma*, universal justice) is based. धर्म is the natural application of the life of one who has this clear vision of reality. How the person who has this vision of reality would behave in various situations is the guiding principle for determining what is धर्म.

A life of धर्म, which is meant for gaining this vision of reality, is given the title of योग[1] (*yoga*, a means) in the भगवद् गीता. Today's popular meaning of "योग" is not the "eight limbs of योग"[2], defined

[1] See the second chapter, verses 40, 48, and 50, as well as verses 55 through 72, describing the स्थित-प्रज्ञ (*sthita-prajña*), the one who has this clear (सात्त्विक, *sāttvika*) vision of reality.

[2] Patanjali technically defines योग as चित्त-वृत्ति-निरोध (*citta-vṛtti-nirodha*), stopping or controlling (निरोध, *nirodha*) the modifications (वृत्ति-s, *vṛitti*s) of the mind (चित्त, *citta*). If by *controlling* Patanjali meant mastering the mind by an intellect informed by self-knowledge, then every वेदान्तिन् (*Vedāntin*) would fully agree. But Patanjali is most often interpreted as positing a समाधि (*samādhi*) wherein thought modifications completely stop as the primary means for self-knowledge within योग. Somehow, knowledge is created by stopping the mind! Yet, a life with a stopped or inert mind is not a welcomed lifestyle in कृष्ण-'s teaching. It is viewed as a तामसिक (*tāmasika*) pursuit, not a सात्त्विक (*sāttvika*) pursuit, which runs counter to Patanjali's other goal of increasing सत्त्व (*sattva*) over रजस् (*rajas*) and तमस् (*tamas*) in one's life (for more about the three gunas, see भगवद् गीता, chapter 14). In contrast, कृष्ण-'s teaching of योग does not leave much room for ambiguity; we understand निरोध in समाधि in terms of resolving the reality of the mind and its objects into oneself, into the pleased self, so that the mind and its objects no longer take one for a ride through संसार (*saṃsāra*). For a complete explanation of

by the teacher Patanjali over two thousand years ago in his *Patanjali Yoga Sutras* (Aruna 2012). Today's योग is narrowly confined to just one or two of the eight limbs; specifically, आसन (*āsana*, posture) and प्राणायाम (*prāṇāyāma*, breath control) (see *Patanjali Yoga Sutras* 2.46–53) now promoted by contemporary योग teachers. The original meaning of "योग" in the भगवद् गीता can easily be drawn from the text itself. It refers to *a way of living* that helps the mind to mature so that one can fully appreciate this vision of timeless and locationless reality. It is, then, this vision of reality that fulfills one's life. It is the ultimate good, the ultimate goal of everyone. That is how योग is presented in the भगवद् गीता and how it has been taught for told and untold thousands of years, of which the भगवद् गीता is but a recent illumination, though it was composed well over two (or perhaps five) thousand years ago. This vision of reality has been preserved throughout the cycles of manifestation and destruction of the universe. It is a timeless vision of the timeless reality that forms the basis of this universe of time and space.

This timeless reality cannot be known as a this or a that, cannot be arrived at by deduction or induction, cannot be a limited object of any mentation or meditation. You can only *be* it. To appreciate this reality, you need only remove the wrong notions you have about yourself, this reality. To do this, you need not remove the limitations, but only understand the nature of these limitations—and why they cannot limit the reality in which they shine as its glories.

This is the teaching that removes the basic, but unexamined, sorrow centered on the countless limitations of a human life and replaces it with a fulfillment centered on the limitless nature of oneself. It is a teaching that does not view itself as Indian, but as belonging to all humankind from time immemorial. It is a teaching that is faithfully preserved by the people of India, not created by them. It is the teaching of the Lord. Not a Lord amongst or against other Lords, but rather there is only this Lord. Every thing; every being; you, yourself are but this Lord—this limitless reality. All this is one—oneself.

---

this and of the eight limbs of योग, see *Patanjali Yoga Sutras: Translation and Commentary in the Light of Vedanta Scripture* (Aruna 2012).

God does not look over you. Rather, you look over your body, your mind, and your life. You look over the universe as it presents itself to your senses and your mind, which are also part of this universe. The universe is ordered by the natural laws that are also called धर्म, the laws of cause and effect. These laws govern not only the physical but also the mental, the subtle. While you overlook all this before you, you remain the same (सम, *sama*) while all of the universe continually changes. This continually changing time–space intersection of your experience, this physical and subtle universe before you, has you as its basis, as its very existence.

All this that your senses can perceive, all this that your mind can conceive or imagine, all the laws of the world and of the mind that you are able to appreciate, all that your languages can describe, and even the basic building block of everything (whatever it is currently calculated to be by science)—all are limited in time and space, including time and space itself. All this observed universe has you as its observer and as its basis in reality (सत्-चित्, *sat-cit*/reality-awareness). This observer (you) cannot be limited as an object of the senses or the mind, since it is (you are) ever the subject, alone factually free of the perceived and conceived limitations of time and space and all within time and space. This is the basis of your undoubted and unchanging self-existence throughout your life—despite your changing body, mind, and environment.

Such an unchanging basis of reality, which you are—this alone can be the background, the substratum and surface, within which this ever-changing universe plays itself out. Such a basis of reality alone is the ultimate you seek. The seeker is but you, the limitless observer—the seeker seeking itself. Only ignorance can be the cause of this estrangement and subsequent seeking.

This teaching, in the भगवद् गीता in the form of a dialogue, removes that ignorance. In the भगवद् गीता, the divinity (कृष्ण) is teaching the student in you (अर्जुन is oneself). This is the divine teaching of your self-identity with all, with the total. It is also the teaching of independence, of freedom from all this before you. You are the being of this universe. This being is at once both the beloved (प्रिय, *priya*) and the love (प्रेम, *prema*) itself. It is a total turnaround in the understanding of oneself and of the universe.

I am not limited; I am limitless. And this current universe within time and space is completely within myself. My self is complete fulfillment.

As the doubts subside, the freedom and joy that is one's nature become fully appreciated. This understanding is the most grand vision, the ultimate knowledge to gain, the ultimate good. Then life truly becomes fun and sport, just as कृष्ण-'s life was lived with fun and sport—like a song (गीता). It is a life free of guilt, free of hurt, and free of fear.

Let us begin the *Songs of the Glorious Lord* (भगवद् गीता).

# Chapter 1 अर्जुन-विषाद-योग

## The Topic of *Arjuna*'s Sorrow

**योग** ***yoga*** (*yóg-a*) *m.* (*fr.* √युज् सङ्गमने unite, समाधाने contemplate, प्रयत्ने make effort) संयोग union, association, connection, attainment; उपाय method, means; ध्यान meditation, contemplation; प्रकरण topic.

# Chapter 1 अर्जुन-विषाद-योग

## The Topic of *Arjuna*'s Sorrow

The first chapter of the भगवद् गीता introduces both the scene of the narration and the scene of the dialogue. The dialogue consists of the teaching of and by the Lord, कृष्ण, to the student, अर्जुन. In the first scene, the scene of the narration, the king's minister, सञ्जय, is narrating for King धृत-राष्ट्र. सञ्जय tells what happened on the field of battle just prior to start of the war. He describes how the king's son approached his teacher in martial arts to whip up his teacher's desire for revenge against द्रुपद (*Drupada*) on the opposing side of the battlefield, for fear that the ब्राह्मण (*brāhmaṇa*, teacher) did not have the heart of a क्षत्रिय (*kṣatriya*, warrior) in battle.

सञ्जय then narrates the second scene, the scene of dialogue, which is just before the battle. In this scene, अर्जुन commands कृष्ण to drive his chariot between the two armies so that he can get a close look at whom he will fight. कृष्ण drives the chariot and says, "Behold these assembled कुरु-s." अर्जुन does not see those lined up against him as warriors, but instead only sees his relatives, teachers, and friends. He only sees "my people" (verse 31). At this, अर्जुन loses the ability to remain himself the warrior and leader. A stream of emotionally grounded arguments against this war wells up in him. His mind becomes stressed and overwhelmed by pity to such an extent that he is physically incapacitated. Finally, अर्जुन collapses on the chariot seat, unable to proceed and wondering if the unthinkable—retreat—would be the wisest course.

In this chapter, अर्जुन argues that war based on greed and desire for power is never justified. However, such a war is not what अर्जुन faces. Rather, this war, clearly narrated in the महा-भारत as a war of धर्म against अधर्म (*adharma*, injustice), is for the survival and reestablishment of justice over injustice. But, even in a just war, an individual on either side of battle may have mixed motivations. The individual may be for or against the war and yet be overwhelmed by desire for power and pleasures. A question for the individual is whether the mind's likes and dislikes override one's own sense of justice or one's duty to uphold justice. The answer to this question may hinge on the

individual's understanding of life and death. If the fear of death trumps all, or if justice is thought not worth dying for, then one may succumb to the persuasion of the mind's likes and dislikes.

We can look at अर्जुन-'s struggle in this crisis as a metaphor for our own lives. Each of us is in a life-and-death struggle, having to make decisions on a daily and hourly basis that make life a series of heavens and hells—for ourselves and for others. The भगवद् गीता presents this daily struggle—not the struggle of war or the justification for war, but the struggle of what is life and what is death (metaphysically and morally)—in a deeply philosophical and personal manner. It is not a theoretical discussion, but a methodical presentation of an indisputable reality and the assimilation of this vision of reality in one's life. अर्जुन-'s situational crisis mirrors each person's existential crisis regarding the meaning of life and the fear of death. अर्जुन-'s crisis is the catalyst for presenting a clear vision of life and death that solves the felt crisis in every human heart, and for revealing the way to open the heart to this vision and allow it to firmly remain there.

# ओम् अथ प्रथमोऽध्यायः

धृतराष्ट्र उवाच।
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

---

सञ्जय उवाच।
दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

---

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

---

## *Om*, Now starts the First Chapter

| | |
|---|---|
| धृत-राष्ट्रः उवाच।<br>धर्म-क्षेत्रे कुरु-क्षेत्रे युयुत्सवः समवेताः मामकाः पाण्डवाः च एव किम् अकुर्वत, सञ्जय॥१॥ | धृत-राष्ट्र said:<br>What indeed did my [people] and the पाण्डव-s do, assembled at कुरु-क्षेत्र, the field of धर्म, desiring to fight, O सञ्जय? (**1**) |
| सञ्जयः उवाच।<br>तदा तु राजा दुर्-योधनः पाण्डव-अनीकं व्यूढं दृष्ट्वा आचार्यं [द्रोणम्] उपसङ्गम्य वचनम् अब्रवीत्॥२॥ | सञ्जय said:<br>Then, seeing the army of the sons of पाण्डु in battle formation, King दुर्योधन, approaching [his] teacher [द्रोण], spoke [these] words. (**2**) |
| आचार्य, तव धीमता शिष्येण द्रुपद-पुत्रेण व्यूढां पाण्डु-पुत्राणाम् एतां महतीं चमूं पश्य॥३॥ | O Teacher, please look at this great army of the sons of पाण्डु, formed and led by your brilliant disciple, the son of द्रुपद. (**3**) |

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

---

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥

---

अत्र महा-इष्वासाः युधि
भीम-अर्जुन-समाः शूराः — युयुधानः, विराटः च, महा-रथः द्रु-पदः च, धृष्ट-केतुः, चेकितानः, वीर्यवान् काशि-राजः च, पुरु-जित्, कुन्ति-भोजः च, नर-पुङ्गवः शैब्यः च, विक्रान्तः युधा-मन्युः च, वीर्यवान् उत्तम-ओजाः च, सौभद्रः, द्रौ-पदेयाः च — सर्वे एव महा-रथाः [सन्ति] ॥ ४–६ ॥

Here are the heroes, great archers, equal in battle to भीम and अर्जुन — युयुधान (सात्यकि), विराट, the great warrior द्रुपद, धृष्ट-केतु, चेकितान, the valiant king of काशि, पुरुजित्, कुन्ति-भोज, the best of men शैब्य, the powerful युधामन्यु, the valiant उत्तमौजस्, the son of सुभद्रा (अभिमन्यु), and the [five] sons of द्रौपदी—every one a great warrior. (**4–6**)

---

द्विज-उत्तम, ये तु अस्माकं विशिष्टाः मम सैन्यस्य नायकाः सन्ति तान् निबोध। तान् ते (तव) सञ्ज्ञा-अर्थं ब्रवीमि ॥ ७ ॥

—Whereas, O Best of ब्राह्मण-s, please know those leaders of my army who are distinguished among us. I mention them for your recognition. (7)

| | | | | | | |
|---|---|---|---|---|---|---|
| भवान्भीष्मश्च | कर्णश्च | कृपश्च | समितिञ्जयः | । | | |
| अश्वत्थामा | विकर्णश्च | सौमदत्तिस्तथैव | च | ॥ | ८ | ॥ |
| अन्ये च बहवः | शूरा मदर्थे | | त्यक्तजीविताः | । | | |
| नानाशस्त्रप्रहरणाः | सर्वे | | युद्धविशारदाः | ॥ | ९ | ॥ |
| अपर्याप्तं | तदस्माकं | बलं | भीष्माभिरक्षितम् | । | | |
| पर्याप्तं | त्विदमेतेषां | बलं | भीमाभिरक्षितम् | ॥ | १० | ॥ |
| अयनेषु | च | सर्वेषु | यथाभागमवस्थिताः | । | | |
| भीष्ममेवाभिरक्षन्तु | भवन्तः | सर्व एव | हि | ॥ | ११ | ॥ |

---

| | |
|---|---|
| भवान्, भीष्मः च, कर्णः च, समितिञ्-जयः कृपः च, अश्वत्थामा, विकर्णः च, तथा एव च सौम-दत्तिः [सन्ति] ॥ ८ ॥ | [There are:] Your Honor, भीष्म, कर्ण, the victorious in battle कृप, अश्वत्थामन्, विकर्ण, and the son of सोम-दत्त. (**8**) |
| अन्ये च बहवः शूराः मद्-अर्थे त्यक्त-जीविताः, सर्वे नाना-शस्त्र-प्रहरणाः युद्ध-विशारदाः [सन्ति] ॥ ९ ॥ | And many other heroes who have given up [their] lives for me, all [armed] with many kinds of [hand-held] weapons and missiles, experts in warfare. (**9**) |
| अस्माकं तद् भीष्म-अभिरक्षितं बलम् अ-पर्याप्तम्, एतेषां तु इदं भीम-अभिरक्षितं बलं पर्याप्तम् ॥ १० ॥ | That army of ours, protected by भीष्म, is not overwhelmed; whereas this army of theirs, protected by भीम, is overwhelmed. (10) |
| सर्वेषु च अयनेषु यथा-भागम् अवस्थिताः सर्वे एव हि भवन्तः भीष्मम् एव अभिरक्षन्तु ॥ ११ ॥ | All of you stationed in [your] respective positions, in all the lanes [of attack against your formations], protect भीष्म. (11) |

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १३ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥

| | |
|---|---|
| प्रतापवान् कुरु-वृद्धः पिता-महः तस्य हर्षं सञ्जनयन् उच्चैः सिंह-नादं विनद्य शङ्खं दध्मौ॥१२॥ | Grandfather [भीष्म], the powerful elder of the कुरु-s, loudly let out a lion's roar and blew [his] conch, elating him [दुर्योधन]. (**12**) |
| ततः शङ्खाः च भेर्यः च पणव-आनक-गोमुखाः सहसा एव अभ्यहन्यन्त। सः शब्दः तुमुलः अभवत्॥१३॥ | Then, all at once [on दुर्योधन-'s side], conches, kettle drums, [various] small and large drums and horns were sounded. The noise was tumultuous. (**13**) |
| ततः श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवः च एव दिव्यौ शङ्खौ प्रदध्मतुः॥१४॥ | Then कृष्ण and अर्जुन, standing in the great chariot yoked with white horses, blew their divine conches. (14) |
| हृषीक-ईशः पाञ्च-जन्यं दध्मौ, धनञ्-जयः देव-दत्तं दध्मौ, भीम-कर्मा वृक-उदरः महा-शङ्खं पौण्ड्रं दध्मौ॥१५॥ | ¡;¢ðmø blew [His conch called] पाञ्च-जन्य; अर्जुन [blew his conch called] देव-दत्त. भीम, The Wolf-Bellied, [blew] his huge conch [called] पौण्ड्र. (15) |

| | | | | | |
|---|---|---|---|---|---|
| अनन्तविजयं | राजा | कुन्तीपुत्रो | युधिष्ठिरः । | | |
| नकुलः | सहदेवश्च | | सुघोषमणिपुष्पकौ ॥ | १६ | ॥ |
| काश्यश्च | परमेष्वासः | शिखण्डी | च महारथः । | | |
| धृष्टद्युम्नो | विराटश्च | | सात्यकिश्चापराजितः ॥ | १७ | ॥ |
| द्रुपदो | द्रौपदेयाश्च | सर्वशः | पृथिवीपते । | | |
| सौभद्रश्च | महाबाहुः | शङ्खान्दध्मुः | पृथक्पृथक् ॥ | १८ | ॥ |
| स घोषो | धार्तराष्ट्राणां | हृदयानि | व्यदारयत् । | | |
| नभश्च पृथिवीं | चैव | तुमुलो | व्यनुनादयन् ॥ | १९ | ॥ |

| | |
|---|---|
| कुन्ती-पुत्रः राजा युधि-ष्ठिरः अन्-अन्त-विजयं [दध्मौ], नकुलः सह-देवः च सु-घोष-मणि-पुष्पकौ [दध्मतुः] ॥१६॥ | King युधि-ष्ठिर, the son of कुन्ती, [blew his conch called] अनन्त-विजय. नकुल and सह-देव [blew their conches called] सुघोष and मणि-पुष्पक. (**16**) |
| परम-इष्वासः काश्यः च, महा-रथः शिखण्डी च, धृष्ट-द्युम्नः, विराटः च, अ-पराजितः सात्यकिः च,… ॥१७॥ | The expert archer king of काशि, the great warrior शिखण्डिन्, धृष्ट-द्युम्न, विराट, and the unsurpassed सात्यकि … (**17**) |
| …द्रु-पदः, द्रौ-पदेयाः च, महा-बाहुः सौभद्रः च — पृथिवी-पते, सर्वशः पृथक् पृथक् शङ्खान् दध्मुः ॥१८॥ | … द्रुपद, the [five] sons of द्रौपदी, and the mighty-armed son of सुभद्रा (अभिमन्यु)—O King [धृत-राष्ट्र], all [on the पाण्डव side] blew their individual conches. (**18**) |
| नभः च पृथिवीं च एव व्यनुनादयन् सः तुमुलः घोषः धार्त-राष्ट्राणां हृदयानि व्यदारयत् ॥१९॥ | Reverberating between heaven and earth, that tumultuous sound pierced the hearts of the allies of धृत-राष्ट्र. (**19**) |

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ २० ॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।
अर्जुन उवाच।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥

---

मही-पते, अथ शस्त्र-सम्पाते प्रवृत्ते
धार्त-राष्ट्रान् व्यवस्थितान् दृष्ट्वा
कपि-ध्वजः पाण्डवः धनुः उद्यम्य, तदा
हृषीक-ईशम् इदं वाक्यम् आह।

अर्जुनः उवाच।
अ-च्युत, मे रथम् उभयोः सेनयोः मध्ये
स्थापय, यावद् अहम् एतान्
अवस्थितान् योद्धु-कामान् निरीक्षे,
अस्मिन् रण-समुद्यमे मया कैः सह
योद्धव्यम्॥ २०–२२॥

O King [धृत-राष्ट्र], then as the clash of swords was about to begin, अर्जुन, with Lord हनुमान् as his banner, seeing the allies of धृत-राष्ट्र assembled, raised his bow and then said these words to कृष्ण.

अर्जुन said:
O कृष्ण, place my chariot between both armies so that I can examine these assembled wishing to do battle, and with whom I should fight at the outset of this war. (**20–22**)

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

---

सञ्जय उवाच।
एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ २४ ॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

---

ये एते युद्धे दुर्-बुद्धेः धार्त-राष्ट्रस्य प्रिय-चिकीर्षवः अत्र समागताः [तान्] योत्स्यमानान् [यावद्] अहं अवेक्षे॥ २३॥

[—So that] I [can] see [those] about to fight who have assembled here, wishing to please in war the distorted-thinking दुर्योधन. (**23**)

---

सञ्जयः उवाच।
भारत, गुडाका-ईशेन एवम् उक्तः हृषीक-ईशः उभयोः सेनयोः मध्ये भीष्म-द्रोण-प्रमुखतः सर्वेषां मही-क्षिताम् [प्रमुखतः] च रथ-उत्तमं स्थापयित्वा — "पार्थ, एतान् समवेतान् कुरून् पश्य" इति उवाच॥ २४–२५॥

सञ्जय said:
O धृत-राष्ट्र, having thus been ordered by अर्जुन, Lord कृष्ण placed the great chariot between both armies, right in front of भीष्म and द्रोण and all these kings, [and then] said, "अर्जुन, behold these assembled कुरु-s." (**24–25**)

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन् पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ २७ ॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

---

अथ पार्थः तत्र उभयोः सेनयोः अपि स्थितान् —पितॄन् पिता-महान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् श्वशुरान् सु-हृदः तथा एव च अपश्यत्। सः कौन्तेयः, तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य, परया कृपया आविष्टः, विषीदन् इदम् अब्रवीत्॥ २६–२७,२८॥

Now अर्जुन saw stationed there—in both armies—fathers, grandfathers, teachers, uncles, brothers, sons, grandsons, comrades, fathers-in-law, and friends. That अर्जुन, seeing all those assembled relatives and being overwhelmed with great pity, became sad and said this. (**26–27**, **28**)

अर्जुन उवाच।

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ २८ ॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥

---

| | |
|---|---|
| अर्जुनः उवाच।<br>कृष्ण, इमं स्व-जनं युयुत्सुं समुपस्थितं दृष्ट्वा, मम गात्राणि सीदन्ति, मुखं च परिशुष्यति, मे शरीरे वेपथुः च, रोम-हर्षः च जायते॥ २८,२९॥ | अर्जुन said:<br>O कृष्ण, seeing these, my people [on both sides], who have come ready to fight, my limbs are limp, [my] mouth is dry, my body is trembling, and [my] hairs are on end. (**28**, **29**) |
| गाण्डीवं हस्तात् स्रंसते, त्वक् च एव परिदह्यते। मे मनः च भ्रमति इव, अवस्थातुं च न शक्नोमि॥ ३०॥ | [My bow] गाण्डीव slips from [my] hand, and [my] skin burns. My mind seems to spin, and I am unable to stand. (**30**) |
| केशव, विपरीतानि च निमित्तानि पश्यामि, आहवे च स्व-जनं हत्वा श्रेयः न अनुपश्यामि॥ ३१॥ | O कृष्ण, I see bad omens [such as a twitching eye], and I see no good by killing my people in [this] war. (**31**) |

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥ ३२ ॥

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥

आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥ ३४ ॥

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥

| | |
|---|---|
| कृष्ण, विजयं न काङ्क्षे, न राज्यं च सुखानि च। गो-विन्द, किं नः राज्येन, किं भोगैः जीवितेन वा॥ ३२॥ | O कृष्ण, I do not desire [for myself] victory, nor kingdom, nor pleasures. O कृष्ण, what is the use of a kingdom to us? What is the use of pleasures or living? (**32**) |
| येषाम् अर्थे नः राज्यं भोगाः सुखानि च काङ्क्षितं, ते इमे प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः॥ ३३॥ | For whose sake we have desired kingdom, experiences, and pleasures—those same are assembled [here] in battle, giving up [their] lives and wealth … (**33**) |
| —आचार्याः, पितरः, पुत्राः, तथा एव च पिता-महाः, मातुलाः, श्वशुराः, पौत्राः, श्यालाः, तथा सम्बन्धिनः॥ ३४॥ | —Teachers, fathers, sons, grandfathers, uncles, fathers-in-law, grandsons, brothers-in-law, and [other] relations. (**34**) |
| मधु-सूदन, एतान् घ्नतः अपि त्रै-लोक्य-राज्यस्य हेतोः अपि हन्तुं न इच्छामि, किं नु मही-कृते॥ ३५॥ | O कृष्ण, though [they are] about to kill [me], I do not wish to kill them—even for dominion over the three worlds [earth, sky, and heaven], much less for [a kingdom on] this earth. (**35**) |

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥ ३६ ॥

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

---

| | |
|---|---|
| धार्त-राष्ट्रान् निहत्य नः का प्रीतिः स्यात्, जन-अर्दन। एतान् आतत-आयिनः हत्वा पापम् एव अस्मान् आश्रयेत्॥ ३६॥ | What satisfaction would we have by killing the sons of धृत-राष्ट्र, O कृष्ण? By killing these felons, only sin would befall us. (**36**) |
| तस्मात् वयं स्व-बान्धवान् धार्त-राष्ट्रान् हन्तुं न अर्हाः। स्व-जनं हि हत्वा कथं [वयं] सुखिनः स्याम, माधव॥ ३७॥ | Therefore, we ought not to kill our own relatives, the sons of धृत-राष्ट्र. By killing our own relations, how would we be happy, O कृष्ण? (**37**) |
| यदि अपि एते लोभ-उपहत-चेतसः कुल-क्षय-कृतं दोषं मित्र-द्रोहे पातकं च न पश्यन्ति, कुल-क्षय-कृतं दोषं अस्माभिः प्रपश्यद्भिः अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम्, जन-अर्दन॥ ३८–३९॥ | Even if these—whose minds are overwhelmed by greed—do not see the problem wrought by destroying the family or the crime in betraying friends, how can we—who clearly see the problem wrought by destroying the family—not know to withdraw from this sin, O कृष्ण? (38–39) |

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥ ४१ ॥

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४२ ॥

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥

| | |
|---|---|
| कुल-क्षये सनातनाः कुल-धर्माः प्रणश्यन्ति, धर्मे नष्टे अ-धर्मः कृत्स्नं कुलम् अभिभवति उत ॥ ४० ॥ | When the family is destroyed [by this killing of the men, the protectors of the family], the ancient धर्म-s (traditions) of the family are destroyed. When tradition is destroyed, अधर्म (corruption) indeed overwhelms the entire family. (**40**) |
| कृष्ण, अ-धर्म-अभिभवात् कुल-स्त्रियः प्रदुष्यन्ति। वार्ष्णेय, स्त्रीषु दुष्टासु वर्ण-सङ्करः जायते ॥ ४१ ॥ | O कृष्ण, due to [the family] being overpowered by corruption, the women of the family are debased. O कृष्ण, when the women are debased, there arises confusion of the social groups. (**41**) |
| सङ्करः कुल-घ्नानां कुलस्य च नरकाय एव [गमयति]। एषां पितरः हि लुप्त-पिण्ड-उदक-क्रियाः पतन्ति ॥ ४२ ॥ | Confusion leads to hell for the destroyers of the family, as well as for the family. Their ancestors, being deprived of the [post-death] rituals [of offerings] of rice balls, water, [etc.], indeed fall [to a lower status]. (**42**) |
| कुल-घ्नानां एतैः वर्ण-सङ्कर-कारकैः दोषैः शाश्वताः जाति-धर्माः कुल-धर्माः च उत्साद्यन्ते ॥ ४३ ॥ | Because of these crimes of the destroyers of the family, bringing about the confusion of the social groups, the ancient community traditions—as well as the family traditions—are destroyed. (**43**) |

| | | | | | |
|---|---|---|---|---|---|
| उत्सन्नकुलधर्माणां | मनुष्याणां | जनार्दन । | | | |
| नरके नियतं | वासो | भवतीत्यनुशुश्रुम ॥ | ४४ ॥ | | |

| | | | | | |
|---|---|---|---|---|---|
| अहो | बत | महत्पापं | कर्तुं | व्यवसिता | वयम् । |
| यद्राज्यसुखलोभेन | | हन्तुं | | स्वजनमुद्यताः ॥ | ४५ ॥ |

| | | | | | |
|---|---|---|---|---|---|
| यदि | मामप्रतीकारमशस्त्रं | | | शस्त्रपाणयः । | |
| धार्तराष्ट्रा | रणे | हन्युस्तन्मे | क्षेमतरं | भवेत् ॥ | ४६ ॥ |

| | |
|---|---|
| जन-अर्दन, उत्सन्न-कुल-धर्माणां मनुष्याणां नियतं नरके वासः भवति इति अनुशुश्रुम॥ ४४॥ | O कृष्ण, we have heard that the people who destroy the family धर्म surely have a stay in hell. (**44**) |
| अहो बत, यद् राज्य-सुख-लोभेन स्व-जनं हन्तुम् उद्यताः, वयं महत् पापं कर्तुं व्यवसिताः॥ ४५॥ | Oh! We are fixed to perpetrate a great sin, if, out of greed for kingdom and [its] pleasures, [we] are prepared to kill our own people. (**45**) |
| यदि शस्त्र-पाणयः धार्त-राष्ट्राः माम् अ-प्रतीकारम् अ-शस्त्रं रणे हन्युः, तद् मे क्षेमतरं भवेत्॥ ४६॥ | If the armed sons of धृत-राष्ट्र were in battle to kill me, unresisting and unarmed, that would be better for me [than this sin]. (**46**) |

सञ्जय उवाच।
एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥

---

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

---

| | |
|---|---|
| सञ्जयः उवाच।<br>अर्जुनः एवम् उक्त्वा सङ्ख्ये स-शरं चापं विसृज्य शोक-संविग्न-मानसः रथ-उपस्थे उपाविशत् ॥ ४७ ॥ | सञ्जय said:<br>Speaking thus, अर्जुन, giving up [his] bow and arrows in [the middle of] the battle [-field], sat down on the chariot seat, his mind overcome with sorrow [in the form of guilt and hurt]. (**47**) |
| ओं तद् सत्। इति<br>श्रीमद्-भगवद्-गीतासु उपनिषत्सु<br>ब्रह्म-विद्यायां योग-शास्त्रे<br>श्री-कृष्ण-अर्जुन-संवादे<br>अर्जुन-विषाद-योगः नाम प्रथमः<br>अध्यायः ॥ १ ॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the first chapter, called “The Topic of अर्जुन-’s Sorrow,” of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 2 साङ्ख्य-योग

## The Topic of Knowledge

**साङ्ख्य** ***sāṅkhya*** (*sāṅ-khy*[*ā*]-*a*) *m.* (*fr.* सम् + √ख्या गणने enumerate or group, सम्प्रकथने tell completely) विचार inquiry, ज्ञान knowledge, शास्त्र the teaching.

# Chapter 2 साङ्ख्य-योग

## The Topic of Knowledge

In chapter 1, we witnessed a web of future fantasies stream from अर्जुन-'s mind in a momentary tailspin into uncontrolled sentimentality. In chapter 2, we see that, despite this tailspin, अर्जुन does not convince himself to quit the battle. He knows it is his duty. Because अर्जुन retains his faith in कृष्ण, he is able to summon his strength of character and, with faith, surrender himself as a student to कृष्ण. अर्जुन-'s upbringing in the Vedic culture provides him the appropriate way to ask for the teaching, which he has heard is the solution to life's misery. अर्जुन does not ask कृष्ण for suggestions regarding the immediate situation. Rather, he asks for श्रेयस् (*śreyas*). The ancient उपनिषद् teachings load this word with a specific meaning. श्रेयस् conveys the ultimate good in life, rather than some pleasant, temporary benefit.

कृष्ण is being asked to be a गुरु (*guru*), a teacher. He himself has been a young student under the sage सान्दीपनि (*Sāndīpani*), so, in addition to being the Lord incarnate, कृष्ण clearly is equipped with the methodology of teaching presented in the उपनिषद्-s. He shows this by fluently quoting and paraphrasing verses of several उपनिषद्-s and by wholesale borrowing topics from several more to weave a complete vision.

The Advaita Vedanta teaching is then not new. It is completely within the ancient tradition of the उपनिषद् scriptures and elaborates the preparation required to assimilate the direct knowledge of the teaching. It is not a "secret" teaching for the initiated only. Rather, it is presented in the middle of the महा-भारत, the most popular storybook in Indian literature.

In chapter 2, कृष्ण teaches अर्जुन that the people अर्जुन is grieving are, in fact, the being that is timeless and unchanging, and none other than the self of अर्जुन. So, being changeless, अर्जुन, from the true perspective of himself, whether he knows it or not, is not the doer of action—not the slayer of these people or even of these bodies before him.

This is called विवेक (*viveka*), discernment of the real from the unreal, the self from the nonself. This teaching is quite shocking (आश्चर्यवत्, *āścaryavat*), and not easily understood when first heard. Therefore, कृष्ण further explains. He speaks from the perspective of the relative reality of living and explains that impermanent entities obviously have an end and that their lot after their end is both unknown and unknowable to others. So, even relatively then, there is no basis for grieving, he tells अर्जुन. Moreover, कृष्ण says, if अर्जुन deserts the battlefield, he is deserting his duty, and this will bring unwanted repercussions in this life and later.

कृष्ण then proceeds to teach the prerequisite understanding that a student needs in order to assimilate this profound teaching. This understanding involves committing to doing one's duty with the intent of gaining in this life the knowledge that liberates. This preparation is presented in the उपनिषद्-s by the description of the qualifications of the student and by various उपासन-s (*upāsana*s), meditations on life and the universe, that instill a cosmic perspective to living. This preparation is here called कर्म-योग (*karma-yoga*). It is a वैराग्य (*vairāgya*), a dispassion for material and even spiritual results that are time bound. Then, with this dispassion, doing action as a participation in the cosmic cycle simply because it is a duty-to-be-done and is the proper thing to be done that matures the mind. The mature mind then has the discipline and clarity to assimilate the self-knowledge that liberates—that brings one to an appreciation of ब्रह्मन्, the ultimate reality, as one's self.

# अथ द्वितीयोऽध्यायः

सञ्जय उवाच।
तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच।
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यम् अकीर्तिकरमर्जुन ॥ २ ॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

## Second Chapter

| | |
|---|---|
| सञ्जयः उवाच।<br>मधु-सूदनः तम् [अर्जुनं] तथा कृपया आविष्टम् अश्रु-पूर्ण-आकुल-ईक्षणं विषीदन्तम् [च] इदं वाक्यम् उवाच॥१॥ | सञ्जय said:<br>कृष्ण spoke these words to him [अर्जुन] who in that way was overwhelmed by pity, with eyes stressed and full of tears and was sad. (**1**) |
| श्री-भगवान् उवाच।<br>विषमे इदम् अन्-आर्य-जुष्टम् अ-स्वर्ग्यम् अ-कीर्ति-करं [च] कश्मलं कुतः त्वा समुपस्थितम्, अर्जुन॥२॥ | The Lord said:<br>In [such] a crisis [i.e., at the outset of this war], from where came to you this despair, unacceptable for a person of the Vedic culture, not leading to heaven, and engendering dishonor, O अर्जुन? (**2**) |
| क्लैब्यं मा स्म गमः, पार्थ। एतद् त्वयि न उपपद्यते। क्षुद्रं हृदय-दौर्बल्यं त्यक्त्वा उत्तिष्ठ, परन्-तप॥३॥ | Do not yield to impotency, O अर्जुन. It does not befit you. Give up this lowly weakness of heart and get up, O अर्जुन (Vexer of Foes)! (**3**) |

अर्जुन उवाच।
कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

गुरूनहत्वा हि महानुभावाञ्छ्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

---

| | |
|---|---|
| अर्जुनः उवाच। मधु-सूदन अरि-सूदन, कथम् अहं सङ्ख्ये पूजा-अर्हौ भीष्मं द्रोणं च [उभौ] इषुभिः प्रतियोत्स्यामि॥४॥ | अर्जुन said: O कृष्ण (Destroyer of Demons and Foes), how will I fight in battle with arrows against भीष्म and द्रोण, who are worthy of my worship [thus becoming a destroyer of my गुरु-s]? (**4**) |
| महा-अनुभावान् गुरून् अ-हत्वा हि इह लोके भैक्ष्यम् अपि भोक्तुं श्रेयः [स्यात्], अर्थ-कामान् तु गुरून् हत्वा इह एव रुधिर-प्रदिग्धान् भोगान् भुञ्जीय॥५॥ | [It would be] better I not kill these highly honored गुरु-s and even beg alms here in the world [i.e., become a renunciate] than kill [these] गुरु-s seeking [their own] ends and [then] indulge here in pleasures, drenched with [their] blood. (**5**) |
| कतरद् च नः गरीयः एतद् न विद्मः — यद् वा जयेम यदि वा नः जयेयुः। यान् एव हत्वा न जिजीविषामः, ते धार्त-राष्ट्राः प्रमुखे अवस्थिताः॥६॥ | We [I] do not know which one of the two is better for us—whether [by my fighting] we should conquer or [by my withdrawal] they should conquer us. Those allies of धृत-राष्ट्र, after slaying whom we would not want to live, stand facing [us]. (**6**) |

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

सञ्जय उवाच।
एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥

---

| | |
|---|---|
| अहं कार्पण्य-दोष-उपहत-स्व-भावः धर्म-सम्मूढ-चेताः च त्वां पृच्छामि — यद् निश्चितं श्रेयः स्यात्, तद् मे ब्रूहि। अहं ते शिष्यः। त्वां प्रपन्नं, मां शाधि॥७॥ | With [my] mind overcome by miserliness [i.e., yet to be spent seeking श्रेयस्/the ultimate good] and confused about धर्म, I ask You—what is definitely श्रेयस्? That, please tell me. I am Your student. Having surrendered to You, please teach me. (7) |
| भूमौ हि (=यस्मात्) अ-सपत्नम् ऋद्धं राज्यं, सुराणाम् अपि च आधिपत्यम् अवाप्य, यद् मम इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात्, [तद्] न प्रपश्यामि॥८॥ | —Because, [though] gaining an unrivalled and prosperous kingdom on earth and even lordship over the heavenly deities, I do not see [on my own] what would remove the sorrow [i.e., guilt and hurt] drying up my senses. (**8**) |
| सञ्जयः उवाच। हृषीक-ईशम् एवम् उक्त्वा, परन्-तपः गुडाका-ईशः गो-विन्दं "न योत्स्ये" इति उक्त्वा, तूष्णीं बभूव ह॥९॥ | सञ्जय said: Having thus spoken to कृष्ण, अर्जुन, the Vexer of Foes, told कृष्ण "I will not fight" and became silent. (**9**) |

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

श्रीभगवानुवाच।
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ ११ ॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ १२ ॥

---

| | |
|---|---|
| भारत, हृषीक-ईशः प्रहसन् इव तम् उभयोः सेनयोः मध्ये विषीदन्तम् इदं वचः उवाच॥१०॥ | O धृत-राष्ट्र, with a smile [i.e., smiling at the new-found student in अर्जुन and smiling at the bold request to teach अर्जुन between two armies at the outset of war], कृष्ण said these words to him [अर्जुन] who was sad in the midst of both armies. (**10**) |
| श्री-भगवान् उवाच। त्वम् अ-शोच्यान् अन्वशोचः, प्रज्ञा-वादान् च भाषसे। पण्डिताः गत-असून् अ-गत-असून् च न अनुशोचन्ति॥११॥ | The Lord said: You have grieved for those not to be grieved, yet proclaim words of wisdom. The wise do not grieve for those whose life's breath is gone or not [yet] gone. (**11**) |
| न तु एव जातु अहं न आसं, न त्वं, न इमे जन-अधिपाः। न च एव सर्वे वयम् अतः परं न भविष्यामः॥१२॥ | Never [was there a time that] I was not, nor you, nor these kings. Nor will any of us cease to exist hereafter. (**12**) |

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३ ॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥

---

| | |
|---|---|
| देहिनः, यथा अस्मिन् देहे कौमारं यौवनं जरा च, तथा देह-अन्तर-प्राप्तिः। तत्र धीरः न मुह्यति॥ १३॥ | For the देहिन् (one with a body), like [passing through] childhood, maturity, and old age in this body, so too [for the देहिन् who remains the same] there is the gain of another body [after this body dies]. Concerning this, the wise person is not confused. (13) |
| कौन्तेय, मात्रा-स्पर्शाः (इन्द्रिय-स्पर्शाः मात्र-स्पर्श-विषयाः वा) तु शीत-उष्ण-सुख-दुःख-दाः आगम-अपायिनः अ-नित्याः। तान् तितिक्षस्व, भारत॥ १४॥ | O अर्जुन, the contacts of the senses [or rather, the sense objects—from a distance or in contact], which give cold/hot and pleasure/pain [the natural pairs of opposites], have a beginning and an end and [therefore] are time bound. Endure them [i.e., accept them objectively as they are], O अर्जुन. (14) |
| पुरुष-ऋषभ, यं हि पुरुषम् एते स्पर्शाः विषयाः वा न व्यथयन्ति, सम-दुःख-सुखं धीरं च, सः अ-मृतत्वाय कल्पते॥ १५॥ | O अर्जुन, the person whom these [unavoidable contacts or sense objects] do not afflict, who is the same in pleasure and pain, and who is discerning—that one is fit for freedom. (15) |

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥

---

| | |
|---|---|
| अ-सतः (सुतः अन्यस्य) भावः न विद्यते, सतः अ-भावः न विद्यते। तत्त्व-दर्शिभिः उभयोः अपि अनयोः अन्तः तु दृष्टः॥१६॥ | असत् (the unreal, the time-bound form) has no being [of its own], and सत् (the real, existence) has no nonbeing. [This] conclusion, regarding both these, is discerned by the seers of the truth. [In "this form exists," "that form exists," existence is constant. But the unreal, time-bound forms constantly change.] (16) |
| येन तु इदं सर्वं ततं, तद् [सत्] अ-विनाशि विद्धि। न कश्-चिद् अस्य अ-व्ययस्य विनाशं कर्तुम् अर्हति॥१७॥ | By which [सत्, existence/reality] all this [the असत्, the "this and that" time-bound world, including this body-mind complex] is pervaded, know that [i.e., the timeless and real] to be indestructible. Nothing is able to bring about the destruction of this that does not change. (**17**) |
| नित्यस्य (=अ-कालस्य) अ-नाशिनः अ-प्रमेयस्य (=मनो-विषयत्वम् अयोग्यस्य) शरीरिणः इमे देहाः अन्तवन्तः उक्ताः। तस्माद् युध्यस्व, भारत॥१८॥ | These bodies of the timeless, indestructible, non-objectifiable [as the self-evident subject] embodied one [who obtains as the being/reality of these body-mind complexes] are said to be subject to [unavoidable] death. Therefore fight, O अर्जुन. (**18**) |

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥ १९ ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वाभविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

---

| | |
|---|---|
| यः एनं [देहिनम्/सत्] हन्तारं वेत्ति, यः च एनं हतं मन्यते, उभौ तौ न विजानीतः। अयं न हन्ति, न हन्यते॥१९॥ | The one who thinks this [the embodied one, the real, the self-evident subject] is the agent of destruction [change, etc.], and the one who thinks this [the embodied one, the real] is the object of destruction—both do not know. This neither destroys nor is destroyed. (**19**) |
| अयं न कदा-चिद् जायते, म्रियते वा। न [अस्ति] — भूत्वा भूयः अ-भविता, न वा [—अभूत्वा भूयः भविता इत्यर्थः]। अयम् अ-जः नित्यः शाश्वतः पुराणः शरीरे हन्यमाने न हन्यते॥२०॥ | This [the embodied one, the real] is never born, nor dies. It is not that, coming to be, it again comes not to be, nor the opposite [becoming nonexistent, it again comes to be]. This—which is unborn, timeless, ever the same, and always there—is not destroyed [i.e., not changed] when the body is being destroyed [i.e., changed]. (**20**) |
| पार्थ, यः एनम् [देहिनम्/सत्] अ-विनाशिनं नित्यम् अ-जम् अ-व्ययं [च] वेद, कथं सः पुरुषः कं घातयति, कं [च] हन्ति॥२१॥ | O अर्जुन, [when] one knows this [the देहिन्—oneself, the embodied one, the real] to be indestructible, timeless, unborn, and unchanging, [then] how does that person cause the death of whom, or kill whom? (**21**) |

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२ ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

---

| | |
|---|---|
| यथा नरः जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति, तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति॥ २२॥ | Just as a person discarding worn-out clothes takes other new ones; similarly, the embodied one, discarding worn-out bodies, takes on other new ones. (**22**) |
| [भूमिमयानि] शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति, आपः एनं न क्लेदयन्ति, मारुतः न च शोषयति॥ २३॥ | Weapons [made from the element earth] do not cut it, nor [does the element] fire burn it, nor [does the element] water soak it, nor [does the element] wind wither it. (**23**) |
| अयम् अ-च्छेद्यः, अयम् अ-दाह्यः, अ-क्लेद्यः अ-शोष्यः एव च। अयं नित्यः सर्व-गतः (=अ-देशः) स्थाणुः अ-चलः सनातनः [च]॥ २४॥ | This is uncutable. This is unburnable, unwetable, and unwitherable. This is timeless, locationless, stable, unmoving, and always existing. (**24**) |

अव्यक्तोऽयमचिन्त्योऽयम् अविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

| | |
|---|---|
| अयम् अ-व्यक्तः, अयम् अ-चिन्त्यः (=मनो-विषयत्वम् अ-योग्यः), अयम् अ-विकार्यः उच्यते। तस्मात् एवम् एनं विदित्वा अनुशोचितुं न अर्हसि॥ २५॥ | This is said to be not manifest [to the senses], not an object of thought [since it is the conscious being that is aware of all thoughts], and not subject to change. Therefore [since there is no basis for grief regarding the self], knowing this as such, you cannot grieve. (**25**) |
| महा-बाहो, अथ च एनं नित्य-जातं नित्यं मृतं वा मन्यसे, तथा अपि एवं त्वं शोचितुं न अर्हसि॥ २६॥ | O अर्जुन, now if you consider this [the self—as the body or as an individual soul,] to continually be born and die—even in that way, you should not grieve. (**26**) |
| जातस्य हि (=यस्मात्) मृत्युः ध्रुवः, मृतस्य च जन्म ध्रुवं, तस्मात् अ-परिहार्ये अर्थे त्वं शोचितुं न अर्हसि॥ २७॥ | —Because, for what is born, death is certain, and for what is dead, birth [in another form] is certain. Then you should not grieve over a situation that cannot be avoided. (**27**) |

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥

| | |
|---|---|
| भारत, भूतानि अ-व्यक्त-आदीनि व्यक्त-मध्यानि अ-व्यक्त-निधनानि एव [च]। तत्र का परिदेवना॥ २८॥ | O अर्जुन, [all] beings are unseen [before] their beginning [i.e., unknown as to whom or what they were before their birth], [are] seen in between, and [are] unseen [after] their end [i.e., unknown as to their lot after death]. Regarding that, why grieve? (**28**) |
| कश्-चिद् एनम् [देहिनम्/सत्] आश्चर्यवत् पश्यति। तथा एव च अन्यः आश्चर्यवत् वदति, अन्यः च एनम् आश्चर्यवत् शृणोति। कश्-चिद् च श्रुत्वा अपि एनं न एव वेद॥ २९॥ | As a wonder, someone sees [i.e., knows] this [timeless, locationless, embodied one—the real]! Similarly, as a wonder, another [i.e., the teacher] speaks [of this] and, as a wonder, another listens about this! Even after listening, another still does not know this [which is oneself]! (**29**) |
| भारत, सर्वस्य देहे अयं देही नित्यम् अ-वध्यः, तस्मात् त्वं सर्वाणि भूतानि शोचितुं न अर्हसि॥ ३०॥ | O अर्जुन, this embodied one in every body is ever indestructible; therefore, you should not grieve over all these beings. (**30**) |

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ ३२ ॥

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

| | |
|---|---|
| स्व-धर्मम् अपि च अवेक्ष्य विकम्पितुं न अर्हसि, क्षत्रियस्य हि (=यस्मात्) धर्म्यात् युद्धात् अन्यद् श्रेयः न विद्यते॥ ३१॥ | Even in regard to your own धर्म (nature and duty), you should not waver. Because, for a warrior [such as you—by nature and duty], there is no greater good than a battle on the side of धर्म [i.e., a battle for the protection of what supports people through their maturation to wisdom]. (**31**) |
| यद्-ऋच्छया च अपावृतं स्वर्ग-द्वारम् उपपन्नम्। पार्थ, सुखिनः क्षत्रियाः ईदृशं युद्धं लभन्ते॥ ३२॥ | By happenstance an open door to heaven has come. O अर्जुन, happy are warriors who get such a battle. (**32**) |
| अथ चेद् त्वम् इमं धर्म्यं सङ्ग्रामं न करिष्यसि, ततः स्व-धर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि॥ ३३॥ | Now if you will not undertake this battle on the side of धर्म, then forfeiting your धर्म (nature and duty) and honor, you will incur पाप (karmic demerit). (**33**) |
| भूतानि च अपि ते (=तव) अ-व्ययाम् अ-कीर्तिं कथयिष्यन्ति। सम्भावितस्य च अ-कीर्तिः मरणात् अतिरिच्यते॥ ३४॥ | [These] creatures [i.e., even yesterday's recruits] will also recount your unfading infamy. Dishonor for one who had been honored is worse than death. (**34**) |

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥ ३६ ॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥ ३७ ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

---

| | |
|---|---|
| महा-रथाः त्वां भयात् रणात् उपरतं मंस्यन्ते। येषां च बहु-मतः भूत्वा त्वं लाघवं यास्यसि।। ३५।। | The great warriors will think you withdrew from battle out of fear. Among whom, having been highly honored, you will become insignificant. (**35**) |
| तव च अ-हिताः तव सामर्थ्यं निन्दन्तः बहून् अ-वाच्य-वादान् वदिष्यन्ति। किं नु ततः दुःखतरम्।। ३६।। | Moreover, your enemies, belittling your prowess, will speak many unutterable words [about you]. What is more painful than that? (**36**) |
| हतः वा स्वर्गं प्राप्स्यसि, जित्वा वा महीं भोक्ष्यसे। कौन्तेय, तस्मात् युद्धाय कृत-निश्चयः उत्तिष्ठ।। ३७।। | Killed, you will gain heaven; conquer and you will enjoy the world. Therefore, O अर्जुन, resolve to fight, and get up! (**37**) |
| सुख-दुःखे लाभ-अ-लाभौ जय-अ-जयौ [च] समे कृत्वा, ततः युद्धाय युज्यस्व। एवं पापं न अवाप्स्यसि।। ३८।। | Being the same in pleasure/pain, gain/loss, or victory/defeat, thus prepare for battle [i.e., for स्व-धर्म—your duty—whatever it is, as it presents itself throughout life’s changes]. In this way you will incur no पाप (karmic demerit). (**38**) |

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥ ३९ ॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

---

| | |
|---|---|
| साङ्ख्ये (=सद्-वस्तु-विवेक-विषये श्रेयो-विषये) एषा बुद्धिः ते (=तुभ्यम्) अभिहिता। पार्थ, योगे तु इमां [बुद्धिं] शृणु, यया बुद्ध्या युक्तः कर्म-बन्धं प्रहास्यसि॥ ३९॥ | This wisdom regarding साङ्ख्य (the knowledge of reality, which is श्रेयस्) has been told to you. On the other hand, O अर्जुन, listen to this wisdom regarding योग (the means for preparing for this knowledge), endowed with which, you will be free from the bondage that is कर्मन्. (**39**) |
| इह [कर्म-योगे श्रेयो-मार्गे] अभिक्रम-नाशः न अस्ति, प्रत्यवायः न विद्यते। अस्य [कर्म-योगस्य] धर्मस्य सु-अल्पम् अपि महतः भयात् त्रायते॥ ४०॥ | In this [the means for श्रेयस्, complete freedom] there is no loss of progress, nor adverse result. Even a little of this [योग, means]—which is [also] धर्म (one's nature and duty, which will support one through the maturation process)—protects from great fear. (**40**) |
| इह व्यवसाय-आत्मिका बुद्धिः एका, कुरु-नन्दन। अ-व्यवसायिनां [श्रेयो-मार्गे] बुद्धयः बहु-शाखाः हि अन्-अन्ताः च॥ ४१॥ | Regarding this [the means for श्रेयस्], the well-discerned knowledge is but one, O अर्जुन. [However,] for those with no discernment [of this fact], the notions [regarding the means for श्रेयस्] are indeed many-branched and endless. (**41**) |

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

| | |
|---|---|
| पार्थ, अ-विपश्चितः वेद-वाद-रताः "न अन्यद् अस्ति" इति वादिनः काम-आत्मानः स्वर्ग-पराः याम् इमां भोग-ऐश्वर्य-गतिं प्रति क्रिया-विशेष-बहुलां जन्म-कर्म-फल-प्रदां पुष्पितां वाचं प्रवदन्ति॥ ४२–४३॥ | O अर्जुन, the unwise—who remain engrossed in [the bulk of] the words of the वेद-s [which deal with heaven-going and gaining power, wealth, and progeny], arguing that there is nothing more, who are full of desires [i.e., requirements/anticipations], and who hold heaven as primary—they spout flowery discourse full of special rituals [directed] toward gaining power and objects of consumption, [but] yield [further] birth as a result of their actions. (**42–43**) |
| तया [पुष्पितया वाचा] अपहृत-चेतसां भोग-ऐश्वर्य-प्रसक्तानां व्यवसाय-आत्मिका बुद्धिः समाधौ (=अन्तः-करणे) न विधीयते॥ ४४॥ | For those whose minds are carried away by that [flowery talk] and who are attached to consumption and power, a well-discerned knowledge is not formed in समाधि (their minds). (**44**) |
| वेदाः त्रै-गुण्य-विषयाः। अर्जुन, निस्-त्रै-गुण्यः निर्-द्वन्-द्वः नित्य-सत्त्व-स्थः निर्-योग-क्षेमः आत्मवान् भव॥ ४५॥ | The वेद-s [generally] deal with त्रैगुण्य (the three-fold universe). O अर्जुन, be free from त्रैगुण्य, free from the pairs of opposites, ever established in सत्त्व (contemplative disposition), free from acquiring and protecting, and [be] attentive. (**45**) |

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

---

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

---

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

---

| | |
|---|---|
| यावान् सर्वतः सम्प्लुत-उदके उद-पाने अर्थः (=प्रयोजनं), तावान् [सद्-वस्तु] विजानतः ब्राह्मणस्य सर्वेषु वेदेषु [अर्थः] ॥ ४६ ॥ | For a ब्राह्मण (contemplative person) who knows [सत्, the all pervading reality], there is as much usefulness in all the वेद-s as [there is] in a small watering hole [in a once-dry river bed, when the river is] in a flood everywhere [i.e., seeing the truth everywhere, one is no longer dependent on the वेद-s]. (**46**) |
| कर्मणि एव ते (=तव) अधिकारः (=प्रभुत्वम्), फलेषु मा कदा-चन। कर्म-फल-हेतुः मा भूः [मा मन्यस्व इत्यर्थः]। अ-कर्मणि ते (=तव) सङ्गः मा अस्तु ॥ ४७ ॥ | You have control only in doing action, never in its results. Do not [think yourself to] be the cause of the results of action [that cause being but the Lord as embodied in the universal laws of कर्मन् (action and its result)]. Nor should you have attachment to inaction. (**47**) |
| धनञ्-जय, [कर्म-फले] सङ्गं त्यक्त्वा, सिद्धि-अ-सिद्ध्योः समः भूत्वा, [एवं] योग-स्थः [सन्], कर्माणि कुरु। [कर्म-फले बुद्धेः] समत्वं योगः उच्यते ॥ ४८ ॥ | O अर्जुन, being free from attachment [toward anticipated results], [i.e.,] being सम (the same) toward success or failure, established in योग [this attitude], [then] perform action. Sameness [of attitude, बुद्धि, toward results—whatever they are] is called योग. (**48**) |

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

---

| | |
|---|---|
| कर्म बुद्धि-योगात् दूरेण हि अवरम्, धनञ्-जय। बुद्धौ शरणम् अन्विच्छ। कृपणाः फल-हेतवः॥४९॥ | Action [or ritual] [by itself] is indeed far inferior to this बुद्धि-योग (the means which is this attitude), O अर्जुन. Seek refuge in this attitude. Those whose motives are [only for] the results [of action] are misers [i.e., are yet to spend their intellect in motivation for श्रेयस्]. (**49**) |
| बुद्धि-युक्तः इह उभे सु-कृत-दुष्-कृते जहाति। तस्मात् योगाय युज्यस्व। कर्मसु कौशलं (=यथा-अर्थता) योगः॥५०॥ | Endowed with [this] attitude, one sheds in this world both karmic merit and demerit. Therefore, commit to this योग. Propriety in actions [i.e., acting within धर्म, where the means are as important as the end] is [called] योग. (**50**) |
| बुद्धि-युक्ताः हि (=यस्मात्) मनीषिणः कर्म-जं फलं त्यक्त्वा, जन्म-बन्ध-विनिर्मुक्ताः [सन्तः], अन्-आमयं पदं गच्छन्ति॥५१॥ | —Because the wise, endowed with this attitude—after discarding [the pressure for] result born of action [appreciating धर्म as "to be done," accepting the results gracefully], freed [by knowledge] from the bondage that is birth—they reach the attainment that is free from affliction. (**51**) |

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

अर्जुन उवाच।
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

| | |
|---|---|
| यदा ते बुद्धिः मोह-कलिलं व्यतितरिष्यति, तदा श्रुतस्य श्रोतव्यस्य च निर्वेदं गन्तासि॥५२॥ | When your intellect crosses over the confusion that is delusion, then you will gain a dispassion for what has been heard and is yet to be heard [from the secular and spiritual marketers]. (**52**) |
| यदा श्रुति-विप्रतिपन्ना ते बुद्धिः निश्-चला स्थास्यति, समाधौ (=आत्मनि) अ-चला, तदा योगम् अवाप्स्यसि॥५३॥ | When your intellect—[previously] distracted by the श्रुति [i.e., the bulk of the वेद-s concerned with providing means for gaining heaven, power, wealth, and progeny]—becomes steady and centered on समाधि (your self), then you will attain योग. (**53**) |
| अर्जुनः उवाच। स्थित-प्रज्ञस्य समाधि-स्थस्य का भाषा, केशव। स्थित-धीः किं प्रभाषेत। किम् आसीत। किं व्रजेत॥५४॥ | अर्जुन said: What is the description of the स्थित-प्रज्ञ (one whose wisdom is firm), who is established within समाधि (the self), O कृष्ण? What would the स्थित-धी (one whose wisdom is firm) speak? How would that one sit? How would that one walk? [Would that one fight a war?] (**54**) |

श्रीभगवानुवाच।
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

---

| | |
|---|---|
| श्री-भगवान् उवाच।<br>पार्थ, यदा सर्वान् कामान् मनो-गतान् प्रजहाति, आत्मनि एव आत्मना (=बुद्ध्या) तुष्टः, तदा [सः] स्थित-प्रज्ञः उच्यते॥५५॥ | The Lord said:<br>O अर्जुन, when one abandons all desires [i.e., notional requirements in order to become happy] as they arise in the mind and is happy by oneself [i.e., by an informed intellect], in one's self alone, then that one is called a स्थित-प्रज्ञ (one whose wisdom is firm). (**55**) |
| दुःखेषु अन्-उद्विग्न-मनाः सुखेषु विगत-स्पृहः वीत-राग-भय-क्रोधः मुनिः स्थित-धीः उच्यते॥५६॥ | The one whose mind is not afflicted in adversities, who has no longing in pleasures, and who is free from राग (attraction), fear, and anger, [that] wise person is called स्थित-धी (one whose wisdom is firm). (**56**) |
| यः सर्वत्र अन्-अभिस्नेहः तद् तद् शुभ-अ-शुभं प्राप्य न अभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता॥५७॥ | The one who is unattached in all situations, who neither rejoices on getting anything pleasant, nor hates getting anything unpleasant—that one's wisdom is firm. (**57**) |

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

---

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

---

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

---

| | |
|---|---|
| यदा च अयं, कूर्मः अङ्गानि इव, इन्द्रिय-अर्थेभ्यः इन्द्रियाणि सर्वशः संहरते [संहर्तुम् अर्हति इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता॥५८॥ | When, like a turtle and its limbs, one is [at will] [able] to completely withdraw the senses from their sense pursuits [and again extend them out at will]—that one's wisdom is firm. (**58**) |
| निर्-आहारस्य देहिनः विषयाः रस-वर्जं विनिवर्तन्ते। परं दृष्ट्वा अस्य रसः अपि निवर्तते॥५९॥ | For the embodied one who does not feed [i.e., does not indulge the senses], the objects turn back [i.e., are not pursued], but the longing remains. Knowing the पर [i.e., ब्रह्मन्/reality], even one's longing ceases. (**59**) |
| कौन्तेय, विपश्चितः हि (=यस्मात्) पुरुषस्य यततः अपि, प्रमाथीनि इन्द्रियाणि मनः प्रसभं हरन्ति॥६०॥ | —Because, O अर्जुन, even though a discerning person puts forth effort, the distracting senses forcefully take away the mind. (**60**) |
| [यतः तस्मात्] तानि सर्वाणि [इन्द्रियाणि] संयम्य युक्तः मत्-परः आसीत। यस्य हि इन्द्रियाणि [संस्कृत-बुद्धेः see भ॰गी॰३.४२-३] वशे, तस्य प्रज्ञा प्रतिष्ठिता॥६१॥ | Mastering all those [senses], the one who is disciplined should remain with Me [the Lord, reality] as the पर (highest, the limitless). For the one whose senses are indeed under authority [of an informed intellect], wisdom is firm. (**61**) |

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

---

| | |
|---|---|
| विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते, सङ्गात् कामः सञ्जायते, कामात् क्रोधः अभिजायते, क्रोधात् सम्मोहः भवति, सम्मोहात् स्मृति-विभ्रमः [भवति], स्मृति-भ्रंशात् बुद्धि-नाशः [भवति], बुद्धि-नाशात् [पुमान्] प्रणश्यति॥ ६२–६३॥ | For a person who mentally dwells on objects, attachment to them arises; from attachment [allowed to flame up by one's value structure] arises [binding] desire [i.e., requirements (in order to be happy) and anticipations (of their fruition)]; from [thwarted] anticipations arises anger; from anger is delusion [i.e., error in judgment]; from delusion is lapse of memory [i.e., what has been taught]; from lapse of memory is lapse of intellect [i.e., wisdom]; from lapse of intellect [i.e., what distinguishes the human condition] the person is destroyed [i.e., the unique human opportunity to attain श्रेयस् is completely wasted, and the person remains in संसार/the life of becoming]. (**62–63**) |
| राग-द्वेष-वियुक्तैः तु आत्म-वश्यैः इन्द्रियैः विषयान् चरन्, विधेय-आत्मा (=वश्य-अन्तः-करणः) प्रसादम् (=शान्तिम्) अधिगच्छति॥ ६४॥ | —Whereas, moving among the objects with the senses under authority of the intellect and freed from [being overpowered by] राग-द्वेष (attraction and repulsion—*see* 3.34), the one whose mind is disciplined attains clarity. (**64**) |

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

---

| | |
|---|---|
| प्रसादे [सति] अस्य सर्व-दुःखानां हानिः उपजायते, प्रसन्न-चेतसः हि (=यस्मात्) बुद्धिः आशु पर्यवतिष्ठते॥ ६५॥ | When there is clarity, there comes the destruction of all one's sorrows [in the form of guilt and hurt] because, for the one whose mind is clear, the [self-]knowledge [which destroys the sorrow] quickly becomes firm. (**65**) |
| अ-युक्तस्य बुद्धिः न अस्ति, न च अ-युक्तस्य भावना (=धारणम्)। न च अ-भावयतः शान्तिः। अ-शान्तस्य कुतः सुखम्॥ ६६॥ | For the one who is not disciplined, knowledge is not there, nor contemplation. For the noncontemplative, there is no clarity. For the nonclear, how can there be [the appreciation of the] सुख (fulfillment that is the nature of the limitless self, known as I)? (**66**) |
| यद् मनः हि (=यस्मात्) चरताम् इन्द्रियाणाम् अनुविधीयते, तद् [मनः] अस्य प्रज्ञां हरति, वायुः अम्भसि नावम् इव [हरति]॥ ६७॥ | —Because, that very mind, which follows after the roaming senses, takes away one's wisdom, like a small boat on the water, which follows after the wind. (**67**) |

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

---

| | |
|---|---|
| महा-बाहो, तस्मात् यस्य इन्द्रियाणि इन्द्रिय-अर्थेभ्यः सर्वशः निगृहीतानि [निगृहीतुम् अर्ह्यन्ते इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥ | Therefore, O अर्जुन, the one whose senses [under authority of the intellect] are [or rather, are capable of being] completely withdrawn from the sense pursuits—that one has wisdom that is firm. (**68**) |
| या सर्व-भूतानां निशा [इव], तस्यां संयमी [मुनिः] जागर्ति। यस्यां भूतानि जाग्रति, सा [सद्-वस्तु] पश्यतः मुनेः निशा [इव] ॥ ६९ ॥ | What is [like] night for all beings—in that, the [wise who is] disciplined is awake. In what [it is that] beings are awake to, that is [like] night for the wise one who sees clearly [i.e., the wise are awake to सत्, reality, and others are only awake to what they believe is reality, but is असत्, unreal]. (**69**) |
| यद्वत् आपः आपूर्यमाणम् [स्वरूपतः] अ-चल-प्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत् सर्वे कामाः यं प्रविशन्ति — सः शान्तिम् आप्नोति, न काम-कामी ॥ ७० ॥ | Like the full and unmoved ocean into which the waters enter [their source being the ocean, yet its nature being unaffected by their variations], the one whom all objects of desire enter [yet remains the same in nature]—that one gains peace. Not [so] the one who requires/anticipates these objects [like a small pond requires its streams]. (**70**) |

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः॥ २॥

---

| | |
|---|---|
| सर्वान् कामान् विहाय, यः पुमान् निः-स्पृहः निर्-ममः निर्-अहङ्-कारः चरति, सः शान्तिम् अधिगच्छति॥ ७१॥ | Giving up all [binding] desires [i.e., requirements/anticipations], the person who moves about free from longing, free from [the judgment] "this is mine" and free from [the judgment] "I [am only this much]"—that [person] attains peace. (**71**) |
| एषा ब्राह्मी (=ब्रह्मणि अधिष्ठिता) स्थितिः, पार्थ। प्राप्य एनां, न विमुह्यति। अन्त-काले अपि अस्यां स्थित्वा ब्रह्म-निर्वाणम् ऋच्छति॥ ७२॥ | This is being firm in/as ब्रह्मन् (reality, सत्), O अर्जुन. Attaining this, one is not [any longer] deluded. Being firm in this, even just at the moment of death, one attains liberation in/as ब्रह्मन्. (**72**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे साङ्ख्य-योगः नाम द्वितीयः अध्यायः॥ २॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the second chapter, called "The Topic of Knowledge," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 3 कर्म- योग

## The Topic of Action

**कर्मन्** ***karman*** (*kár-man*) *n.* (*fr.* √कृ करणे do) क्रिया action, बन्धनम् एव कर्म action that binds; कर्तव्य duty; विधि enjoined action, ritual; कर्तव्य duty; कर्म-फल the result of action.

# Chapter 3 कर्म-योग

## The Topic of Action

In chapter 3, अर्जुन has a doubt: The उपनिषद् teachings say that the self does not do action, so, even if it is अर्जुन-'s duty, why and how should he undertake the action of this battle? Isn't सन्न्यास (*sannyāsa*, renunciation) alone the lifestyle extolled in the उपनिषद्-s? अर्जुन wonders: Even if कर्म-योग is an alternate lifestyle, कृष्ण has not said that it leads by itself to श्रेयस्. अर्जुन questions why कृष्ण is compelling him into gruesome action and wants to know, between the two lifestyles, which leads to श्रेयस्.

कृष्ण replies that, indeed, in the उपनिषद्-s, He taught that the two lifestyles lead to श्रेयस्, absolute freedom. But simply adopting either of these two lifestyles does not give मोक्ष (*mokṣa*, freedom). कृष्ण will clearly explain later, in chapter 4 (4.33–39), that it is knowledge that gives मोक्ष. In chapter 3, कृष्ण points out that both lifestyles are conducive to gaining and assimilating this knowledge. One cannot really be said to have gained this knowledge without having also assimilated it, because this knowledge is not information about some remote object, but instead is self-knowledge. However, if one is not mentally prepared for a life of renunciation, then it may prove to be useless. कर्म-योग is meant for preparing the mind for a life of renunciation, as well as for gaining and assimilating the knowledge. This is the order of the four stages of life: student, householder, retiree, renunciate. कृष्ण does not think अर्जुन, who had to this point dedicated his life to gaining the warrior's skills and weapons needed to take back the kingdom, is prepared for the quiet life of सन्न्यास. So, between the two lifestyles, कृष्ण recommends कर्म-योग to अर्जुन.

Even in the lifestyle of सन्न्यास, for one who does not have self-knowledge and thinks he or she is a doer, there is action. Therefore, one needs to understand why and how one should perform action. कृष्ण explains that the entire cosmos is interconnected. Helping one another, all beings thrive. The one who fights against this great cosmic wheel lives life in vain; whereas the one who follows this cosmic ecological system—with the goal of attaining the limitless—eventually attains the limitless. Action

done with this understanding is thus converted into a यज्ञ (*yajña*), a spiritual act, which makes it कर्म-योग. In particular for अर्जुन, because he is looked upon as a leader, he ought to enthusiastically perform his own duty as a यज्ञ, thus encouraging others to do the same—for the benefit of all. Even in सन्न्यास, action is done with the attitude of कर्म-योग.

But if the self does not do action, then what sense does it make to say one should perform action? कृष्ण answers this concern by explaining that, indeed, the self does not do physical or mental action. Rather, action is done by the body and mind. Action, along with the body and mind, belong to the sphere of nature, not to आत्मन्, the self. This body and mind is not one's personal creation. One must then renounce the ego's imagined ownership of actions, as well as the actions of the body and mind, relinquishing them to where they belong—unto the Lord's cosmic nature and order—and choose to perform duty as an offering to the whole. Such action alone will not bind one to disappointment, sorrow, and death. This is कर्म-योग, which develops one's विवेक and वैराग्य, discernment and dispassion.

# अथ तृतीयोऽध्यायः

अर्जुन उवाच।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ २ ॥

## Third Chapter

| | |
|---|---|
| अर्जुनः उवाच। जन-अर्दन, कर्मणः चेद् ज्यायसी बुद्धिः ते (=तव) मता, तद् किं घोरे कर्मणि मां नियोजयसि, केशव॥१॥ | अर्जुन said: O कृष्ण, if it is Your contention that knowledge is better than action, then why do You compel me into [this] gruesome action, O कृष्ण? (**1**) |
| व्यामिश्रेण इव वाक्येन मे बुद्धिं मोहयसि इव। तद् एकं निश्चित्य वद, येन अहं श्रेयः आप्नुयाम्॥२॥ | With apparently contradictory words, You seem to confuse my mind. Please decide on just one and tell [me] that [one] by which I may gain श्रेयस् (complete freedom). (**2**) |

श्रीभगवानुवाच।
लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ३ ॥

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

---

| | |
|---|---|
| श्री-भगवान् उवाच। अन्-अघ, अस्मिन् लोके पुरा मया द्वि-विधा निष्ठा प्रोक्ता, ज्ञान-योगेन साङ्ख्यानां कर्म-योगेन योगिनाम्॥ ३॥ | The Lord said: O अर्जुन, long ago in this world I taught [in the उपनिषद्-s] two different lifestyles—[one] through ज्ञान-योग (the means that is knowledge) for those dedicated to knowledge, [and the other] through कर्म-योग (the means that is duty) for योगिन्-s [i.e., those dedicated to duty as a means]. (**3**) |
| पुरुषः कर्मणाम् अन्-आरम्भात् नैष्कर्म्यं न अश्नुते, सन्न्यसनात् एव च सिद्धिं न समधिगच्छति॥ ४॥ | A person does not gain actionlessness [i.e., complete freedom] by not undertaking action, nor does one gain [this] success [i.e., complete freedom] merely by renunciation [i.e., taking the vow of सन्न्यास]. (**4**) |
| न हि (=यस्मात्) कश्-चिद् क्षणम् अपि जातु अ-कर्म-कृत् तिष्ठति। सर्वः हि (=यस्मात्) अ-वशः प्रकृति-जैः गुणैः कर्म कार्यते॥ ५॥ | —Because nobody ever remains, even for a second, without performing action. —Because everybody, being helpless, is made to perform action by the [modifications of the] three गुण-s (constituent principles of the universe) born of प्रकृति (nature). (**5**) |

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥ ८ ॥

| | |
|---|---|
| यः कर्म-इन्द्रियाणि संयम्य मनसा इन्द्रिय-अर्थान् स्मरन् आस्ते, सः विमूढ-आत्मा मिथ्या-आचारः उच्यते॥६॥ | The one who sits, restraining the organs of action, [yet] contemplating the sense objects with the mind—that one is called one whose mind is deluded and whose conduct is useless. [Such is the predicament of a renunciate not prepared for a contemplative lifestyle.] (**6**) |
| अर्जुन, यः तु इन्द्रियाणि मनसा नियम्य अ-सक्तः कर्म-इन्द्रियैः कर्म-योगम् आरभते, सः विशिष्यते॥७॥ | However, O अर्जुन, the one who rules the senses with the mind, is unattached [i.e., not anticipating results], who through the organs of action undertakes action as a योग (means for preparing for knowledge)—that one is better [than the deluded of useless conduct]. (**7**) |
| त्वं नियतं कर्म कुरु, कर्म हि अ-कर्मणः ज्यायः, अ-कर्मणः च ते शरीर-यात्रा अपि न प्रसिद्ध्येत्॥८॥ | You [अर्जुन, personally] should do your enjoined duty [rather than do nothing or try to take to a contemplative life of सन्न्यास], since duty is superior to inaction and, through inaction, even the maintenance of your body would be impossible. (**8**) |

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥ १० ॥

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ १२ ॥

| | |
|---|---|
| यज्ञ-अर्थात् कर्मणः अन्यत्र अयं लोकः कर्म-बन्धनः। कौन्तेय, मुक्त-सङ्गः तद्-अर्थं कर्म समाचर॥९॥ | A person (लोक) is one whose actions bind, apart from duty/action [performed] as a यज्ञ (act of worship). O अर्जुन, free from attachment [to the results of action], perform action for the sake of that [यज्ञ]. (**9**) |
| पुरा प्रजा-पतिः सह-यज्ञाः प्रजाः सृष्ट्वा उवाच — अनेन प्रसविष्यध्वम्, एषः वः इष्ट-काम-धुक् अस्तु॥१०॥ | In the beginning, the Lord of the universe manifested the people along with यज्ञ (worship) and said [through the वेद-s], "With this [यज्ञ] may all of you multiply. Let this [यज्ञ] be what yields all your desired results." (**10**) |
| देवान् अनेन भावयत, ते देवाः वः भावयन्तु, परस्-परं भावयन्तः परं श्रेयः अवाप्स्यथ॥११॥ | Support the deities [i.e., the Lord viewed through all the various aspects of nature] with this [यज्ञ]. May those deities support all of you. Supporting one another, all of you will attain limitless श्रेयस् [i.e., complete freedom—or heaven (if this is your ultimate goal)]. (**11**) |
| यज्ञ-भाविताः देवाः वः इष्टान् भोगान् हि दास्यन्ते। यः तैः दत्तान् एभ्यः अ-प्रदाय भुङ्क्ते, सः स्तेनः एव॥१२॥ | Supported through यज्ञ, the deities will give to all of you desired objects indeed. One who consumes [the objects] given by those [deities, the forces of nature] without offering to these [deities] is but a thief. (**12**) |

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥ १३ ॥

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥ १६ ॥

---

| | |
|---|---|
| यज्ञ-शिष्ट-अशिनः सन्तः सर्व-किल्बिषैः मुच्यन्ते। ये तु आत्म-कारणात् पचन्ति, ते पापाः अघं भुञ्जते॥१३॥ | Those who eat the food left after first offering to the Lord are freed from all transgressions; whereas those who cook only for themselves, those sinners, eat sin [i.e., karmic demerit]. (**13**) |
| अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्न-सम्भवः। यज्ञात् पर्जन्यः भवति। कर्म-समुद्भवः यज्ञः॥१४॥ | [All] creatures are born from food. Food is born from rain. Rain is born from यज्ञ [i.e., the karmic result of यज्ञ]. [That] यज्ञ is born from कर्मन् (action—ritual, prayer, duty, etc.). (**14**) |
| कर्म ब्रह्म-उद्भवं विद्धि, ब्रह्म (=वेद-शास्त्रम्) अ-क्षर-समुद्भवं [विद्धि]। तस्मात् सर्व-गतं ब्रह्म, नित्यं यज्ञे प्रतिष्ठितम्॥१५॥ | Know [that] कर्मन् is born from ब्रह्मन् (वेद), and the वेद comes from the imperishable [Lord]. Therefore [being given by the all-knowing Lord for all humankind], the वेद is all encompassing and is ever established in यज्ञ. (**15**) |
| पार्थ, यः एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति, अघ-आयुः इन्द्रिय-आरामः [च], सः मोघं जीवति॥१६॥ | O अर्जुन, the one who does not cause [oneself] to follow in this life the [cosmic] wheel thus set in motion, whose life is [thus mostly of] karmic demerit, and whose pleasure is through the senses—that one lives in vain. (**16**) |

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ १७ ॥

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥ २० ॥

| | |
|---|---|
| यः तु मानवः आत्म-रतिः एव, आत्म-तृप्तः च, आत्मनि एव च सन्तुष्टः स्यात्, तस्य कार्यं न विद्यते॥१७॥ | —Whereas, the person who would [find] pleasure within the self alone, be satisfied with the self, and be contented in the self alone—that one has nothing [yet] to be done. (**17**) |
| तस्य इह न एव कश्-चन अर्थः कृतेन, न अ-कृतेन [वा]। न च अस्य सर्व-भूतेषु कश्-चिद् अर्थ-व्यपाश्रयः॥१८॥ | For that [person] in this world, there is, indeed, no goal by doing, nor by not doing. Nor for that one is there any dependence for [any] thing toward any being. (**18**) |
| तस्मात् अ-सक्तः कार्यं कर्म सततं समाचर, अ-सक्तः हि (=यस्मात्) पूरुषः कर्म आचरन् परम् आप्नोति॥१९॥ | Therefore, unattached, please always perform what is to be done, because the person who is unattached [in attitude, then eventually in knowledge, while] performing action attains the limitless. (**19**) |
| कर्मणा [सह] एव हि जनक-आदयः संसिद्धिम् आस्थिताः। लोक-सङ्ग्रहम् एव सम्पश्यन् अपि कर्तुम् अर्हसि॥२०॥ | Indeed, [along] with performing [their] duties, [King] जनक and others attained complete freedom. Even considering just the rallying of the people [to the path of धर्म], you ought to act. (**20**) |

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ २३ ॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥ २४ ॥

---

| | |
|---|---|
| यद् यद् श्रेष्ठः आचरति तद् तद् एव इतरः जनः [आचरति]। यद् प्रमाणं सः कुरुते, तद् लोकः अनुवर्तते॥ २१॥ | Whatever an important person follows, that alone the other people [follow]. The example which that one sets, that the people follow. (**21**) |
| पार्थ, मे त्रिषु लोकेषु न किञ्-चन कर्तव्यम् अस्ति, न [किञ्-चन] अवाप्तव्यम् अन्-अवाप्तम्, कर्मणि एव च वर्ते॥ २२॥ | O अर्जुन, for me [as an individual who has this knowledge] there is nothing in the three worlds (earth, sky, and heaven) that must be done, nothing to be attained that has not been attained, [yet] I indeed engage in action. (**22**) |
| पार्थ, यदि हि अहम् अ-तन्द्रितः कर्मणि जातु न वर्तेयं, मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते॥ २३॥ | O अर्जुन, if indeed I [as कृष्ण, leader of द्वारका, thus an important person] were ever to not engage in action unwearied, [then] the people [would] follow my path in every way [including into lazy inaction]. (**23**) |
| अहं चेद् कर्म न कुर्याम् इमे लोकाः उत्सीदेयुः। सङ्करस्य कर्ता स्याम्, इमाः प्रजाः च उपहन्याम्॥ २४॥ | If I were not to perform action, these people would perish. I would become the author of [social] confusion, and I would [thus] destroy these people. (**24**) |

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद् विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥ २५ ॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥ २६ ॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥ २७ ॥

---

| | |
|---|---|
| भारत, कर्मणि सक्ताः अ-विद्वांसः यथा कुर्वन्ति, लोक-सङ्ग्रहं चिकीर्षुः अ-सक्तः विद्वान् तथा कुर्यात्॥ २५॥ | O अर्जुन, as [dedicatedly as] the unwise, who are bound to [the results of] action, engage in action, [so] the wise—unattached [i.e., not requiring/anticipating results] and desirous for rallying the people [to धर्म]—would likewise engage in action. (**25**) |
| अ-ज्ञानां कर्म-सङ्गिनां बुद्धि-भेदं न जनयेत्, विद्वान् युक्तः सर्व-कर्माणि समाचरन् [तान् अविदुषः] जोषयेत्॥ २६॥ | One should not sow dissension in the understanding of the unwise who are bound to [the results of] action. The wise one, who is committed [to धर्म] and [to] performing all duties, should encourage [the others]. (**26**) |
| प्रकृतेः गुणैः कर्माणि सर्वशः क्रियमाणानि। अहङ्-कार-विमूढ-आत्मा "अहं कर्ता" इति मन्यते॥ २७॥ | Actions are in all ways done by the गुण-s (constituent principles) of प्रकृति (nature). [But] one whose mind is confused—[in many and various ways] by a notion about "I"—thinks "I am the doer." (**27**) |

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८ ॥

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥

---

| | |
|---|---|
| महा-बाहो, गुण-कर्म-विभागयोः तत्त्व-विद् तु “गुणाः गुणेषु वर्त्तन्ते” इति मत्वा न सज्जते॥ २८॥ | —Whereas, O अर्जुन, the one who knows the truth of the distinction of the गुण-s [from “I”] and of [their] actions [from “I”], thinking, “the गुण-s [i.e., the body and mind] engage amongst the गुण-s [i.e., among the objects—physical and mental]”—that one is not bound. (**28**) |
| प्रकृतेः गुण-सम्मूढाः गुण-कर्मसु सज्जन्ते। तान् अ-कृत्स्न-विदः मन्दान् कृत्स्न-विद् न विचालयेत्॥ २९॥ | Those who confuse [themselves] with the गुण-s of nature are bound in the गुण-s and [their] actions. Lacking [this] discernment and of incomplete knowledge, they [are the ones that] one who has complete knowledge should not disturb. (**29**) |
| अधि-आत्म-चेतसा सर्वाणि कर्माणि मयि सन्न्यस्य निर्-आशीः निर्-ममः भूत्वा विगत-ज्वरः युध्यस्व॥ ३०॥ | With a mind centered on oneself [as the Lord, as the reality], renouncing all action in Me [the Lord—as प्रकृति, nature, the cosmic order], being free from anticipations, and free from [the judgment] “this is mine,” and without anguish, [O अर्जुन] fight. (**30**) |

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

| | |
|---|---|
| ये मानवाः श्रद्धावन्तः अन्-असूयन्तः मे इदं मतं नित्यम् अनुतिष्ठन्ति, ते अपि कर्मभिः मुच्यन्ते ॥ ३१ ॥ | Those people who have trust [in My teaching], who are not cynical and who constantly follow this, My teaching—they also [whether कर्म-योगिन्-s or सन्न्यासिन्-s] are freed from [the bond that is] कर्मन्. (**31**) |
| ये तु अभ्यसूयन्तः, मे एतद् मतं न अनुतिष्ठन्ति, तान् सर्व-ज्ञान-विमूढान् अ-चेतसः [च] नष्टान् विद्धि ॥ ३२ ॥ | —Whereas, those who are cynical, who do not follow this, My teaching, know them—who are [thus] variously confused in all [other areas of] knowledge [because they do not know who the "I" is] and lacking discernment—as lost. (**32**) |
| ज्ञानवान् अपि स्वस्याः प्रकृतेः स-दृशं चेष्टते। भूतानि प्रकृतिं यान्ति — निग्रहः किं करिष्यति ॥ ३३ ॥ | Even a wise person acts in keeping with his [or her] own nature. Creatures go [with their own] nature. What will [external behavioral] restraint accomplish? (**33**) |
| इन्द्रियस्य इन्द्रियस्य अर्थे राग-द्वेषौ व्यवस्थितौ, तयोः वशं न आगच्छेत्, तौ हि (=यस्मात्) अस्य परिपन्थिनौ ॥ ३४ ॥ | राग and द्वेष (attraction and repulsion) are [naturally] there toward the object of each of the senses. One should not come under their control, because those [two] are one's enemies [not the object, nor the resulting, natural behavior]. (**34**) |

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

---

अर्जुन उवाच।
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ ३६ ॥

---

श्रीभगवानुवाच।
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ ३७ ॥

---

| | |
|---|---|
| सु-अनुष्ठितात् पर-धर्मात् स्व-धर्मः वि-गुणः [अपि] श्रेयान्। स्व-धर्मे निधनं श्रेयः, [यस्मात्] भय-आवहः पर-धर्मः॥ ३५॥ | One's own duty, [though sometimes] lacking virtue, is better than a different duty, [even though] well performed [or more enjoyable]. Death in one's own duty is better; [as] a different duty brings fear [in the forms of conflict, regret, and retribution]. (**35**) |
| अर्जुनः उवाच। वार्ष्णेय, अथ केन प्रयुक्तः अयं पूरुषः अन्-इच्छन् अपि पापं चरति, बलात् इव नियोजितः॥ ३६॥ | अर्जुन said: O कृष्ण, now what compels a person—even though not choosing—to commit prohibited acts, as if pushed by force? (**36**) |
| श्री-भगवान् उवाच। एषः कामः एषः क्रोधः [च]। [एषः] रजो-गुण-समुद्भवः महा-अशनः महा-पाप्मा। इह एनं वैरिणं विद्धि॥ ३७॥ | The Lord said: [That seeming force is] this काम (binding desire—whether positive or negative, empowered attraction or repulsion) [and when thwarted] this anger. It [काम] is born of the रजस् गुण, is a glutton, and accumulates a lot of karmic demerit. Know it to be the enemy here. (**37**) |

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥

| | |
|---|---|
| यथा धूमेन वह्निः आव्रियते, यथा मलेन आदर्शः [आव्रियते], यथा च उल्बेन गर्भः आवृतः, तथा तेन इदम् [ज्ञानम्] आवृतम्॥ ३८॥ | Like fire is covered by smoke, like a mirror [covered] by dirt, and like a fetus covered by the womb, similarly, by that [काम] this [knowledge] is covered. [And that covering is removed by the breath of teaching, by the action of धर्म, and by time, respectively.] (**38**) |
| कौन्तेय, एतेन नित्य-वैरिणा काम-रूपेण दुष्-पूरेण अन्-अलेन च ज्ञानिनः ज्ञानम् आवृतम्॥ ३९॥ | O अर्जुन, by this constant enemy in the form of binding desire, insatiable [like] fire, the knowledge of the [one who is yet to be] wise is covered. (**39**) |
| अस्य अधिष्ठानम् इन्द्रियाणि मनः बुद्धिः [च] उच्यते। एषः [कामः] एतैः ज्ञानम् आवृत्य देहिनं विमोहयति॥ ४०॥ | Its [काम-'s] abode is said to be the senses, the mind, and the intellect. Covering knowledge through [misdirecting] these, this [काम] deludes the individual [i.e., the one identified with one's body]. (**40**) |
| भरत-ऋषभ, तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य, प्रजहि हि एनं पाप्मानं ज्ञान-विज्ञान-नाशनम्॥ ४१॥ | Therefore, O अर्जुन, exercising authority over the senses at [their] source, please indeed destroy this sinful destroyer of knowledge and of the assimilation [of that knowledge]. (**41**) |

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः॥ ३॥

| | |
|---|---|
| [अर्थेभ्यः] पराणि इन्द्रियाणि, इन्द्रियेभ्यः परं मनः, मनसः तु परा बुद्धिः, यः तु बुद्धेः परतः सः [परः आत्मा] [इति] आहुः॥ ४२॥ | They say that the senses are superior [to the body and all other objects], the mind is superior to the senses, the intellect is superior to the mind; whereas the one who is superior to the intellect is that [limitless self]. (**42**) |
| महा-बाहो, एवं बुद्धेः परं [आत्मानं] बुद्ध्वा, आत्मानम् आत्मना संस्तभ्य, काम-रूपं दुर्-आसदं शत्रुं जहि॥ ४३॥ | O अर्जुन, in this way [of] knowing [oneself] as superior to the intellect, steadying the one by the other one [steadying the senses by the mind, the mind by the intellect, and the intellect by self-knowledge], destroy the enemy in the form of काम, [otherwise so] difficult to get a fix on. (**43**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे कर्म-योगः नाम तृतीयः अध्यायः॥ ३॥ | ओं (ब्रह्मन्), the witness of all) is that [only] reality. Thus ends the third chapter, called "The Topic of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 4 ज्ञान-कर्म-सन्न्यास-योग

## The Topic of Knowledge and the Renunciation of Action

**ज्ञान** ***jñāna*** (*jñā-ana*) *n.* (*fr.* √ज्ञा अवबोधने know) बोद्ध knowing; विद्या knowledge, understanding.

# Chapter 4 ज्ञान-कर्म-सन्यास-योग

## The Topic of Knowledge and the Renunciation of Action

At the end of the third chapter, the Lord discloses the secret to overcoming काम (*kāma*, desire), which binds one helplessly to a life of unending need for becoming, called संसार. The secret, an elaboration of 2.58–68, is to control the intellect by self-knowledge—this is विवेक, discernment of the real from the unreal, the self from the nonself. With this informed intellect, one steadies the previously rudderless mind, which in turn controls the senses—this is वैराग्य, dispassion toward the present memories of the past, the present imaginations of the future, and the appearances in the present that one calls "me," "mine," and "not me," "not mine." By वैराग्य, the mind becomes free of its imagined entanglement in संसार, its imagined world of me/mine and not me/not mine, of likes and dislikes, aspirations and fears. Then the mind sees a natural world free of these projections. This relative freedom allows the mind to become clear. In this clear mind, the self-knowledge that destroys संसार quickly becomes firm (2.64–65).

At the beginning of chapter 4, कृष्ण concludes by extolling the lineage of the Vedanta teaching, starting from Himself. But अर्जुन does not let कृष्ण-'s teaching end there. अर्जुन asks how कृष्ण can say He taught this knowledge at the beginning of humankind. कृष्ण replies that He is speaking from the standpoint of the Lord. This embodiment, seated before अर्जुन, is a divine form acquired due to the natural need to rebalance धर्म and अधर्म in this world. कृष्ण says that His actions do not bind Him, nor is He the doer of these actions. कृष्ण explains that those who similarly perform action not backed by binding desire, and who know themselves as the actionless self, attain His nature. He explains that action is to be undertaken as a यज्ञ (3.9–30), a spiritual act for the benefit of the whole, as indeed कृष्ण-'s action is. कृष्ण then lists various types of यज्ञ-s that have been given in the वेद-s, saying that these actions, though considered spiritual, are produced by nature's body and mind alone. The one who knows one's self as not limited by the body and mind, which perform these actions, is thus free from their binding nature. By this knowledge, one will see all of nature's beings in Him and even in

oneself (4.35). This is called सर्वात्म-भाव (*sarvātma-bhāva*), appreciating oneself as the whole, free of divisions and their limitations. The Lord describes सर्वात्म-भाव as taking refuge in Him by being Him alone, attaining His nature (4.10, 2.72). This is अद्वैत (*advaita*, nonduality).

Gaining this knowledge is the goal of performing these यज्ञ-s for purity of mind. Knowledge is attained by surrender to a teacher within this teaching lineage who will teach you. कृष्ण then proceeds to praise this knowledge as the ultimate purifier. But it requires trust in this teaching as a valid means of knowledge. What blocks this teaching from blessing is not discerning the self from the nonself (i.e., lack of विवेक); due to a doubtful (cynical) mind that does not trust the teaching. This is important for every student to understand, so it is repeated throughout the Lord's teaching (3.31–32; 4.39–42; 5.25; 6.47; 7.1; 9.1, 9.3; 12.2, 12.20; and 18.10, 18.67, 18.71).

# अथ चतुर्थोऽध्यायः

श्रीभगवानुवाच।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

---

## Fourth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। अहं विवस्वते इमम् अ-व्ययं योगं प्रोक्तवान्। विवस्वान् मनवे प्राह। मनुः इक्ष्वाकवे अब्रवीत्॥१॥ | The Lord said: I taught this unchanging योग [i.e., ज्ञान-योग and कर्म-योग] to विवस्वत् [the sun deity—considered the progenitor of the solar-clan[3] of rulers on earth]. विवस्वत् taught [it to] मनु [the first human and first of the solar kings on earth in this कल्प, cycle]. मनु taught [it to] [his son] इक्ष्वाकु. (**1**) |
| एवं राज-ऋषयः परम्-परा-प्राप्तम् इमं [योगं] विदुः। इह सः योगः महता कालेन नष्टः, परन्-तप॥२॥ | In this way, being handed down from one to another, the kings who were sages [or the kings and sages] knew this [योग]. After a long time, here [today, among these kings], that योग has been lost, O अर्जुन. (**2**) |

---

[3] There were two prominent, ancient ruling clans in India. The solar clan (सूर्य-वंश), tracing their royal lineage from the sun deity, included राम in the middle of its long line of kings, with its many branches. The lunar clan (चन्द्र-वंश) traced its royal lineage from the moon deity. Two of the many branches of the lunar dynasty were the कुरु-वंश (inclusive of Prince अर्जुन) and the यदु-वंश (inclusive of कृष्ण).

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

अर्जुन उवाच।
अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

श्रीभगवानुवाच।
बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

---

| | |
|---|---|
| मया सः एव अयं पुरातनः योगः ते अद्य प्रोक्तः, मे भक्तः सखा च असि इति (=यस्मात्)। उत्तमं हि एतद् रहस्यम् [योगज्ञानम्] ॥ ३ ॥ | I just taught to you this very same ancient योग because you are My devotee and friend. This secret [teaching of योग] is the most profound indeed. (**3**) |
| अर्जुनः उवाच। भवतः जन्म अ-परं, विवस्वतः जन्म परम्। त्वम् आदौ प्रोक्तवान् इति — एतद् कथं विजानीयाम् ॥ ४ ॥ | अर्जुन said: Your birth was not long ago; विवस्वत्-'s birth was long ago. How should I understand that You taught [विवस्वत्] in the beginning? (**4**) |
| श्री-भगवान् उवाच। मे तव च बहूनि जन्मानि व्यतीतानि, अर्जुन। अहं तानि सर्वाणि वेद, त्वं न वेत्थ, परन्-तप ॥ ५ ॥ | The Lord said: Many births have passed for Me and for you, O अर्जुन. I know them all; you do not, O अर्जुन. (**5**) |

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

---

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

---

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

---

| | |
|---|---|
| अ-जः अपि सन् अ-व्यय-आत्मा [सन्] भूतानाम् ईश्वरः अपि सन् स्वां प्रकृतिम् अधिष्ठाय आत्म-मायया सम्भवामि॥ ६॥ | Though unborn, undiminished, and the Lord of [all] beings, wielding My प्रकृति (the projecting power of the Lord, which manifests as all of nature), I [as an incarnate form] am [as though] born by My own माया (projecting power; i.e., प्रकृति). (**6**) |
| भारत, यदा यदा हि धर्मस्य ग्लानिः अ-धर्मस्य [च] अभ्युत्थानं भवति, तदा अहम् आत्मानं सृजामि॥ ७॥ | O अर्जुन, whenever indeed there is a wane of धर्म and an ascendancy of अधर्म, then I manifest Myself. [In पुराण literature, for example, the Lord manifests as an aquatic being (a fish), an amphibious being (a turtle), a terrestrial being (a boar), a man of धर्म (Lord राम). And in the भगवद् गीता, the Lord manifests as a teacher of this योग (as Lord कृष्ण)]. (**7**) |
| साधूनां परित्राणाय, दुष्-कृतां विनाशाय, धर्म-संस्थापन-अर्थाय च युगे युगे सम्भवामि॥ ८॥ | I appear in every युग (the various ages within the cycles of the universe) for the protection of those committed to धर्म, for the destruction of those committed to अधर्म (what is opposed to धर्म), and for the [re-]establishment of धर्म. (**8**) |

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

---

| | |
|---|---|
| यः एवं मे दिव्यं जन्म कर्म च तत्त्वतः वेत्ति, सः देहं त्यक्त्वा पुनः जन्म न एति। माम् एति, अर्जुन॥९॥ | The one who thus knows in reality My divine birth and action [i.e., knows the nature of Me and प्रकृति]—that one, upon giving up the body, is not reborn. [That one] attains Me, O अर्जुन. (**9**) |
| वीत-राग-भय-क्रोधाः, मन्मयाः माम् उपाश्रिताः, ज्ञान-तपसा पूताः — बहवः मद्-भावम् आगताः॥१०॥ | Freed from longing, fear, and anger, having taken refuge in Me [by] being Me alone, and purified by the discipline that is knowledge—many have attained My nature [i.e., complete freedom]. (**10**) |
| यथा ये मां प्रपद्यन्ते, तथा एव अहं तान् भजामि। पार्थ, मनुष्याः मम वर्त्म सर्वशः अनुवर्तन्ते॥११॥ | In which[ever] way the [people] worship Me, in that very same way I bless them. O अर्जुन, people follow My path in every way. (**11**) |
| कर्मणां सिद्धिं काङ्क्षन्तः इह [बहवः मनुष्याः] देवताः [प्रति] यजन्ते, मानुषे लोके हि (=यस्मात्) कर्म-जा सिद्धिः क्षिप्रं भवति॥१२॥ | Desiring a result of action here, [many] worship the deities—because in the human world a result born of action comes quickly. (**12**) |

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

| | |
|---|---|
| मया गुण-कर्म-विभागशः चातुर्-वर्ण्यं सृष्टम्। तस्य कर्तारम् अपि, माम् अ-व्ययम् अ-कर्तारं विद्धि॥१३॥ | I manifested the four-fold वर्ण (grouping within society—educators, administrators, entrepreneurs, and laborers) according to the divisions of गुण (mental disposition) and कर्मन् (duty). Though its author, know Me to be changeless and not a doer. (**13**) |
| कर्माणि मां न लिम्पन्ति, मे न कर्म-फले स्पृहा। इति यः माम् अभिजानाति, सः कर्मभिः न बध्यते॥१४॥ | Actions do not affect Me, nor do I have longing toward the result of action. The one who knows Me thus, that one is not bound by actions. (**14**) |
| एवं ज्ञात्वा पूर्वैः मुमुक्षुभिः अपि कर्म कृतम्। तस्मात् त्वं पूर्वैः पूर्वतरं कृतं [एवं] कर्म एव कुरु॥१५॥ | Knowing [Me] in this way, even previous desirers of complete freedom performed [their] duty. Therefore, you [also] perform [your] duty, [as] the previous ones did before. (**15**) |
| किं कर्म किम् अ-कर्म इति अत्र कवयः अपि मोहिताः। यद् ज्ञात्वा अ-शुभात् मोक्ष्यते, तद् कर्म ते प्रवक्ष्यामि॥१६॥ | What is action? What is inaction? Regarding this, even the [so-called] wise are confused. I will teach you about that action, knowing which one is freed from the unpleasant [life of becoming; i.e., from संसार]. (**16**) |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| कर्मणो | ह्यपि | बोद्धव्यं | बोद्धव्यं | च | विकर्मणः । | | |
| अकर्मणश्च | बोद्धव्यं | गहना | कर्मणो | गतिः ॥ | | १७ | ॥ |
| कर्मण्यकर्म | यः | पश्येदकर्मणि | च | कर्म | यः । | | |
| स | बुद्धिमान्मनुष्येषु | स | युक्तः | कृत्स्नकर्मकृत् ॥ | | १८ | ॥ |
| यस्य | सर्वे | समारम्भाः | कामसङ्कल्पवर्जिताः । | | | | |
| ज्ञानाग्निदग्धकर्माणं | तमाहुः | पण्डितं | बुधाः ॥ | | | १९ | ॥ |
| त्यक्त्वा | कर्मफलासङ्गं | नित्यतृप्तो | निराश्रयः । | | | | |
| कर्मण्यभिप्रवृत्तोऽपि | नैव | किञ्चित्करोति | सः ॥ | | | २० | ॥ |

---

| | |
|---|---|
| कर्मणः हि (=यस्मात्) अपि बोद्धव्यं, वि-कर्मणः च बोद्धव्यम्, अ-कर्मणः च बोद्धव्यं। गहना कर्मणः गतिः ॥१७॥ | —Because what is to be known is also about [enjoined] action, about prohibited action, and about inaction. The nature of action is difficult to know. (**17**) |
| यः कर्मणि अ-कर्म पश्येत्, यः च अ-कर्मणि कर्म [पश्येत्], सः मनुष्येषु बुद्धिमान्। सः युक्तः कृत्स्न-कर्म-कृत् [च] ॥१८॥ | The one who can see inaction [i.e., actionlessness] in action, and action in inaction [i.e., in not doing one's duty]—that one is wise among people. That one is युक्त [i.e., a योगिन्] and has accomplished everything that is [essential] to be done. (**18**) |
| यस्य सर्वे समारम्भाः काम-सङ्कल्प-वर्जिताः, तं ज्ञान-अग्नि-दग्ध-कर्माणं बुधाः पण्डितम् आहुः ॥१९॥ | Whose every activity is free from काम (requiring and anticipating) and [its cause] सङ्कल्प (scheming for the future), that one—whose [accumulated] कर्मन्-s are burned up by the fire that is knowledge [like toasted seeds unable to sprout]—the sages call wise. (**19**) |
| कर्म-फल-आसङ्गं त्यक्त्वा, नित्य-तृप्तः, निर्-आश्रयः, सः कर्मणि अभिप्रवृत्तः अपि किञ्-चिद् एव न करोति ॥२०॥ | Giving up identification with actions and attachment to results, always contented, without dependence [on anything], that one—though fully engaged in action—does not [in reality] do anything [i.e., is truly actionless]. (**20**) |

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

| | |
|---|---|
| निर्-आशीः, यत-चित-आत्मा, त्यक्त-सर्व-परिग्रहः, केवलं शारीरं कर्म कुर्वन्, [सः] किल्बिषं न आप्नोति॥ २१॥ | Free from fancies [of the future], by whom the body and mind are mastered, who has disowned every possession, doing action only for sustaining the body, that [सन्न्यासिन्, renunciate] incurs no fault [i.e., no binding karmic merit or demerit]. (**21**) |
| यदृच्छा-लाभ-सन्तुष्टः, द्वन्-द्व-अतीतः, वि-मत्सरः, सिद्धौ अ-सिद्धौ च समः, [सः] कृत्वा अपि न निबध्यते॥ २२॥ | Satisfied with whatever happens [unasked], [whose mind is] unaffected by the [natural] pairs of opposites, free of repulsion [on account of another's virtue or prosperity], and equanimous in success or failure, [that one]—though engaged in action—is not bound. (**22**) |
| गत-सङ्गस्य मुक्तस्य ज्ञान-अवस्थित-चेतसः यज्ञाय आचरतः समग्रं कर्म प्रविलीयते॥ २३॥ | For the one who is without attachment, who is free, whose mind is rooted in [self-]knowledge, and who acts for the sake of यज्ञ, all कर्मन् [along with its pending results] dissolves. (**23**) |
| ब्रह्म अर्पणं। ब्रह्म हविः ब्रह्म-अग्नौ ब्रह्मणा हुतं। तेन ब्रह्म-कर्म-समाधिना ब्रह्म एव गन्तव्यम्॥ २४॥ | The instrument for offering is ब्रह्मन् (reality, the limitless self). The oblation is ब्रह्मन्, offered by ब्रह्मन् into the fire that is ब्रह्मन्. ब्रह्मन् indeed is to be attained by the one whose vision of identity is that [every aspect of] action is ब्रह्मन्. (**24**) |

| | | | | |
|---|---|---|---|---|
| दैवमेवापरे | यज्ञं | योगिनः | पर्युपासते । | |
| ब्रह्माग्नावपरे | यज्ञं | यज्ञेनैवोपजुह्वति ॥ | | २५ ॥ |
| श्रोत्रादीनीन्द्रियाण्यन्ये | संयमाग्निषु | जुह्वति । | | |
| शब्दादीन्विषयानन्य | इन्द्रियाग्निषु | जुह्वति ॥ | | २६ ॥ |
| सर्वाणीन्द्रियकर्माणि | प्राणकर्माणि | चापरे । | | |
| आत्मसंयमयोगाग्नौ | जुह्वति | ज्ञानदीपिते ॥ | | २७ ॥ |
| द्रव्ययज्ञास्तपोयज्ञा | | योगयज्ञास्तथापरे । | | |
| स्वाध्यायज्ञानयज्ञाश्च | यतयः | संशितव्रताः ॥ | | २८ ॥ |

| | |
|---|---|
| अपरे योगिनः दैवम् एव यज्ञं पर्युपासते। अपरे ब्रह्म-अग्नौ यज्ञं (=ब्रह्म-आत्मानं) यज्ञेन (=ब्रह्म-आत्मना) एव उपजुह्वति॥ २५॥ | Some [कर्म-] योगिन्-s perform यज्ञ only for invoking [the Lord in the form of] a deity. Others [who are सन्न्यासिन्-s, who have given up entitlement to ritual] offer यज्ञ [as themselves] by यज्ञ [as themselves] into the fire [i.e., knowledge] that is ब्रह्मन्. (**25**) |
| अन्ये संयम-अग्निषु श्रोत्र-आदीनि इन्द्रियाणि जुह्वति। अन्ये इन्द्रिय-अग्निषु शब्द-आदीन् विषयान् जुह्वति॥ २६॥ | Others offer [their] sense organs—such as hearing, etc.—into the fires that are the mastery [over each of the senses]. Others [deliberately] offer sense objects—such as [only proper] sound, etc.—into the fires that are the senses [themselves]. (**26**) |
| अपरे सर्वाणि इन्द्रिय-कर्माणि प्राण-कर्माणि च ज्ञान-दीपिते आत्म-संयम-योग-अग्नौ जुह्वति॥ २७॥ | Others offer all activities of the organs and activities of the vital energies into the fire, lit by knowledge, that is the discipline consisting of mastery over oneself [the body-mind complex]. (**27**) |
| तथा अपरे द्रव्य-यज्ञाः, तपो-यज्ञाः, योग-यज्ञाः, स्व-अध्याय-ज्ञान-यज्ञाः च संशित-व्रताः यतयः॥ २८॥ | So too are those others who [distribute] wealth as a यज्ञ, those for whom prayerful discipline is the यज्ञ, those whose [very] योग practices are the यज्ञ, and those of firm vows and efforts who recite and/or who study the meaning [of the वेद] as a यज्ञ. (**28**) |

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

---

| | |
|---|---|
| तथा अपरे प्राण-आयाम-परायणाः प्राण-अपान-गती रुद्ध्वा अपाने प्राणं प्राणे अपानं [च] जुह्वति॥ २९॥ | So too, others whose ultimate end is the practice of breath control—stopping the flow of exhalation and inhalation—they [thus] offer [as a discipline] the outgoing breath into the ingoing breath and the ingoing breath into the outgoing breath. (**29**) |
| अपरे नियत-आहाराः प्राणेषु प्राणान् जुह्वति। सर्वे अपि एते यज्ञ-विदः यज्ञ-क्षपित-कल्मषाः [सन्ति]॥ ३०॥ | Others, whose food [consumption] is regulated, offer [their] प्राण-s (energies) into the प्राण-s (digestive fires). All of those [preceding] who have an attitude of worship [during their activities] have [to that extent] their impurities [that obstruct self-knowledge] destroyed by यज्ञ. (**30**) |
| यज्ञ-शिष्ट-अ-मृत-भुजः सनातनं ब्रह्म यान्ति। अ-यज्ञस्य अयं लोकः न अस्ति, अन्यः कुतः, कुरु-सत्तम॥ ३१॥ | Those who [seek ब्रह्मन् and] partake of the offering [made] immortal after यज्ञ [eventually] attain [in knowledge] the ever existent ब्रह्मन् (reality). This [human] world is not there for [the benefit of] one without यज्ञ, much less another world [where effort is not available], O अर्जुन. (**31**) |

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

---

| | |
|---|---|
| एवं ब्रह्मणः मुखे (=वेदशब्दे) बहु-विधाः यज्ञाः वितताः। तान् सर्वान् कर्म-जान् विद्धि। एवं ज्ञात्वा विमोक्ष्यसे॥ ३२॥ | In this manner, there are many and various यज्ञ-s elaborated in the words of the वेद. Know all of them to be produced by [त्रैगुण्य-] कर्मन् [not by आत्मन्, oneself]. With this understanding, you will be freed [from their otherwise binding nature]. (**32**) |
| द्रव्यमयात् यज्ञात् ज्ञान-यज्ञः श्रेयान्, परन्-तप। पार्थ, सर्वम् अ-खिलं कर्म ज्ञाने परिसमाप्यते॥ ३३॥ | यज्ञ consisting of knowledge is superior to यज्ञ consisting of materials [and action], O अर्जुन. O अर्जुन, all action in its entirety is culminated in knowledge [i.e., as various means to the end—action should be undertaken for gaining a mind that can gain this knowledge]. (**33**) |
| प्रणिपातेन परिप्रश्नेन सेवया तद् [ज्ञानं] विद्धि। ज्ञानिनः तत्त्व-दर्शिनः ते ज्ञानम् उपदेक्ष्यन्ति॥ ३४॥ | Understand that [knowledge] by surrender [to the feet of the teacher; i.e., with an attitude of acceptance of the teacher as a source of knowledge], by inquiry, and by service [to the teacher—as traditionally no tuition is charged during the study], the wise—who have the vision of the truth—will teach you [this] knowledge. (**34**) |

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

यथैधाांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

---

| | |
|---|---|
| यद् ज्ञात्वा न पुनः एवं मोहं यास्यसि, पाण्डव। येन अ-शेषेण भूतानि आत्मनि अथ-उ मयि द्रक्ष्यसि॥ ३५॥ | Understanding this [knowledge], you will not again in this way become deluded, O अर्जुन. By this [knowledge] you will see all beings in Me and even in yourself. (**35**) |
| अपि चेद् सर्वेभ्यः पापेभ्यः पाप-कृत्तमः असि, ज्ञान-प्लवेन एव सर्वं वृजिनं (=पापं) सन्तरिष्यसि॥ ३६॥ | Even if you are one who has done sins worse than any sinner, by the raft that is knowledge alone you will cross over all [forms of] karmic demerit. (**36**) |
| अर्जुन, यथा समिद्धः अग्निः एधांसि भस्म-सात् कुरुते, तथा ज्ञान-अग्निः सर्व-कर्माणि भस्म-सात् कुरुते॥ ३७॥ | O अर्जुन, just as a well-ignited fire reduces logs to ashes, so [this] fire that is knowledge reduces all कर्मन्-s [i.e., all कर्म-फल-s waiting to fructify in the जीव-'s (individual's) karmic account] to ashes. (**37**) |
| इह हि ज्ञानेन सदृशं पवित्रं न विद्यते। कालेन योग-संसिद्धः आत्मनि स्वयं तद् [ज्ञानं] विन्दति॥ ३८॥ | In this world, indeed, there is no purifier equal to knowledge. In time, the one who is prepared by [कर्म-] योग [and has a proper teacher] gains that [knowledge] easily in [one's prepared] mind. (**38**) |

श्रद्धावाल्लँभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

---

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

---

योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥

---

| | |
|---|---|
| श्रद्धावान् तत्-परः संयत-इन्द्रियः ज्ञानं लभते। ज्ञानं लब्ध्वा परां शान्तिम् अ-चिरेण अधिगच्छति॥ ३९॥ | One who has trust [in this teaching as a valid means of knowledge], for whom that [knowledge] is the ultimate, and whose senses are mastered [by कर्म-योग]—that one attains knowledge. Having gained knowledge, one immediately attains limitless peace. (**39**) |
| अ-ज्ञः च अ-श्रद्-दधानः च संशय-आत्मा [च] विनश्यति। संशय-आत्मनः अयं लोकः न अस्ति, न परः, न सुखम्॥ ४०॥ | The nondiscerning, having no trust, whose mind is [full] of doubts—that one perishes [i.e., remains in संसार (the life of becoming)]. For the one whose mind is [full] of doubts, this world is not there, nor the next, nor is there [any] happiness [because of constant doubts]. (**40**) |
| कर्माणि योग-सन्न्यस्त-कर्माणं ज्ञान-सञ्छिन्न-संशयम् आत्मवन्तं न निबध्नन्ति, धनञ्-जय॥ ४१॥ | Actions do not bind the one who has renounced कर्मन् through [ज्ञान-] योग [even though engaged in activity], whose doubt has been completely severed by knowledge, and who is attentive [i.e., whose vision of reality is never lost], O अर्जुन. (**41**) |

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

---

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥४॥

---

| | |
|---|---|
| तस्मात् ज्ञान-असिना अ-ज्ञान-सम्भूतं हृत्-स्थम् एनम् आत्मनः संशयं छित्त्वा, योगम् आतिष्ठ, उत्तिष्ठ [च], भारत॥४२॥ | Therefore, severing with the sword that is knowledge this doubt about yourself [initially in regard to one's duty, later in regard to the आत्मन्] rooted in the intellect and born of a lack of discernment, commit to [कर्म-] योग and get up, O अर्जुन! (**42**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ज्ञान-कर्म-सन्न्यास-योगः नाम चतुर्थः अध्यायः॥४॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fourth chapter, called "The Topic of Knowledge and the Renunciation of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 5 सन्न्यास-योग

## The Topic of Renunciation of Action

**सन्न्यास** ***sannyāsa*** (*san-ny-ās-a*) *m.* (*fr.* √अस् क्षेपणे cast, throw) त्याग renunciation.

# Chapter 5 सन्न्यास-योग

## The Topic of Renunciation of Action

In chapter 5, अर्जुन asks कृष्ण to clarify the distinction between the सन्न्यास and कर्म-योग lifestyles and which one would be better for him. The Lord replies that an essential element of both lifestyles is renunciation. He explains that the candidate for सन्न्यास lifestyle already has a certain mastery in renunciation; otherwise that lifestyle would be difficult—just as He said earlier, in the third chapter (3.6), that सन्न्यास is useless for one without mental discipline. On the other hand, कर्म-योग prepares the mind for the renunciation required in a life of सन्न्यास. The distinction between the two lifestyles involves the qualification of the candidate regarding his or her degree of mastery in renunciation. कृष्ण, for this reason, again recommends कर्म-योग for अर्जुन. The degree of renunciation required for सन्न्यास is such that if one has to ask whether one is ready for it, then one is probably not ready for it. However, because the sole purpose of both सन्न्यास and कर्म-योग is the श्रेयस् that is मोक्ष, in this there is no difference between them. Because knowledge liberates and the pursuit of knowledge is in both lifestyles, both lead to मोक्ष. Perfect renunciation is simply the assimilated knowledge that the self does not, in fact, do action. This can be realized within either lifestyle.

कृष्ण then goes on to say that this knowledge culminates in oneself being ब्रह्मन्, the limitless reality. There is no rebirth for such a person because there is no longer a distinct individuality that owns a history burdened with yet-to-fructify कर्मन् (*karman*, results of action). The one with this culmination of knowledge has attained a fulfillment that does not wane. Until this assimilation of the knowledge—with its appreciation of this fulfillment—is complete, one must make proper efforts to free the mind from requirements, anticipations, and anger. One should make effort to master the mind so that one can gain this knowledge. For this, meditation and contemplation are proper means, within both सन्न्यास and कर्म-योग lifestyles. At the end of this chapter, कृष्ण introduces the topic of meditation and contemplation, which is taken up in greater detail in chapter 6.

There is a difference between meditation and contemplation. Meditation, ध्यान (*dhyāna*), is the employment of techniques for mastering the mind and is mental worship of the Lord, or prayer. Contemplation, also called ध्यान—or more specifically called निदिध्यासन (*nididhyāsana*), is seeing the truth of the teaching in order to remove obstacles to assimilating it. Meditation is preliminary and prepares the mind to remain in contemplation of the teaching. Meditation happens in the seat of meditation; whereas contemplation happens both in the seat of meditation and during the rest of one's time. We can meditate even before we hear this teaching. Contemplation requires that we have heard and are clear on the teaching being contemplated. Assimilation of this teaching, of this knowledge, requires contemplation—or at least a contemplative mind.

# अथ पञ्चमोऽध्यायः

अर्जुन उवाच।
सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

---

श्रीभगवानुवाच।
सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

---

ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

---

## Fifth Chapter

| | |
|---|---|
| अर्जुनः उवाच।<br>कृष्ण, कर्मणां सन्न्यासं पुनः योगं च शंससि। एतयोः यद् श्रेयः तद् एकं मे सु-निश्चितं ब्रूहि॥१॥ | अर्जुन said:<br>O कृष्ण, You praise the renunciation of action and also [कर्म-] योग. Of these two, please tell me definitely that one which is better [for me]. (**1**) |
| श्री-भगवान् उवाच।<br>सन्न्यासः कर्म-योगः च उभौ निःश्रेयस-करौ। तयोः तु कर्म-सन्न्यासात् कर्म-योगः विशिष्यते॥२॥ | The Lord said:<br>Both [lifestyles of] सन्न्यास and कर्म-योग lead to complete freedom. But, of the two, कर्म-योग is better than renunciation of action [for you, अर्जुन]. (**2**) |
| यः न द्वेष्टि न काङ्क्षति, सः नित्य-सन्न्यासी ज्ञेयः। महा-बाहो, निर्-द्वन्-द्वः हि (=यस्मात्) बन्धात् सुखं प्रमुच्यते॥३॥ | The one who neither hates nor longs [for anything] should be known as always a सन्न्यासिन् (renunciate) [no matter which lifestyle]. Because, O अर्जुन, being free from [the hold of] the opposites [i.e., राग and द्वेष], one is effortlessly freed from bondage. (**3**) |

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

| | |
|---|---|
| बालाः साङ्ख्य-योगौ पृथक् प्रवदन्ति, न पण्डिताः। एकम् अपि सम्यक् आस्थितः उभयोः फलं विन्दते॥४॥ | Children [i.e., the nondiscerning], not the wise, claim that साङ्ख्य [i.e., सन्न्यास, renunciation] and [कर्म-] योग are different. One who has completely followed just one [of the two lifestyles] attains the result of both. (**4**) |
| साङ्ख्यैः यद् स्थानं प्राप्यते, योगैः अपि तद् गम्यते। यः साङ्ख्यं च योगं च एकं पश्यति, सः पश्यति॥५॥ | The status [i.e., मोक्ष, complete freedom] that is gained by those who follow renunciation is also gained by those who follow [कर्म-] योग. One [really] sees, who sees that साङ्ख्य (renunciation) and [कर्म-] योग are one. (**5**) |
| महा-बाहो, अ-योगतः तु सन्न्यासः दुःखम् आप्तुम्। योग-युक्तः मुनिः न-चिरेण ब्रह्म अधिगच्छति॥६॥ | Whereas, O अर्जुन, without [first following] [कर्म-] योग, सन्न्यास [as renunciation or as a lifestyle] is difficult to accomplish. The मुनि (one who is contemplative) who has been prepared through [कर्म-] योग [in this life and/or prior lives] in no time attains ब्रह्मन्. (**6**) |
| योग-युक्तः विशुद्ध-आत्मा विजित-आत्मा जित-इन्द्रियः सर्व-भूत-आत्म-भूत-आत्मा कुर्वन् अपि न लिप्यते॥७॥ | Prepared by [कर्म-] योग, [thus] whose character is without defect, who has discipline over the body, who has mastered the senses, and [finally] whose self [is known] as the self of all beings—though performing action, that one is not affected. (**7**) |

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन् गच्छन्स्वपञ्श्वसन् ॥ ८ ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन् निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ ११ ॥

| | |
|---|---|
| इन्द्रियाणि इन्द्रिय-अर्थेषु वर्तन्ते इति धारयन् युक्तः तत्त्व-विद् — पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि — न एव किञ्-चिद् करोमि इति मन्येत॥ ८–९॥ | The contemplative knower of the truth, maintaining that the organs [of sense and action] engage in their objects, would think "I do not do anything," even though seeing, hearing, touching, smelling, eating, moving, sleeping, breathing, talking, releasing, grasping, [or] opening and closing [the eyes]. [This is the exact meaning of कर्म-सन्न्यास (renunciation of action; i.e., renunciation of doership/ enjoyership in action). This is the goal of कर्म-योग and the achievement of one who would take to the lifestyle of सन्न्यास.] (**8–9**) |
| यः सङ्गं त्यक्त्वा कर्माणि ब्रह्मणि आधाय करोति, सः पद्म-पत्रम् अम्भसा इव पापेन न लिप्यते॥ १०॥ | Giving up attachment [i.e., not anticipating results], the one who performs actions, offering [them] unto ब्रह्मन् (the Lord—as प्रकृति, nature, the cosmic order)—that one is not affected by पाप (karmic demerit), like a lotus leaf [is not soaked] by water. (**10**) |
| योगिनः सङ्गं त्यक्त्वा आत्म-शुद्धये केवलैः कायेन मनसा बुद्ध्या इन्द्रियैः अपि कर्म कुर्वन्ति॥ ११॥ | Giving up attachment, the [कर्म-] योगिन्-s perform action with [their] body, mind, intellect, and senses only [not by "I"], for आत्म-शुद्धि (transparency, clarity of character, mind). (**11**) |

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

---

| | |
|---|---|
| युक्तः कर्म-फलं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति। अ-युक्तः काम-कारेण फले सक्तः निबध्यते॥१२॥ | Giving up [अधिकारत्व, the notion of control over] the result of action, the युक्त [i.e., कर्म-योगिन्] attains a peace born of [the degree of] commitment; [whereas] not [committed to] कर्म-योग, attached to result(s) by the pressure of requirements, that one is bound. (**12**) |
| वशी देही मनसा सर्व-कर्माणि सन्न्यस्य न एव कुर्वन् न कारयन् नव-द्वारे पुरे सुखम् आस्ते॥१३॥ | The embodied one who has self-control—renouncing all actions through the mind [i.e., by knowledge, not by bodily inaction]—remains happy within the nine-gated city [i.e., the body with its nine apertures], neither doing nor causing activity. (**13**) |
| प्रभुः लोकस्य न कर्तृत्वं न कर्माणि न कर्म-फल-संयोगं सृजति स्व-भावः तु प्रवर्तते॥१४॥ | The master [of the nine-gated city; i.e., आत्मन्] effects neither doership nor actions for the person, nor connection with [i.e., attainment of] the results of action; whereas स्व-भाव (the person's constitution, the complex of the गुण-s) engages [in action]. (**14**) |

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

---

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

---

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

---

| | |
|---|---|
| विभुः कस्य-चिद् न पापं न च एव सु-कृतम् आदत्ते। अ-ज्ञानेन ज्ञानम् आवृतं, तेन जन्तवः मुह्यन्ति॥१५॥ | The locationless [आत्मन्, self] takes on neither the karmic demerit nor merit of anyone [whether of a ज्ञानिन्, a कर्म-योगिन् or a non-कर्म-योगिन्]. Knowledge is covered by ignorance and, because of that, individuals are deluded [thinking, "I have merit or demerit."]. (**15**) |
| येषां तु आत्मनः ज्ञानेन तद् अ-ज्ञानं नाशितं, तेषां ज्ञानम् आदित्यवत् तद् परं प्रकाशयति॥१६॥ | —Whereas, for those whose very ignorance is destroyed by knowledge of the self, [this] knowledge, like the sun, reveals [the fact that their self-evident self is] that limitless [ब्रह्मन्, reality]. (**16**) |
| तद्-बुद्धयः तद्-आत्मानः तन्-निष्ठाः तत्-पर-अयणाः ज्ञान-निर्धूत-कल्मषाः अ-पुनर्-आवृत्तिं गच्छन्ति॥१७॥ | Those whose intellect [i.e., knowledge] has attained that [ब्रह्मन्], whose self is [recognized as] that [ब्रह्मन्], whose commitment is in that [ब्रह्मन्], having that [ब्रह्मन्] as the ultimate end, and whose impurities have been shaken off by knowledge—gain no rebirth. (**17**) |

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ १९ ॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥

| | |
|---|---|
| विद्या-विनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्व-पाके च एव सम-दर्शिनः पण्डिताः ॥ १८ ॥ | [These] wise people see सम (the same one—i.e., immutable ब्रह्मन्—in all beings): in a ब्राह्मण endowed with knowledge and discretion, in a cow, an elephant, a dog, and a dog-eater [i.e., one who lives outside the cultural norms of Vedic society]. (**18**) |
| येषां मनः साम्ये स्थितम्, इह एव तैः सर्गः जितः। निर्-दोषं हि (=यस्मात्) ब्रह्म समं, तस्मात् ते ब्रह्मणि स्थिताः ॥ १९ ॥ | Those whose mind is rooted in what is by nature सम (the same) win over birth here itself. Because the defectless ब्रह्मन् is सम (the same), therefore they abide in ब्रह्मन् (reality). (**19**) |
| ब्रह्म-विद् ब्रह्मणि स्थितः स्थिर-बुद्धिः अ-सम्मूढः [च] प्रियं प्राप्य न प्रहृष्येत् अ-प्रियं च प्राप्य न उद्विजेत् ॥ २० ॥ | The one who knows ब्रह्मन्, who is established in ब्रह्मन्, whose knowledge is without doubts, and who is no longer deluded would not be elated at obtaining what is liked, nor agitated at obtaining what is disliked. (**20**) |
| बाह्य-स्पर्शेषु अ-सक्त-आत्मा आत्मनि यद् सुखं विन्दति। सः ब्रह्म-योग-युक्त-आत्मा अ-क्षयं सुखम् अश्नुते ॥ २१ ॥ | The one whose mind is [relatively or absolutely] not attached to external sense objects finds [relative or absolute] happiness in the self. That one whose mind is endowed with clear knowledge of ब्रह्मन् attains the सुख (fulfillment) that does not wane [i.e., मोक्ष]. (**21**) |

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥

---

| | |
|---|---|
| कौन्तेय, ये हि (=यस्मात्) संस्पर्श-जाः भोगाः, ते दुःख-योनयः एव आदि-अन्तवन्तः, [तस्मात्] बुधः तेषु न रमते॥ २२॥ | O अर्जुन, because those experiences—which are born of sense objects, are sources of pain alone [i.e., are immeasurably less than the सुख, the fulfillment that does not wane] and have a beginning and end—the wise one does not revel in those [experiences]. (**22**) |
| यः प्राक् शरीर-विमोक्षणात् काम-क्रोध-उद्भवं वेगम् इह एव सोढुं शक्नोति, सः युक्तः [कर्मयोगिन् इत्यर्थः]। सः सुखी नरः॥ २३॥ | The one who is able to withstand here itself the force born of काम (requiring) and क्रोध (anger) before release from the body [i.e., before death] is a युक्त [i.e., कर्म-योगिन्]. That one is a happy person. (**23**) |
| यः अन्तः-सुखः अन्तर्-आरामः तथा यः अन्तर्-ज्योतिः, सः एव योगी ब्रह्म-भूतः ब्रह्म-निर्वाणम् अधिगच्छति॥ २४॥ | Whose fulfillment is within [the self], whose reveling is within [the self], and whose mind is within [i.e., centered on] [the self]—that one alone is a योगिन् who, being ब्रह्मन्, gains liberation in/as ब्रह्मन् [i.e., gains मोक्ष, complete freedom]. (**24**) |

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ २८ ॥

| | |
|---|---|
| क्षीण-कल्मषाः छिन्न-द्वैधाः यत-आत्मानः सर्व-भूत-हिते रताः ऋषयः ब्रह्म-निर्वाणं लभन्ते॥ २५॥ | The ऋषि-s (wise)—whose impediments have been destroyed, whose doubts have been resolved, who have mastered themselves [i.e., their body-mind complex], who are happily engaged in the good of all beings—they gain liberation in/as ब्रह्मन्. (**25**) |
| काम-क्रोध-वियुक्तानां यत-चेतसां विदित-आत्मनां यतीनाम् अभितः ब्रह्म-निर्वाणं वर्तते॥ २६॥ | For the one who makes [proper] effort—free from requirements/anticipations and anger, whose mind is mastered and whose self is known—there is liberation in/as ब्रह्मन् both [here and hereafter; i.e., before and after the death of the body]. (**26**) |
| बाह्यान् स्पर्शान् बहिः कृत्वा, चक्षुः च भ्रुवोः अन्तरे एव [कृत्वा], नासा-अभ्यन्तर-चारिणौ प्राण-अपानौ समौ कृत्वा, यः मुनिः यत-इन्द्रिय-मनो-बुद्धिः मोक्ष-पर-अयणः विगत-इच्छा-भय-क्रोधः, सः सदा मुक्तः एव॥ २७–२८॥ | Keeping external the external sense objects and the vision within the eyebrows [i.e., the eyes shut], keeping [naturally] equal the exhalation and inhalation moving within the nostrils, the one who is contemplative—whose senses, mind, and intellect are mastered [enough to sit in meditation], having मोक्ष (complete freedom) as the ultimate end, from whom are [mostly or completely] gone requiring/anticipating, fear and anger—that one [who sits in meditation, contemplating this teaching] is always liberated indeed. (**27–28**) |

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः॥५॥

---

| | |
|---|---|
| यज्ञ-तपसां भोक्तारं सर्व-लोक-महा-ईश्वरं सर्व-भूतानां सु-हृदं मां ज्ञात्वा शान्तिम् ऋच्छति॥२९॥ | Knowing Me as [the doer and] the experiencer of यज्ञ and prayerful discipline, the limitless Lord of all worlds, and the [natural] friend of all beings, one attains the clarity [called मोक्ष]. (**29**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे कर्म-सन्न्यास-योगः नाम पञ्चमः अध्यायः॥५॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fifth chapter, called "The Topic of Renunciation of Action," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 6 ध्यान-योग

## The Topic of Contemplation

**ध्यान** ***dhyāna*** (*dhyā-ana*) *n.* (*fr.* √ध्यै चिन्तायाम् think over) चिन्तन meditation or contemplation.

# Chapter 6 ध्यान-योग

## The Topic of Contemplation

In this chapter, कृष्ण again states that renunciation is at the core of कर्म-योग. Renunciation is essentially mental. It is the mind that needs to be freed from the hold of its likes and dislikes. Whether that renunciation gets translated into the renunciation of material comforts is a lifestyle choice that is secondary to mental renunciation of likes and dislikes, although it is a natural progression for the one who has the understanding necessary to be free from one's likes and dislikes. But unless one is, in fact, able to give up material comforts, then one's supposed mental power of renunciation is more an imagination. Renunciation means knowledge, not denial; it is the knowledge that the self is not a doer or an enjoyer.

The assimilation of this knowledge is assisted by the outward discipline of the lifestyles of कर्म-योग and ज्ञान-योग (*jñāna-yoga*, knowledge as a means), and by the inward discipline of meditation and contemplation. These inward disciplines are available for both lifestyles, but the सन्न्यास lifestyle and the student and retired stages of a कर्म-योग life provide more opportunity for continual practice of these inward disciplines. शम (*śama*) is the cessation of duties, and the सन्न्यास lifestyle within the Indian culture best affords the opportunity for शम. With शम, one can focus on meditation and contemplation. But शम is just an opportunity; one has to choose inner disciplines in order to assimilate the teaching. A सन्न्यासिन् (*sannyāsin*, renunciate) who is not in contemplation of the teaching is one who has fallen from the योग.

This chapter introduces meditation and contemplation as a discipline, a योग, within but not exclusive to ज्ञान-योग. It is a solitary pursuit, once learned, meant for removing any remaining obstacles to knowledge. Meditation techniques are for gaining a steadiness of mind with the purpose of contemplating the teaching, helping one assimilate the teaching. Some details are provided in this chapter on meditation techniques; more can be gained, if needed, from the *Upaniṣad*s (e.g., *Śvetāśvatara* 1.10–16, Joshi 2007) and from Patanjali's *Yoga Sutras* (1.12–51 and 2.46–3.3).

Those meditation techniques meant for gaining सिद्धि-s (*siddhi*s), special powers over nature or over others, are contrary to the teaching given here by Lord कृष्ण (see 2.41–45). Patanjali said these सिद्धि-s are impediments to progress in contemplative absorption (*Yoga Sutras* 3.37). So the contemplation is only on the teaching given here by Lord कृष्ण. The danger in focusing elsewhere is that we may become lost in pursuits outside of the teaching of the Lord and fall from the योग. Many people have been waylaid in popular yogic power trips. If, instead, we follow the Lord's teaching, it will show us how to progress in contemplative absorption for gaining knowledge.

Some think that they cannot meditate because the mind wanders when they sit in meditation. Incorrect! This is exactly meditation. Meditation is continually bringing the naturally mobile mind back to its intended focus. If it does not wander away, then it is समाधि (*samādhi*, absorption in the topic); in which case, the meditation has more than succeeded. As soon as the mind has gained a certain degree of steadiness, it should be turned to contemplation of the teaching. Such a steady mind can then remain with the teaching both in and out of the seat of meditation. This is the ideal pursuit of every seeker, whether one is in कर्म-योग or सन्न्यास.

# अथ षष्ठोऽध्यायः

श्रीभगवानुवाच।
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

## Sixth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। यः कर्म-फलम् अन्-आश्रितः कार्यं कर्म करोति, सः सन्न्यासी च योगी च — न निर्-अग्निः न च अ-क्रियः॥१॥ | The Lord said: One who does action to be done without depending on the result of action is a सन्न्यासिन् (a renunciate—at least in terms of one's राग-द्वेष-s) and a [कर्म-] योगिन्, not the one who [just] [takes a vow] not to do rituals or duties. (**1**) |
| यं सन्न्यासम् इति प्राहुः तं योगं विद्धि, पाण्डव। कश्-चन हि (=यस्मात्) अ-सन्न्यस्त-सङ्कल्पः योगी न भवति॥२॥ | What they call सन्न्यास (renunciation)—know that to be [the defining core of] [कर्म-] योग, O अर्जुन. Because anyone who has not सन्न्यस्त (renounced, given up) requirements/anticipations [regarding the result of action] is not a [कर्म-] योगिन्. (**2**) |
| योगम् आरुरुक्षोः मुनेः कर्म कारणम् उच्यते। तस्य योग-आरूढस्य एव शमः कारणम् उच्यते॥३॥ | For the [relatively] contemplative one who desires to attain योग [i.e., the contemplation presented herein], कर्म [-योग] is said to be the means. Only for that one who has attained योग (contemplation), शम (cessation of duties; i.e., सन्न्यास lifestyle of ज्ञान-योग) is said to be the means. (**3**) |

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसन्न्यासी योगारूढस्तदोच्यते ॥ ४ ॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

| | |
|---|---|
| यदा हि न इन्द्रिय-अर्थेषु न कर्मसु अनुषज्जते, तदा सर्व-सङ्कल्प-सन्न्यासी योग-आरूढः उच्यते॥४॥ | When, indeed, one is attached neither to the sense objects nor to the actions [themselves], then [this] renunciate of all fancies is said to be **योगारूढ** (one who has attained contemplation and, hence, is qualified for **सन्न्यास** lifestyle of only contemplation). (**4**) |
| आत्मना आत्मानम् उद्धरेत्। आत्मानं न अवसादयेत्, आत्मा एव हि (=यस्मात्) आत्मनः बन्धुः, आत्मा एव आत्मनः रिपुः॥५॥ | [This is a solitary pursuit, because] one should lift oneself [i.e., the body-sense-mind complex] up by oneself [the body-sense-mind complex]. One should not destroy oneself, because oneself alone [not anyone else] is the friend of oneself, and oneself alone [not anyone else] is the enemy of oneself. (**5**) |
| येन आत्मना एव आत्मा जितः, तस्य आत्मा आत्मनः बन्धुः। अन्-आत्मनः तु आत्मा एव शत्रुवत् शत्रुत्वे वर्तेत॥६॥ | By whom oneself [the body-sense-mind complex] is mastered by oneself [the body-sense-mind complex]—for that one, oneself is the friend of oneself; whereas, for the one who has not [mastered] oneself, oneself alone remains as an enemy, like an [external] enemy. (**6**) |

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८ ॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

---

| | |
|---|---|
| शीत-उष्ण-सुख-दुःखेषु तथा मान-अपमानयोः जित-आत्मनः प्रशान्तस्य आत्मा परं (=अधिकं) समाहितः ॥ ७ ॥ | In the [natural situations of] cold/hot, pleasure/pain, and in respect and disrespect—for the one whose body-sense-mind complex is mastered and who is clear, the mind is completely composed. (**7**) |
| ज्ञान-विज्ञान-तृप्त-आत्मा कूट-स्थः विजित-इन्द्रियः सम-लोष्ट-अश्म-काञ्चनः योगी युक्तः इति उच्यते ॥ ८ ॥ | Whose mind is content with [one's] knowledge and its assimilation; who remains unchanged; whose senses are mastered; for whom a lump of clay, a stone, and gold are [transcended as the reality, सत्, that is] the same (सम)—[that] योगिन् is called युक्त (composed). (**8**) |
| सु-हृन्-मित्र-अरि-उदासीन-मध्य-स्थ-द्वेष्य-बन्धुषु साधुषु पापेषु अपि च सम-बुद्धिः विशिष्यते ॥ ९ ॥ | That one is exalted whose vision is the same toward the kind-hearted, friends, enemies, acquaintances, mediators, the hateful, kin, the virtuous, and even sinners. (**9**) |

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

| | |
|---|---|
| रहसि स्थितः एकाकी यत-चित्त-आत्मा निर्-आशीः अ-परिग्रहः योगी आत्मानं (=बुद्धिं) स-ततं युञ्जीत॥१०॥ | Remaining in seclusion, alone, with a mind and body that is mastered, without fancies [of the future], without possessions, may the योगिन् [i.e., सन्न्यासिन्] constantly unite the mind [i.e., contemplate]. (**10**) |
| शुचौ देशे स्थिरं न अत्युच्छ्रितं न अतिनीचं चैल-अजिन-कुश-उत्तरम् आत्मनः आसनं प्रतिष्ठाप्य, तत्र आसने उपविश्य, मनः एक-अग्रं कृत्वा, यत-चित्त-इन्द्रिय-क्रियः आत्म-विशुद्धये योगं युञ्ज्यात्॥११–१२॥ | Arranging one's seat in a clean place, firm, not too high nor too low, on which the cover is [from top to bottom:] a [soft] cloth, a hide [for padding], and कुश grass [for insulation from cold and dampness] [or whatever else provides the same]. [Then] sitting upon that seat [or its equivalent]—making the mind single-pointed [i.e., having just one object]—may the one whose activities of the mind and senses are mastered contemplate (योगं युञ्ज्यात्) [the teaching] for clarity of mind [i.e., for removing obstacles to abiding in this knowledge]. (**11–12**) |

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥

---

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

---

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

---

| | |
|---|---|
| काय-शिरो-ग्रीवं समम् अ-चलं धारयन्, स्थिरः [सन्], स्वं नासिका-अग्रं सम्प्रेक्ष्य, दिशः च अन्-अवलोकयन्, प्रशान्त-आत्मा विगत-भीः ब्रह्म-चारि-व्रते स्थितः [सन्], मनः संयम्य, मच्-चित्तः मत्-परः युक्तः [योगी इत्यर्थः] आसीत॥१३–१४॥ | Holding the body, head, and neck in line and still, being steady [i.e., having a wide base], [as though] looking at the tip of one's nose [i.e., relaxing the shut eyes, whose open gaze otherwise would be along the tip of the nose], not looking [listening, etc.] in all directions, being of clear mind, without fear, and firm in [one's] vow of seeking ब्रह्मन् (ब्रह्म-चर्य; i.e., listening to the teacher, then continually contemplating and teaching others), mastering the mind—may the योगिन् sit, thinking of Me [through My teaching], having Me as the ultimate. (**13–14**) |
| एवं सदा आत्मानं (=बुद्धिं) युञ्जन्, नियत-मानसः योगी निर्वाण-परमां मत्-संस्थां शान्तिम् अधिगच्छति॥१५॥ | Always uniting the mind [i.e., contemplating] in this way, having mastered the mind, the योगिन् attains the शान्ति (clarity) whose culmination is complete freedom, centered on Me [the Lord, परमेश्वर]. (**15**) |
| अत्यश्नतः तु योगः न अस्ति, न च एक-अन्तम् अन्-अश्नतः, न च अतिस्वप्न-शीलस्य, न एव च जाग्रतः, अर्जुन॥१६॥ | —Whereas [ज्ञान-] योग (contemplation of the teaching) is not there for one who eats too much, nor for one who does not eat adequately, nor for one who habitually sleeps too much, nor for one who is [habitually always] awake, O अर्जुन. (**16**) |

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

---

| | |
|---|---|
| युक्त-आहार-विहारस्य कर्मसु युक्त-चेष्टस्य युक्त-स्वप्न-अवबोधस्य योगः दुःख-हा भवति॥१७॥ | For one whose food and activity are moderated—whose bodily movement is regulated during activities [i.e., without meaningless, wasted bodily movement], whose sleeping and waking [hours] are moderated—[ज्ञान-] योग is the destroyer of [all] sorrows. (**17**) |
| यदा विनियतं चित्तम् आत्मनि एव अवतिष्ठते, तदा सर्व-कामेभ्यः निः-स्पृहः युक्तः इति उच्यते॥१८॥ | When the mind that is mastered abides in आत्मन् alone, then—being free from attraction toward all [objects of] desire—one is said to be युक्त (composed). (**18**) |
| यथा निवात-स्थः दीपः न इङ्गते — आत्मनः योगं युञ्जतः योगिनः यत-चित्तस्य सा उपमा स्मृता॥१९॥ | "Like the [flame of an] oil lamp in a windless place does not flicker." This is the example cited for the mastered mind of the योगिन् who is uniting in योग [i.e., who is in contemplation] of आत्मन्. (**19**) |
| यत्र (=यस्मिन् काले) योग-सेवया निरुद्धं चित्तम् उपरमते, यत्र च आत्मना (=मनसा) आत्मानं पश्यन्, आत्मनि (=स्वे) एव तुष्यति॥२०॥ | When the mind—mastered by following योग (contemplation)—abides [in आत्मन्], and when one sees the आत्मन् by the आत्मन् (mind), [then] one is satisfied in oneself alone. (**20**) |

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥
तं विद्याद्दुःखसंयोगवियोगं योगसञ्ज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

---

यत्र (=यस्मिन् काले) अयं यद् तद् आत्यन्तिकं बुद्धि-ग्राह्यम् अतीन्द्रियं सुखं वेत्ति, स्थितः च तत्त्वतः न एव चलति, यम् [आत्मलाभम्] च लब्ध्वा ततः अधिकम् अपरं लाभं न मन्यते, यस्मिन् [आत्मतत्त्वे] स्थितः गुरुणा दुःखेन अपि न विचाल्यते, तं दुःख-संयोग-वियोगं योग-सञ्ज्ञितं विद्यात्। सः योगः अ-निर्विण्ण-चेतसा निश्चयेन योक्तव्यः ॥ २१–२३ ॥

When one knows that same limitless सुख (fulfillment that is the nature of आत्मन्)—which is to be grasped by the intellect, [yet] is not within the scope of the senses—and, abiding [there in the सुख], never moving away from [this] truth [i.e., reality], having gained that which one knows is not bettered by another gain, and abiding in which [reality] one would not be affected—even by great pain—know that disassociation from association with sorrow to be what is called योग (essentially an undoing of one's natural, but unanalyzed, attachment to/identity with the body-mind complex through inquiry into reality and continued contemplation). That [ज्ञान-] योग should be pursued with firm resolve by a mind that is not indifferent [since the natural identifications are very strong]. (**21–23**)

सङ्कल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ २५ ॥

---

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

---

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

---

| | |
|---|---|
| सर्वान् सङ्कल्प-प्रभवान् कामान् अ-शेषतः त्यक्त्वा, मनसा एव इन्द्रिय-ग्रामं समन्ततः विनियम्य, धृति-गृहीतया बुद्ध्या शनैः शनैः उपरमेत्। आत्म-संस्थं मनः कृत्वा, न किञ्-चिद् अपि चिन्तयेत्॥ २४–२५॥ | Totally giving up all anticipations born of सङ्कल्प (scheming) [about one's goals in meditation], exercising complete authority by the mind alone [in meditation] over all the organs [of sense and action], one should slowly [and gently]—with the intellect endowed with resolve [prior to sitting in meditation]—bring [the mind] to abide [in आत्मन् ]. Making the mind abide in आत्मन् (परमात्मन्, the Lord as one's self), may one contemplate nothing else. (**24–25**) |
| यतः यतः चञ्चलम् अ-स्थिरं मनः निश्चरति, ततः ततः एतद् [मनः] आत्मनि एव नियम्य, वशं नयेत्॥ २६॥ | Bringing it [i.e., the mind] back from whichever [distracting object] the [naturally] mobile, unsteady mind goes to—[by understanding that object also as] within [पर/limitless] आत्मन् alone—may one bring [the mind] under control. (**26**) |
| उत्तमं सुखम् उपैति [इव] एनं हि प्रशान्त-मनसं शान्त-रजसम् अ-कल्मषं ब्रह्म-भूतं योगिनम्॥ २७॥ | Limitless fulfillment [as though] reaches [since it is already the nature of] this [ज्ञान-] योगिन् who has a mind that is clear, [i.e.,] whose cloud [of delusion] has subsided, who [recognizes one's self as] free from impurities, and who has attained ब्रह्मन्. (**27**) |

| | | | | | |
|---|---|---|---|---|---|
| युञ्जन्नेवं | सदात्मानं | योगी | विगतकल्मषः । | | |
| सुखेन | ब्रह्मसंस्पर्शमत्यन्तं | | सुखमश्नुते ॥ | २८ | ॥ |
| सर्वभूतस्थमात्मानं | सर्वभूतानि | | चात्मनि । | | |
| ईक्षते | योगयुक्तात्मा | सर्वत्र | समदर्शनः ॥ | २९ | ॥ |
| यो मां पश्यति | सर्वत्र सर्वं | च मयि | पश्यति । | | |
| तस्याहं न प्रणश्यामि | स च | मे न | प्रणश्यति ॥ | ३० | ॥ |

| | |
|---|---|
| एवं सदा आत्मानं (=बुद्धिं) युञ्जन्, विगत-कल्मषः योगी सुखेन ब्रह्म-संस्पर्शम् अत्यन्तं सुखम् अश्नुते॥ २८॥ | Always uniting the mind [i.e., contemplating] in this way, free from impurities, the [ज्ञान-] योगिन् easily gains limitless fulfillment that is [revealed by] the contact with [the knowledge of] ब्रह्मन् [i.e., revealed as one's nature, upon removal of ignorance]. (**28**) |
| योग-युक्त-आत्मा सर्वत्र सम-दर्शनः आत्मानं सर्व-भूत-स्थं [ईक्षते], सर्व-भूतानि च आत्मनि ईक्षते॥ २९॥ | —Whose mind is absorbed in [this] contemplation, who sees सम (the same; i.e., ब्रह्मन्) everywhere—sees [one's] self abiding in all beings and all beings in [one's] self [i.e., assimilates the knowledge of oneself as being परमात्मन्]. (**29**) |
| यः मां सर्वत्र पश्यति, मयि च सर्वं पश्यति, तस्य अहं न प्रणश्यामि, सः च मे न प्रणश्यति॥ ३०॥ | The one who sees Me everywhere and sees everything in Me—I am not lost [i.e., remote] to that one, nor is that one lost [i.e., remote] to Me. (**30**) |

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

अर्जुन उवाच।
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

| | |
|---|---|
| यः एकत्वम् आस्थितः [सन्] सर्व-भूत-स्थितं मां भजति, सः योगी सर्वथा वर्तमानः अपि मयि वर्तते॥ ३१॥ | Having attained [this vision/knowledge of] oneness, the one who [thus] gains Me as abiding in all beings, that [ज्ञान-] योगिन्, though engaging in all types [of action], abides in Me [i.e., abides not just when in the seat of meditation—because knowledge is continuous, in and out of meditation]. (**31**) |
| अर्जुन, यः सर्वत्र यदि सुखं वा दुःखं वा आत्म-औपम्येन समं पश्यति, सः योगी परमः मतः॥ ३२॥ | O अर्जुन, the one who sees [that life is] the same everywhere, whether pleasant or unpleasant, with oneself as the basis of comparison[4] [since आत्मन् is one]—that [ज्ञान-] योगिन् is regarded as the most exalted. (**32**) |
| अर्जुनः उवाच। मधु-सूदन, त्वया अयं योगः यः साम्येन प्रोक्तः, एतस्य [योगस्य] स्थिरां स्थितिं चञ्चलत्वात् अहं न पश्यामि॥ ३३॥ | अर्जुन said: O कृष्ण, this [ज्ञान-] योग that you have talked about as [the vision of] sameness, I do not see its steady continuance due to the very fleeting nature [of the mind]. (**33**) |

[3] "With oneself as the basis of comparison" is grounded in the vision that the one who sees through these eyes is the same as the one who sees through other eyes.

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

---

श्रीभगवानुवाच।
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

---

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

---

| | |
|---|---|
| कृष्ण, चञ्चलं हि (=यस्मात्) प्रमाथि बलवत् दृढम् [च] मनः, अहं तस्य निग्रहं वायोः इव सु-दुष्-करं मन्ये॥ ३४॥ | O कृष्ण, since the mind is very fleeting, distracting, strong, and well rooted, I think that its control is quite as difficult as that of the wind. (**34**) |
| श्री-भगवान् उवाच। महा-बाहो, अ-संशयं मनः चलं दुर्-निग्रहम्। कौन्तेय, अभ्यासेन तु वैराग्येण च गृह्यते॥ ३५॥ | The Lord said: O अर्जुन, without a doubt, the mind is fleeting and difficult to master. But, O अर्जुन, with repetition [in prayerful meditation and eventually in contemplation] and with dispassion [by objective inquiry into the distracting objects and their valuation], it is mastered. (**35**) |
| अ-संयत-आत्मना योगः दुष्-प्रापः। वश्य-आत्मना तु उपायतः यतता [च] अवाप्तुं शक्यः — इति मे मतिः॥ ३६॥ | By one whose mind is not mastered, [this] [ज्ञान-] योग is difficult to gain, whereas by one whose mind is mastered and who makes effort through [proper] means [i.e., through the contemplation presented in this chapter], it is possible to gain. This is my vision. (**36**) |

अर्जुन उवाच।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

---

| | |
|---|---|
| अर्जुनः उवाच।<br>कृष्ण, श्रद्धया उपेतः अ-यतिः योगात् चलित-मानसः योग-संसिद्धिम् अ-प्राप्य कां गतिं गच्छति॥ ३७॥ | अर्जुन said:<br>O कृष्ण, [the सन्न्यासिन् talked about in this chapter] endowed with trust [in this Your teaching], [but] who does not make [adequate] effort, whose mind wanders away from योग, not gaining success in योग—what is [that one's] lot? (**37**) |
| महा-बाहो, ब्रह्मणः पथि विमूढः उभय-विभ्रष्टः अ-प्रतिष्ठः छिन्न-अभ्रम् इव कच्-चिद् न नश्यति॥ ३८॥ | O कृष्ण, deluded in the path [i.e., in the means for the knowledge] of ब्रह्मन्, fallen from both [कर्म-योग and ज्ञान-योग] [and thus] without a basis, I hope that that one does not fizzle out, like a cloudlet [split off from a cloud bank]? (**38**) |
| कृष्ण, एतद् मे संशयम् अ-शेषतः छेत्तुम् अर्हसि, त्वद्-अन्यः हि (=यस्मात्) अस्य संशयस्य छेत्ता न उपपद्यते॥ ३९॥ | Now, O कृष्ण, You ought to completely remove my doubt, since—other than You [ईश्वर]—there is no remover of this [particular] doubt. (**39**) |

श्रीभगवानुवाच।
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

---

| | |
|---|---|
| श्री-भगवान् उवाच। पार्थ, न एव इह न अमुत्र तस्य विनाशः विद्यते। तात, कश्-चिद् हि (=यस्मात्) कल्याण-कृत् दुर्-गतिं न गच्छति॥ ४०॥ | The Lord said: O अर्जुन, neither here itself [due to the positive attitude of श्रद्धा] nor hereafter [according to कर्मन्] is there loss for that one. Because, O Dear One, [to the extent] anyone performs adaptive action [in keeping with धर्म], [to that extent] that one does not get a bad lot. (**40**) |
| योग-भ्रष्टः पुण्य-कृतां लोकान् प्राप्य, शाश्वतीः समाः उषित्वा, शुचीनां श्रीमतां गेहे अभिजायते॥ ४१॥ | The one who has "fallen" from [this] योग gains the [same] worlds [i.e., heavens] of those who do adaptive actions, lives there for countless years, [then] is [re-]born in the home of a virtuous [i.e., following धर्म] and fortunate [family]. (**41**) |
| अथवा धीमतां योगिनाम् एव कुले भवति। यद् एतद् ईदृशं जन्म हि लोके दुर्-लभतरम्॥ ४२॥ | —Or [even better] that one is born in the family of wise योगिन्-s. Such a birth as this is indeed more difficult to attain in [this] world. (**42**) |

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

---

| | |
|---|---|
| तत्र पौर्व-देहिकं तं बुद्धि-संयोगं लभते, ततः च संसिद्धौ भूयः यतते, कुरु-नन्दन॥ ४३॥ | There, one gains connection with [i.e., quickly matures to] an intellect [like the one] that existed while in the previous body and [then] strives further than that, toward success [i.e., complete freedom], O अर्जुन. (**43**) |
| तेन पूर्व-अभ्यासेन एव अ-वशः अपि सः ह्रियते हि। योगस्य जिज्ञासुः अपि शब्द-ब्रह्म अतिवर्तते॥ ४४॥ | By that previous [life's] practice [i.e., its कर्म-फल, the result of its कर्मन्] alone, even without will, one is indeed swept along. Just desiring to know about [this] [ज्ञान-] योग [one quickly] goes beyond the वेद text [i.e., its bulky heaven-going section]. (**44**) |
| प्रयत्नात् यतमानः तु (=एव) योगी संशुद्ध-किल्बिषः अनेक-जन्म-संसिद्धः ततः परां गतिं याति॥ ४५॥ | The [ज्ञान-] योगिन् who indeed strives with resolve [until] free from faults, accomplished [by accumulated effort] after many [prior] births [wherein all obstacles to knowledge are overcome]—that one thereupon gains the limitless end. (**45**) |

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

---

| | |
|---|---|
| योगी तपस्विभ्यः अधिकः ज्ञानिभ्यः (=पण्डितेभ्यः) अपि अधिकः मतः। योगी कर्मिभ्यः च अधिकः। तस्मात् योगी भव, अर्जुन ॥ ४६ ॥ | [This] योगिन् is superior to तपस्विन्-s (who perform prayerful disciplines) and is also considered superior to ज्ञानिन्-s [i.e., scholars who treat this teaching as just theory rather than as about themselves]. [This] योगिन् is also superior to those who perform rituals. Therefore, be a योगिन् [i.e., through कर्म-योग become a ज्ञान-योगिन्], O अर्जुन. (**46**) |
| यः श्रद्धावान् मद्-गतेन अन्तर्-आत्मना मां भजते, सः सर्वेषां योगिनाम् अपि युक्ततमः मे मतः ॥ ४७ ॥ | One who has श्रद्धा—the mind absorbed in Me—seeks Me [through this contemplation]. That one is considered by Me the most exalted among all योगिन्-s. (**47**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ध्यान-योगः नाम षष्ठः अध्यायः ॥ ६ ॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the sixth chapter, called "The Topic of Contemplation," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 7 ज्ञान-विज्ञान-योग

## The Topic of Knowledge and Its Assimilation

**विज्ञान** ***vijñāna*** (*vi-jnā-ana*) *m.* (*fr.* √ज्ञा अवबोधने know) ज्ञान knowing, knowledge; (*when contrasted with* ज्ञान) विशेषतः तत्त्वानुभवः the assimilation of (*anubhava*, being totally in keeping with) the distinct knowledge of it's nature (*tattva*).

# Chapter 7 ज्ञान-विज्ञान-योग

## The Topic of Knowledge and Its Assimilation

When this teaching uses the word *knowledge* by itself, it indicates the completion of the knowledge that yields complete freedom. When it uses the two words *knowledge* (ज्ञान) and *assimilation* (विज्ञान, *vijñāna*), it is distinguishing simple understanding about the teaching from its fulfillment in complete freedom. It is the difference between saying "The teaching and the teacher say I am (the self is) completely free" and saying "I am completely free." The first speaker may simply be a scholar; the later is a master. In the preceding chapter, a life of contemplation is encouraged for the assimilation of the teaching about the nature of the limitless self.

This chapter marks a shift in emphasis from the nature of the individual (and the pursuit and assimilation of the knowledge of the nature of the individual) to the nature of the Lord (and the pursuit and assimilation of the knowledge of the nature of the Lord). This shift in emphasis lasts through chapter 12. Chapter 13 then gives a marvelous presentation of the identity of the Lord and the individual—of the Lord who is both the field and the knower of the field, and the individual who is this same knower of the field. The great उपनिषद् statement "तत् त्वम् असि" ("*Tat tvam asi*"/"That [Lord] you are") is the basis for these shifts in emphasis from the individual ("you") to the Lord ("that") and then to their identity ("are"). Whether someone fully knows the microcosm or fully knows the macrocosm, either one amounts to complete knowledge—as the truth of one is the truth of the other. That is the very nature of truth. Truth is without division and infinite. If it is limited in any way, then it is only a concept that is subject to correction and negation.

The knowledge of the Lord starts with the macrocosm. The macrocosm is all the objects of your five senses and the concepts that make up your mind. This is the entirety of the universe, the field, before you. Even what you don't know falls within the concept of what you know you do not know. We have to pause to appreciate how complete this ancient description of the macrocosm is. Even our vaunted modern-day physics is not as complete. Physics has only recently come to accept that the observer needs

to be taken into account in order to correctly understand even a single event in the universe. But the knowledge of the Lord does not stop at that, as there is also the being that is aware of the observations and concepts in the mind.

When a scientist observes a person, the scientist can never observe that person's awareness. Hence, psychology and the other sciences—because of the scientific method to which they are wed—are forever shut off from arriving at an understanding of the nature of this awareness, which awareness is in fact self-evident to everyone. Psychology cannot even directly study the mind. Psychologists rely on clients' subjective responses to determine what is happening in the mind. For example, if you were the client, you would have to tell the psychologist whether stimulating a particular part of your brain evoked a particular thought in your mind. If a set of neurons firing was exactly the same as a thought, then why would a psychologist need to ask you?

Before anyone knew there were such neurons, everyone was clear what thoughts they entertained. Indeed, scientists don't even see these neurons firing in their lab; they see only spikes on a graph, once or twice removed from what they are claiming is the fact of thought. At best, scientific theories about awareness and the mind are suppositions and inferences—to be corrected and negated by the next generation. Scientists cannot directly study your mind any more than they can read your mind. However, you alone can contemplate all this before you (including your mind) with this teaching, within self-evident awareness, and as the Lord—because the Lord is none other than yourself.

# अथ सप्तमोऽध्यायः

श्रीभगवानुवाच।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

---

## Seventh Chapter

| | |
|---|---|
| श्री-भगवान् उवाच।<br>पार्थ, मयि आसक्त-मनाः मद्-आश्रयः योगं युञ्जन्, यथा समग्रं माम् अ-संशयं ज्ञास्यसि, तद् शृणु॥१॥ | The Lord said:<br>O अर्जुन, please listen to that [ज्ञानं स-विज्ञामम्] by which—having [your] mind committed to Me, having Me as [your] foundation, and taking to [My two-fold] योग—you will know Me [परमेश्वर, परं ब्रह्म] complete, without doubt. (**1**) |
| अहं ते (=तुभ्यं) इदं ज्ञानं स-विज्ञानं वक्षामि अ-शेषतः, यद् ज्ञात्वा इह न अन्यद् भूयः ज्ञातव्यम् अवशिष्यते॥२॥ | This knowledge (ज्ञान), along with its assimilation (विज्ञाम), I will tell you completely, knowing which nothing more remains here to be known. (**2**) |
| मनुष्याणां सहस्रेषु कश्-चिद् सिद्धये यतति। यतताम् अपि सिद्धानां कश्-चिद् मां वेत्ति तत्त्वतः॥३॥ | Among thousands of people, [a rare] one makes an effort for [this] accomplishment. Even of those who make an effort and are prepared, [a rare] one knows Me in reality. (**3**) |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भूमिरापोऽनलो | वायुः | खं | मनो | बुद्धिरेव | च । | | |
| अहङ्कार | इतीयं | मे | भिन्ना | प्रकृतिरष्टधा | ॥ | ४ | ॥ |
| अपरेयमितस्त्वन्यां | प्रकृतिं | विद्धि | मे | पराम् | । | | |
| जीवभूतां | महाबाहो | ययेदं | धार्यते | जगत् | ॥ | ५ | ॥ |
| एतद्योनीनि | भूतानि | | सर्वाणीत्युपधारय | | । | | |
| अहं | कृत्स्नस्य | जगतः | प्रभवः | प्रलयस्तथा | ॥ | ६ | ॥ |
| मत्तः | परतरं | नान्यत्किञ्चिदस्ति | | धनञ्जय | । | | |
| मयि | सर्वमिदं | प्रोतं | सूत्रे | मणिगणा | इव ॥ | ७ | ॥ |

| | |
|---|---|
| भूमिः आपः अन्-अलः वायुः खं मनः बुद्धिः अहङ्-कारः एव च इति इयं मे प्रकृतिः अष्टधा भिन्ना॥४॥ | Earth [i.e., solidity], water [i.e., liquidity], fire [i.e., heat/light], wind [i.e., movement], space [i.e., dimension], mind, intellect, and the "I" notion [i.e., the universe divided into five sensible elements and the means to sense them]—this is My nature [प्रकृति], divided in eight ways. (**4**) |
| इयम् अ-परा। महा-बाहो, इतः तु अन्यां मे परां प्रकृतिं विद्धि — जीव-भूतां यया इदं जगत् धार्यते॥५॥ | This is not [My] ultimate [nature] [i.e., it is a lower level of reality within Me, as असत् is to सत्]. Whereas, O अर्जुन, different from this, please know My ultimate nature [प्रकृति]—being [the basis of] the जीव (individual) and by which this universe is sustained. (**5**) |
| सर्वाणि भूतानि एतद्-योनीनि इति उपधारय। अहं कृत्स्नस्य जगतः प्रभवः, तथा प्रलयः॥६॥ | Please bear in mind that all beings have these two [प्रकृति-s—the universe of forms and its reality] as their source. I am the source of the entire universe, as well as [its] resolution. (**6**) |
| मत्तः परतरम् अन्यद् न किञ्-चिद् अस्ति, धनञ्-जय। सूत्रे मणि-गणाः इव मयि इदं सर्वं प्रोतम्॥७॥ | There is no other [cause] superior to Me, O अर्जुन. Like collections of gems [i.e., so many glories] on a thread, all this is strung in Me. (**7**) |

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

| | |
|---|---|
| कौन्तेय, अहम् अस्मि — अप्सु रसः, शशि-सूर्ययोः प्रभा, सर्व-वेदेषु प्रणवः, खे शब्दः, नृषु पौरुषम्॥८॥ | O अर्जुन, I am [to name a few] the taste in [i.e., the essence of] water, the light of the moon and sun, the sound symbol ओम् in all the वेद-s, the sound in [i.e., the essence of] space, and the humanness [i.e., the unique capacity of self-judgment] in humans. (**8**) |
| पृथिव्यां च पुण्यः गन्धः, विभावसौ च तेजस् अस्मि। सर्व-भूतेषु जीवनं, तपस्विषु च तपस् अस्मि॥९॥ | I am sweet fragrance in earth and the तेजस् (heat and light) in [i.e., the essence of] fire. I am the life in living beings, and the prayerful discipline in ascetics. (**9**) |
| पार्थ, सनातनं मां सर्व-भूतानां बीजं विद्धि। बुद्धिमतां बुद्धिः, तेजस्विनां तेजस् अहम् अस्मि॥१०॥ | O अर्जुन, please understand the ever-existing Me as the seed of all beings. I am the intellect of all who have an intellect, and the brilliance of all that have brilliance. (**10**) |

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

---

| | |
|---|---|
| बलवतां च काम-राग-विवर्जितं बलं, भूतेषु धर्म-अ-विरुद्धः कामः अहम् अस्मि, भरत-ऋषभ॥११॥ | In all that have strength, I am the strength that is free from काम (requirement/anticipation—toward the unattained) and राग (attachment—toward the attained), and in all beings [I am] [nonbinding] desire not opposed to धर्म ([My] universal order), O अर्जुन. (**11**) |
| ये च एव सात्त्विकाः भावाः, ये च राजसाः तामसाः [च], तान् मत्तः एव इति विद्धि। ते मयि, न तु अहं तेषु॥१२॥ | Those things born from सत्त्व and those from रजस् and तमस् [गुण-s], know them to be from Me only. They [the असत्—all impermanent things] are in Me [सत्—permanent existence] [i.e., their existence depends on Me], but I am not in them [i.e., My existence does not depend on them]. (**12**) |
| एभिः भावैः त्रिभिः गुणमयैः सर्वम् इदं जगत् मोहितम्। माम् एभ्यः परम् अव्ययं [च] [लोकः] न अभिजानाति॥१३॥ | This entire world [of humans] is deluded by these things that are modifications of the three गुण-s. This [populace] does not know Me, who is distinct [i.e., a separate order of reality, as सत् from असत्] from them [i.e., from what they think they are] and is changeless [i.e., not modified into them]. (**13**) |

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

---

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

---

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

---

| | |
|---|---|
| मम हि (=यस्मात्) एषा माया गुणमयी दैवी दुर्-अत्यया, ये माम् एव प्रपद्यन्ते ते एतां मायां तरन्ति॥१४॥ | —Because, this, My माया (प्रकृति, this captivating world of appearances—mere names and forms)—in the form of the [three] गुण-s and coming from [Me] the Lord—is difficult to cross. [Therefore, giving up all else in माया,] those who seek only Me [as themselves] cross this माया. (**14**) |
| दुष्-कृतिनः मूढाः नर-अधमाः न मां प्रपद्यन्ते। मायया अपहृत-ज्ञानाः आसुरं भावम् आश्रिताः॥१५॥ | Those who do maladaptive action, who are deluded and the lowest among people, do not seek [the ultimate] Me. Robbed of discerning capacity by [this enchanting] माया, they have resorted to the condition of an असुर (one who fights against the Lord's order, against the cosmic cycle). (**15**) |
| चतुर्-विधाः जनाः सु-कृतिनः मां भजन्ते, अर्जुन। आर्तः अर्थ-अर्थी जिज्ञासुः ज्ञानी च, भरत-ऋषभ॥१६॥ | Fourfold are the people who do adaptive action and who seek Me, O अर्जुन. [These four kinds of भक्त-s, devotees, are] the one who is seized by trouble, the one who requires security, the one who wants to know [Me], and the ज्ञानिन् (one who knows) [Me], O अर्जुन. (**16**) |

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥

---

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥ १८ ॥

---

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥

---

| | |
|---|---|
| तेषां ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते, अत्यर्थं हि (=यस्मात्) अहं ज्ञानिनः प्रियः, सः च मम प्रियः ॥१७॥ | Among them, the ज्ञानिन्—who is always united [in Me] and whose worship is of the one [Lord as everything]—is distinguished, because I [आत्मन्] am totally beloved to that ज्ञानिन् and that one is [totally] beloved to Me [as आत्मन् alone is प्रिय—*see Bṛhadāraṇyaka Upaniṣad* 2.4.5]. (**17**) |
| सर्वे एव एते उदाराः, ज्ञानी तु आत्मा एव — [इति] मे मतम्। सः हि (=यस्मात्) युक्त-आत्मा माम् एव अन्-उत्तमां गतिम् आस्थितः ॥१८॥ | All [four] indeed are exalted, but the ज्ञानिन् is आत्मन् (My self) alone. That is My vision. —Because that one, whose mind is absorbed [in Me], has attained the goal that is but Me, beyond which there is none. (**18**) |
| बहूनां जन्मनाम् अन्ते ज्ञानवान् “वासु-देवः सर्वम्” इति मां प्रपद्यते। सः महा-आत्मा सु-दुर्-लभः ॥१९॥ | At the end of many births, the one who [finally] has the knowledge that “the Lord (वासु-देव, the conscious being in which everything exists) is all” [i.e., the Lord is all this, including oneself] attains Me. That wise person is very rare. (**19**) |

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥

---

| | |
|---|---|
| तैः तैः कामैः हृत-ज्ञानाः स्वया प्रकृत्या नियताः तं तं नियमम् आस्थाय अन्य-देवताः प्रपद्यन्ते ॥ २० ॥ | Those whose discrimination has been robbed by various requirements and are ruled by their own disposition worship various deities, following various stipulations [per the appropriate deity to fulfill each particular requirement]. (**20**) |
| यः यः भक्तः यां यां तनुं श्रद्धया अर्चितुम् इच्छति, तस्य तस्य ताम् एव श्रद्धाम् अहम् अ-चलां विदधामि ॥ २१ ॥ | Whoever be the devotee and to whichever [limited] form [of Mine] one wishes to worship with faith—for that one, the very same faith I make firm [by giving the result of the devotee's action]. (**21**) |
| सः तया श्रद्धया युक्तः तस्याः राधनम् ईहते, ततः च कामान् लभते, तान् हि (=यस्मात्) मया एव विहितान् ॥ २२ ॥ | That one, endowed with that faith, engages in the worship of that [deity, that limited form of Me] and obtains from that [deity] those desired objects—because those are ordained by Me alone [in the form of the laws of कर्मन्]. (**22**) |

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

---

| | |
|---|---|
| तेषां तु अल्प-मेधसां तद् फलम् अन्तवत् भवति। देव-यजः देवान् यान्ति, मद्-भक्ताः अपि मां यान्ति॥ २३॥ | But for those of limited discernment [hence, of limited goals and of limited capacity for appreciation], that result is limited [in time, in value, etc.]. Those who worship the deities go to the [limited world of the] deities, and those who worship [the limitless] Me go to Me [as their self]. (**23**) |
| अ-बुद्धयः अ-व्ययम् अन्-उत्तमं मम परं भावम् अ-जानन्तः माम् अ-व्यक्तं व्यक्तिम् आपन्नं मन्यन्ते॥ २४॥ | Those who lack discernment, not knowing My limitless nature—changeless and beyond which there is none—think of Me, who is formless, as having attained a form. (**24**) |
| योग-माया-समावृतः अहं न सर्वस्य प्रकाशः। अयं लोकः मूढः माम् अ-जम् अ-व्ययं न अभिजानाति॥ २५॥ | Veiled [i.e., seemingly embodied in names and forms] by माया, which is the union [of the three गुण-s], I am not evident to everyone. This person [i.e., the general populace] who is deluded does not [properly] know Me, the unborn and changeless [आत्मन्]. (**25**) |

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥ २७ ॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

---

| | |
|---|---|
| अर्जुन, अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद। न तु कश्-चन मां वेद॥ २६॥ | O अर्जुन, I know [all] things past, present, and future. But no one [except the ज्ञानिन् who knows himself or herself as Me] knows Me. (**26**) |
| भारत, परन्-तप, सर्गे इच्छा-द्वेष-समुत्थेन द्वन्-द्व-मोहेन सर्व-भूतानि सम्मोहं यान्ति॥ २७॥ | O अर्जुन, Scorcher of Foes, all beings at birth—because of the delusion occasioned by the [natural] pairs of opposites, [which delusion is] born of requiring and aversion—become completely deluded. (**27**) |
| येषां तु पुण्य-कर्मणां जनानां पापम् अन्त-गतं, ते द्वन्-द्व-मोह-निर्मुक्ताः दृढ-व्रताः मां भजन्ते॥ २८॥ | But those people of adaptive action whose karmic demerit [and merit] has come to an end—being freed from the delusion occasioned by the [natural] pairs of opposites—and whose commitment is firm, they worship Me [as themselves]. (**28**) |
| ये माम् आश्रित्य जरा-मरण-मोक्षाय यतन्ति, ते तद् ब्रह्म कृत्स्नम् अध्यात्मं [विदुः], कर्म च अ-खिलं विदुः॥ २९॥ | Those who make effort for freedom from old age and death—taking refuge in Me—they know that ब्रह्मन् (reality; i.e., Me) in entirety [as] अध्यात्म (centered on/existing in the body; i.e., as प्रत्यग्-आत्मन्, themselves) and [they know] all about कर्मन्. (**29**) |

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः॥७॥

| | |
|---|---|
| ये मां स-अधिभूत-अधिदैवं स-अधियज्ञं च विदुः, युक्त-चेतसः प्रयाण-काले अपि च — ते मां विदुः॥३०॥ | Those who know Me as अधिभूत (centered on/existing in beings) and अधिदैव (centered on/existing in deities) and as अधियज्ञ (centered on/existing in rituals), whose minds are absorbed in Me even at the moment of death—they know Me. (**30**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे ज्ञान-विज्ञान-योगः नाम सप्तमः अध्यायः॥७॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the seventh chapter, called "The Topic of Knowledge and Its Assimilation," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 8 अक्षर-ब्रह्म-योग

## The Topic of the Imperishable Reality

**ब्रह्मन्** ***brahman*** (*bráh-man*) *n.* (*fr.* √बृह् वृद्धौ be big) (lit. "the big") वेद sacred knowledge/scripture; सत्यं ज्ञानम् अनन्तं ब्रह्म limitless reality-consciousness, the limitless conscious being, reality. **ब्रह्मन्** ***brahman*** *m.* ब्राह्मण a person of the class of priests, educators, and judges; Lord ब्रह्मा the Lord as manifester of the universe.

# Chapter 8 अक्षर-ब्रह्म-योग

## The Topic of the Imperishable Reality

The entirety of this universe has been presented in the previous chapter, as only the Advaita Vedanta teaching can present it. Modern sciences are limited in their scope and therefore can neither confirm nor disaffirm this teaching, nor are they required to confirm it. The sciences have their own relative scope in which they provide solutions pending further study. Because only you can know your own mind and because a complete teaching must include yourself (the witness of all, including the mind), self-examination is required—in the light of this teaching—to confirm the teaching. No future science or new savior (whether in the future or the past) can do that for you.

This teaching—which examines the nature of the entire universe and the very nature of you, its witness—was given, Lord कृष्ण says, at the beginning of humankind (4.1); it comes with each manifestation of the universe. It was not first given only this century, this millennium, two- or two-thousand-five-hundred or five thousand years ago—condemning previous generations to so-called "barbaric" ignorance or to lesser realms (or even torturous realms) just because they weren't exposed to the products of the various world religions, cults, or sciences. The Vedanta teaching indicates that all possible subtle heavens or hells exist for everyone, of all generations, in keeping with their will-based deeds (7.22–23)—regardless of the era, culture, or religion in which they live. The Vedanta teaching alone reflects the eternal, universal justice to all living beings of all generations.

This teaching also indicates that there can be a transcendence of this universe, both physical and subtle—a final release from the revolutions through universal realms of existence. This release is by knowledge alone and is available during this lifetime—not supposedly after you die. This freedom, in fact, is already our nature, hidden from us by our ill-conceived notions of ourselves. This freedom is not some new knowledge given by a savior or liberator, but is the self-knowledge within each of us that blossoms once the ignorant notions have been removed and the heart is sufficiently purified of its guilts and hurts. Attaining this freedom is attaining the self of all, attaining the very being of the

Lord, reality as-it-is. For this reason, कृष्ण says that the greatest भक्त (*bhakta*, devotee) to the All, to the Lord which is all, is the ज्ञानिन् (*jñānin*), the one who knows this (7.16–19, 8.22).

In chapter 8, Lord कृष्ण again states that reality is unchanging and limitless and is the very nature of oneself. The Lord, this reality, alone is the embodied one in all bodies. The one who knows and thus remembers the Lord—without a doubt, as one's self—attains that unchanging and limitless reality (8.3–10). But the one who is mistakenly identified with the changing and limited—whether that be as tiny as this body-mind complex or as grand as the manifestation of this universe (yet excluding one's self)—will, upon the failure of the body to retain the subtle mind, move on to subtle realms. That is, one's subtle mind with the identified ego reflecting within it will move to subtle realms. These realms will be in keeping with the grandeur of what one had continually identified with in this life. Then that subtle mind, with its ego, will be born again—with an appropriate material body to exhaust more of one's accumulated store of कर्मन्-s. Therefore, the Lord says "know Me" (13.2) and "remember Me" (8.7).

# अथाष्टमोऽध्यायः

अर्जुन उवाच।
किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥

श्रीभगवानुवाच।
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः ॥ ३ ॥

## Eighth Chapter

| | |
|---|---|
| अर्जुनः उवाच। पुरुष-उत्तम, किं तद् ब्रह्म, किम् अध्यात्मं, किं कर्म, अधिभूतं किं प्रोक्तम्, अधिदैवं च किम् उच्यते॥१॥ | अर्जुन said: O कृष्ण, what is that ब्रह्मन्? What is अध्यात्म? What is कर्मन्? What is called अधिभूत? And what is called अधिदैव? (**1**) |
| अत्र अस्मिन् देहे कः कथम् अधियज्ञः, मधु-सूदन। प्रयाण-काले च नियत-आत्मभिः कथं ज्ञेयः असि॥२॥ | Here, in this body, what and how [attained] is अधियज्ञ, O कृष्ण? And, at the moment of death, how are those who have mastered the mind to know You? (**2**) |
| श्री-भगवान् उवाच। अ-क्षरं परमं ब्रह्म। स्व-भावः अध्यात्मम् उच्यते। भूत-भाव-उद्भव-करः विसर्गः कर्म-सञ्ज्ञितः॥३॥ | The Lord said: ब्रह्मन् (reality) is changeless and limitless. अध्यात्म (the self—centered on the body) is said to be of its [ब्रह्मन्-'s] nature. What is called कर्मन् is [an act of] offering [in what should be a यज्ञ] [and its फल/result] that causes the arising of existence [i.e., embodiment] of beings. (**3**) |

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

| | |
|---|---|
| क्षरः भावः अधिभूतम्। पुरुषः [हिरण्यगर्भः इत्यर्थः] च अधिदैवतम्। अत्र देहे अधियज्ञः अहम् एव, देह-भृतां वर॥४॥ | अधिभूत (the world—centered on beings/things) is perishable existence. And अधिदैवत (अधिदैव, the chief deity—centered on deities) is पुरुष (the cosmic person, हिरण्य-गर्भ). अधियज्ञ (centered on यज्ञ) here, in the body, is Me alone, O Exalted Among the Embodied Ones. (**4**) |
| अन्त-काले च माम् एव स्मरन्, कलेवरं मुक्त्वा, यः प्रयाति, सः मद्-भावं याति। अत्र संशयः न अस्ति॥५॥ | Remembering Me alone at the moment of death, having given up the body, the one who [as though] departs [i.e., from the standpoint of the ज्ञानिन्-'s subtle mind dissipating upon leaving the physical body]—that one attains My nature [i.e., complete freedom, called मोक्ष]. In this there is no doubt. (**5**) |
| कौन्तेय, अन्ते कलेवरं त्यजति, यं यं वा अपि भावं स्मरन्, सदा तद्-भाव-भावितः [सन्] तं तम् एव एति॥६॥ | O अर्जुन, [when] in the end one gives up the body, whatever thing one [naturally] remembers—always having been made in that state [of obsession through constant contemplation of whatever is ultimate to one]—that alone one reaches [as a positive or negative result, depending on whether one acted upon the obsessions in keeping with धर्म or not]. (**6**) |

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम् ॥ ७ ॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥
कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

---

| | |
|---|---|
| तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च। मयि अर्पित-मनो-बुद्धिः माम् एव अ-संशयम् एष्यसि॥७॥ | Therefore, please remember Me [as presented in this teaching] at all times and fight [O अर्जुन]. [Being] one whose mind and intellect are both offered unto Me [the Lord—as प्रकृति/nature, the cosmic order], without a doubt you will reach Me [as ब्रह्मन्/reality] alone. (**7**) |
| पार्थ, अभ्यास-योग-युक्तेन न-अन्य-गामिना [च] चेतसा अनुचिन्तयन्, यः कविं, पुराणम्, अनुशासितारम्, अणोः अणीयांसं, सर्वस्य धातारम्, अ-चिन्त्य-रूपम्, आदित्य-वर्णं, तमसः परस्तात् अनुस्मरेत् — परमं दिव्यं पुरुषं याति॥८–९॥ | O अर्जुन, accordingly [i.e., with My teaching] reflecting with a mind endowed with the योग consisting of continued practice [study and contemplation] and not inclined to go elsewhere [to anything as not-Me], the one who would contemplate [continuously and at the moment of death] the कवि (the all-knowing Lord)—the one who is always there, the one who accordingly [through धर्म] rules, subtler than the subtle [i.e., dimensionless], the dispenser of all [results of action], whose form cannot be comprehended, whose appearance is [illuminating] like the sun and beyond darkness [i.e., ignorance]—that one attains the limitless, effulgent पुरुष [Me]. (**8–9**) |

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥ ११ ॥

| | |
|---|---|
| प्रयाण-काले अ-चलेन मनसा भक्त्या युक्तः योग-बलेन च एव, भ्रुवोः मध्ये प्राणं सम्यक् आवेश्य सः तं परं दिव्यं पुरुषम् उपैति॥ १०॥ | At the moment of death, with a steady mind endowed with devotion and, indeed, with [mental] strength through योग (continued practice of contemplation), properly placing [as a visualization] the [last] breath between the [eye-]brows, one attains [by being, not by movement] that limitless, effulgent पुरुष [Me]. (**10**) |
| यद् अ-क्षरं, वेद-विदः वदन्ति, यद् वीत-रागाः यतयः विशन्ति, यद् इच्छन्तः ब्रह्म-चर्यं चरन्ति — तद् पदं ते (=तुभ्यं) सङ्ग्रहेण प्रवक्ष्ये॥ ११॥ | I will briefly tell you about that end—which is imperishable, which the knowers of the वेद declare, which यति-s (renunciates) who are free from longing enter, and desiring which they take to ब्रह्म-चर्य (living for only attaining ब्रह्मन्). (**11**) |

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

---

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

---

सर्व-द्वाराणि संयम्य, मनः हृदि निरुध्य च, आत्मनः प्राणं मूर्ध्नि आधाय, योग-धारणाम् आस्थितः [सन्], ओम् इति एक-अक्षरं ब्रह्म व्याहरन्, माम् अनुस्मरन्, देहं त्यजन्, यः प्रयाति, सः परमां गतिं [संसारे] याति॥१२–१३॥

Closing all the gates [i.e., the sense organs] and [as a visualization] withdrawing the mind into the heart; placing one's breath at [the top of] the head and remaining [there] holding [the last breath] by [the strength of] योग; chanting the single syllable "ओम्," which is ब्रह्मन्; remembering Me accordingly [through My teaching], [while] giving up the body—the one [योगिन् who is not yet a स्थित-प्रज्ञ] who departs [by movement, as it were]—that one reaches the most exalted end [within संसार; i.e., ब्रह्म-लोक, the seventh heaven, where one may be taught ब्रह्म-विद्या and thus freed]. (**12–13**)

पार्थ, यः अन्-अन्य-चेताः मां स-ततं नित्यशः स्मरति, तस्य नित्य-युक्तस्य योगिनः अहं सु-लभः॥१४॥

[—Whereas, the स्थित-प्रज्ञ] O अर्जुन, the one whose mind [sees] no other [than Me everywhere], remembering Me continually and for a long time—for that योगिन् who is always [even while living] united [in Me], I am easily gained. (**14**)

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

| | |
|---|---|
| महा-आत्मानः माम् उपेत्य, दुःख-आलयम् अ-शाश्वतं पुनर्-जन्म न आप्नुवन्ति। [ते] परमां संसिद्धिं गताः॥१५॥ | The महात्मन्-s (people who are wise), attaining Me, do not gain another birth [i.e., do not go to another लोक], which is the abode of misery and is ever changing [and therefore finite]. They have gained [while living] the limitless success [called मोक्ष]. (**15**) |
| अर्जुन, आ ब्रह्म-भुवनात् लोकाः पुनर्-आवर्तिनः । कौन्तेय, मां तु उपेत्य पुनर्-जन्म न विद्यते॥१६॥ | O अर्जुन, [all] worlds, including Lord ब्रह्मा-'s world (the highest abode in संसार, called ब्रह्म-लोक), are that from which there is a return [a rebirth] [unless taught ब्रह्म-विद्या in ब्रह्म-लोक by Lord ब्रह्मा]; whereas, O अर्जुन, attaining Me, there is no rebirth. (**16**) |
| ते जनाः अहो-रात्र-विदः यद् ब्रह्मणः अहः सहस्र-युग-पर्यन्तं रात्रिं [च] युग-सहस्र-अन्तां विदुः॥१७॥ | Those people who are knowers of day and night know that a day of Lord ब्रह्मा is that lasting thousands of युग-s [i.e., four thousand युग-s; a thousand महा-युग-s = 4.32 billion human years] and [His] night is that [also] lasting thousands of युग-s [i.e., four thousand युग-s]. (**17**) |

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसञ्ज्ञके ॥ १८ ॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

| | |
|---|---|
| अहर्-आगमे अ-व्यक्तात् सर्वाः व्यक्तयः प्रभवन्ति। रात्रि-आगमे तत्र एव अ-व्यक्त-सञ्ज्ञके [ताः] प्रलीयन्ते॥१८॥ | At the coming of the day [for Lord ब्रह्मा], all व्यक्ति-s (individuals/things) [by force of past कर्मन्] manifest [in due time] from the unmanifest. At the coming of the night [they, unless freed by knowledge,] [will have] resolve[d] [back] into that called the अव्यक्त (unmanifest) itself. (**18**) |
| पार्थ, सः एव अयं भूत-ग्रामः अ-वशः भूत्वा भूत्वा रात्रि-आगमे प्रलीयते अहर्-आगमे प्रभवति॥१९॥ | O अर्जुन, that very same group of beings [i.e., the same जीव-s]—born again and again [within countless cosmic cycles] without [their or My] will [due to their कर्मन्]—resolves at the coming of the night and manifests at the coming of the day. (**19**) |
| तस्मात् तु अ-व्यक्तात् परः अन्यः अ-व्यक्तः, यः भावः सनातनः। सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥२०॥ | —Whereas, different from that unmanifest [Lord ब्रह्मा-'s nighttime within संसार] is another unmanifest [i.e., अक्षरः पुरुषः—not manifest to the senses, being one's self], which always exists. That is not destroyed when all things are destroyed. (**20**) |

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

| | |
|---|---|
| अ-व्यक्तः अ-क्षरः इति उक्तः। तं परमां गतिम् आहुः। यं प्राप्य न निवर्तन्ते, तद् मम परमं धाम॥ २१॥ | [This] unmanifest [Me] is said to be अक्षर (imperishable). That [and not ब्रह्म-लोक], they say, is the ultimate end. Gaining which, [they] do not return—that is My limitless abode. (**21**) |
| पार्थ, यस्य भूतानि अन्तः-स्थानि येन इदं सर्वं ततं, सः पुरुषः परः, अन्-अन्यया तु भक्त्या लभ्यः॥ २२॥ | O अर्जुन, that which has all beings within [it] and by which all this is pervaded—that पुरुष (the one who fills this universe) is limitless, yet can be attained by devotion in which there is no other [considered apart from Me, the अक्षरः पुरुषः]. (**22**) |
| यत्र काले [गत्याम् इत्यर्थः] तु योगिनः प्रयाताः अन्-आवृत्तिम् आवृत्तिं च एव यान्ति, तं कालं [गतिम् इत्यर्थः] वक्ष्यामि, भरत-ऋषभ॥ २३॥ | Now, on which time [i.e., route] the योगिन्-s depart—[where] they attain either no return [at least in this कल्प/cycle of manifestation] or a return [i.e., rebirth]—that time [i.e., route] I will tell [to you], O अर्जुन. (**23**) |

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।। २४ ।।

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ।। २५ ।।

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ।। २६ ।।

---

| | |
|---|---|
| [यत्र गत्याम्] अग्निः, ज्योतिः, अहः, शुक्लः [पक्षः], षण्-मासाः उत्तर-अयणं [देवताः सन्ति], तत्र प्रयाताः ब्रह्म-विदः [ब्रह्म-उपासकाः इत्यर्थः] जनाः ब्रह्म [क्रमेण] गच्छन्ति।। २४।। | [Where] there are [the deities] Fire, Light, Day, the Bright [fortnight of the moon], and the Six-Month Northern Coursing [of the sun] [to guide]—there, the people who meditate on [the qualified] ब्रह्मन् [i.e., on a manifestation of ब्रह्मन् in the world], having departed, [eventually] attain ब्रह्मन् [via being taught this विद्या in ब्रह्म-लोक]. (**24**) |
| [यत्र गत्याम्] धूमः, रात्रिः, तथा कृष्णः [पक्षः], षण्-मासाः दक्षिण-अयनं [देवताः सन्ति], तत्र चान्द्रमसं ज्योतिः [दिवम् इत्यर्थः] प्राप्य, योगी निवर्तते।। २५।। | [Where] there are [the deities] Smoke, Night, the Dark [fortnight of the moon], and the Six-month Southern Coursing [of the sun] [to guide]—there, gaining [a stay in] a lunar [i.e., a lesser] heaven, the योगिन् returns [i.e., is reborn]. (**25**) |
| जगतः हि एते गती शुक्ल-कृष्णे शाश्वते मते। एकया अन्-आवृत्तिं याति, अन्यया पुनः आवर्तते।। २६।। | These two paths of the world, the bright and the dark, indeed are considered eternal. By one [path] one gains no return [having lots of time to be taught this ब्रह्म-विद्या by Lord ब्रह्मा, or at least no return in this कल्प]. By the other [path], one returns again. (**26**) |

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः ॥८॥

---

| | |
|---|---|
| पार्थ, एते सृती जानन् कश्-चन योगी न मुह्यति। तस्मात् सर्वेषु कालेषु योग-युक्तः भव, अर्जुन ॥ २७ ॥ | O अर्जुन, knowing these two paths, a योगिन् is not deluded. Therefore, at all times, be committed to [a life of seeking Me through] [कर्म-] योग, O अर्जुन. (**27**) |
| इदं विदित्वा यद् पुण्यफलं वेदेषु यज्ञेषु तपःसु दानेषु च एव प्रदिष्टं, तद् सर्वम् योगी अत्येति, आद्यं च परं स्थानम् [अचिरेण] उपैति ॥ २८ ॥ | Knowing this [My answers to your seven questions], a योगिन् goes beyond all that karmic merit [spent for heaven-going] that is revealed [to accrue] in [reciting] the वेद-s, in rituals, in prayerful disciplines, and in charity. And that one [immediately] attains the ultimate abode, [which is Me] the origin. (**28**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे अक्षर-ब्रह्म-योगः नाम अष्टमः अध्यायः ॥ ८ ॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the eighth chapter, called "The Topic of the Imperishable Reality," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 9 राज-विद्या-राज-गुह्य-योग

## The Topic of King of All Knowledge, King of All Secrets

**विद्या** ***vidyā*** (*vid-y*[*a*]-*ā́*) *f.* (*fr.* √विद् ज्ञाने know) ज्ञान knowledge, science, discipline of knowledge.

# Chapter 9 राज-विद्या-राज-गुह्य-योग

## The Topic of King of All Knowledge, King of All Secrets

Chapter 9 explains the relationship between this manifest universe and the Lord. This "relationship" is peculiar: The Lord is timeless and spaceless, yet manifests to us as time and space and as all within time and space. The Lord describes it thus: "All beings exist in Me, but I am not in them. Beings do not exist in Me… My आत्मन् produces things, sustains things, but does not exist in things" (*see* 9.4–5). This peculiar "relationship," like a secret (4.2–3, 9.1–2, 11.1, 15.20, and 18.63–64, 18.68, and 18.75), needs to be revealed by one who knows.

There are various analogies to understand this "relationship." The analogy that the Lord gives in this chapter (9.6) is that of air within space. This analogy requires some understanding of उपनिषद् cosmogony. *Space* means dimension and *air* means movement. Movement arises from there being dimension; without dimension there is no movement. The understanding of movement must include dimension, but dimension does not require movement, nor is it changed in any way by this movement. Movement comes and goes within dimension, but, from the standpoint of movement, dimension always exists. Yet, dimension does not exist as a separate, limited entity within or outside movement.

Other analogies can also help us understand this "relationship" between this manifest universe and the Lord. The manifest within the Lord can be likened to clay pots within the world of clay. All clay pots are nothing but clay. You cannot take away clay and still have a clay pot. Before, during, and after the existence of a clay pot, there is only clay. Clay is the *material cause* (उपादान-कारण, *upādāna-kāraṇa*) of a clay pot, but a clay pot is not a separate entity from clay. *Pot* is just a name we give to clay in a particular form. Being simply a name and form we attribute to clay, a pot itself does not have within its nature clay—because it could just as well be a metal or glass pot. *Pot* or *plate* is just an adjective we give to clay. Similarly, this universe of entities is simply the various names we give to forms appearing in existence-awareness (in the Lord).

Another analogy is a dream within you, the dreamer. The dream and the entities within the dream exist in you. But as real, separate entities, they do not exist in you. The dream is you, but you are not the dream. You alone are the permanent, unaffected existence within which the dream world comes and goes, cycles in and out of manifestation. Once you wake up, the particular problems of the dream disappear; you are "freed," as it were, from the dream problems. The dream is not a modification of you, the dreamer. Even while within the dream, you are—to the extent you identify yourself with the dream—only notionally, not actually, affected by the problems in the dream. Like the dream world in relation to you, the dreamer, this universe is a lower level of reality within the real you, like असत् (*asat*) to सत् (*sat*), the unreal to the real.

As has already been taught, the real you is nothing but the Lord. The universe is "related" to the real you, आत्मन्, in the same way as it is to the Lord. Yet, out of ignorance, we think we are born into and die from this world and that we travel to heavenly or hellish realms within this universe.

# अथ नवमोऽध्यायः

श्रीभगवानुवाच।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

---

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

---

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥ ३ ॥

---

## Ninth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। इदं तु गुह्यतमं ज्ञानं विज्ञान-सहितं ते (=तुभ्यम्) अन्-असूयवे प्रवक्ष्यामि, यद् ज्ञात्वा अ-शुभात् मोक्ष्यसे॥१॥ | The Lord said: —Whereas [apart from that traveling to heavens, such as ब्रह्म-लोक (8.16)] I will tell to you, who are not cynical, this most secret knowledge—along with its assimilation—knowing which [in this life], you will be freed from the unpleasant [life of becoming; i.e., from संसार]. (**1**) |
| इदं [ज्ञानं] राज-विद्या, राज-गुह्यम्, उत्तमं पवित्रं, प्रत्यक्ष-अवगमं, धर्म्यं, सु-सुखं कर्तुम्, अव्ययं [च]॥२॥ | This [knowledge] is the king [i.e., final authority] of [all] knowledge, the king of [all] secrets, the greatest purifier, directly known [once ignorance is removed], in keeping with धर्म, very easy to attain, and imperishable [because it is one's self and so never lost]. (**2**) |
| परन्-तप, अस्य धर्मस्य अ-श्रद्-दधानाः पुरुषाः माम् अ-प्राप्य मृत्यु-संसार-वर्त्मनि निवर्तन्ते॥३॥ | O अर्जुन, people having no trust for this धर्म [i.e., ज्ञान, which is धर्म्य] do not attain Me and return [i.e., remain] on the path of संसार (life of becoming) [filled] with death. (**3**) |

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

| | |
|---|---|
| मया अ-व्यक्त-मूर्तिना इदं सर्वं जगत् ततम्। सर्व-भूतानि मत्-स्थानि, अहं च तेषु न अवस्थितः॥४॥ | This entire universe is pervaded by Me as a form not manifest [to the senses]. All beings exist in [i.e., are because of] Me, but I am not in [i.e., because of] them [like clay pots subsist in/are because of clay, but the world of clay does not subsist in/is not because of pots].(**4**) |
| न च भूतानि मत्-स्थानि। मे ऐश्वरं योगं पश्य। मम आत्मा भूत-भावनः, भूत-भृत्, न च भूत-स्थः॥५॥ | [—Yet] [as separate] beings [they] do not exist in Me. Look at My Lordly योग (connection to/attainment in) [the world]! My आत्मा (self, the self of all) produces [all] things [all names and forms], sustains [all] things, but does not exist in [i.e., is not dependent on] [these] things. (**5**) |
| यथा सर्वत्र-गः महान् वायुः नित्यम् आकाश-स्थितः, तथा सर्वाणि भूतानि मत्-स्थानि इति उपधारय॥६॥ | Just as the vast air, which moves everywhere, always exists within space; similarly, please understand that all beings [all names and forms] exist within Me [i.e., are always within—yet are not polluting, are not separate from, are not other than Me]. (**6**) |

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

---

| | |
|---|---|
| कौन्तेय, कल्प-क्षये सर्व-भूतानि मामिकां प्रकृतिं यान्ति। पुनः कल्प-आदौ अहं तानि विसृजामि॥७॥ | O अर्जुन, at the end of the कल्प (manifestation cycle, the start of night for Lord ब्रह्मा), all beings go into My प्रकृति (माया) [i.e., become unmanifest]. Again, at the beginning of the manifestation cycle, I project [i.e., remanifest] them [i.e., their bodies and minds] [from My माया]. (**7**) |
| स्वां प्रकृतिम् अवष्टभ्य, इमं कृत्स्नं भूत-ग्रामम् अ-वशं प्रकृतेः वशात् पुनः पुनः विसृजामि॥८॥ | Having control over [i.e., not deluded by] My प्रकृति, again and again [each कल्प] I project this entire group of beings without [their or My] will, by the force [in the form of all the कर्मन्-s of all the जीव-s] of प्रकृति (of माया). (**8**) |
| धनञ्-जय, तानि च कर्माणि माम् उदासीनवत् आसीनं तेषु [च] कर्मसु अ-सक्तं न निबध्नन्ति॥९॥ | O अर्जुन, these कर्मन्-s (actions and their results) do not bind Me, who is seated [here as the basis of प्रकृति], seemingly indifferent [being its mere conscious witness] and unattached toward these कर्मन्-s. (**9**) |

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

---

| | |
|---|---|
| मया अध्यक्षेण प्रकृतिः स-चर-अ-चरं सूयते। कौन्तेय, अनेन हेतुना जगत् विपरिवर्तते॥१०॥ | Because of Me, the overseer, प्रकृति begets [all] that moves and does not move [or is sentient and insentient]. For this reason [i.e., Me], O अर्जुन, the universe revolves [in and out of manifestation]. (**10**) |
| भूत-महा-ईश्वरं मम परं भावम् अ-जानन्तः, मूढाः मां मानुषीं तनुम् आश्रितम् अवजानन्ति॥११॥ | Not knowing My limitless nature, as the Lord of [all] beings, the deluded disregard Me, who obtains [as the self, as I] in [this and every] human body. (**11**) |
| मोघ-आशाः मोघ-कर्माणः मोघ-ज्ञानाः वि-चेतसः राक्षसीम् आसुरीं च (=वा) एव मोहिनीं प्रकृतिं श्रिताः॥१२॥ | Those whose hopes are in vain [are still unhappy], whose actions are in vain [are still incomplete], whose knowledge is in vain [are still ignorant of Me/reality], and who lack discernment—they tend toward a deluding disposition that is राक्षसी (criminal) or आसुरी (barbaric). (**12**) |

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

---

| | |
|---|---|
| पार्थ, महा-आत्मानः तु दैवीं प्रकृतिम् आश्रिताः, अन्-अन्य-मनसः, माम् अ-व्ययं भूत-आदिं ज्ञात्वा, [मां] भजन्ति॥१३॥ | —Whereas, O अर्जुन, the wise [i.e., the discerning]—who tend toward a disposition that is दैवी (uplifting), whose mind [seeks] no other [than Me], knowing [of] Me as the changeless source of beings—they seek [Me]. (**13**) |
| मां स-ततं कीर्तयन्तः यतन्तः च दृढ-व्रताः मां च नमस्यन्तः भक्त्या नित्य-युक्ताः [माम्] उपासते॥१४॥ | Always acknowledging Me and making [proper] effort [to gain Me], [those] whose commitment is firm, surrendering to Me, always united [to Me] with devotion—they [the कर्म-योगिन्-s] seek [Me]. (**14**) |
| अन्ये च अपि ज्ञान-यज्ञेन यजन्तः, मां विश्वतो-मुखम् एकत्वेन पृथक्त्वेन [च] बहुधा उपासते॥१५॥ | And still others [ज्ञान-योगिन्-s, सन्न्यासिन्-s], worshipping [Me] through the यज्ञ that is knowledge, seek Me—whose face is everywhere, in many ways—as being one [i.e., "(Separate) beings do not exist in Me" (*see* 9.5)] and as being distinct [i.e., "(All) beings exist in Me" (*see* 9.4)]. (**15**) |

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ १७ ॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

| | |
|---|---|
| अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् एव आज्यम्, अहम् अग्निः, अहं [च] हुतम्॥१६॥ | The Vedic ritual is Me, the act of worship is Me, the food [offered to the ancestors] is Me, the food [offered to the Lord] is Me, the chant is Me, the clarified butter [warmed by the sun, offered into the fire] is Me, the [sacrificial] fire is Me, and the oblation is Me. (**16**) |
| अहम् अस्य जगतः पिता, माता, पिता-महः, धाता [च]। [अहं] वेद्यं, पवित्रम्, ओङ्-कारः, ऋक्, साम, यजुः एव च॥१७॥ | The father [efficient cause], mother [material cause], [My own] grandfather [i.e., the uncaused cause], and the sustainer of this universe are Me. The [only] one to be known, the purifier, "ओम्" [My name], the ऋग्-वेद, the साम-वेद, and the यजुर्-वेद [are Me]. (**17**) |
| [अहं] गतिः, भर्ता, प्रभुः, साक्षी, निवासः, शरणं, सु-हृद् [च]। [अहं] प्रभवः, प्रलयः, स्थानं, निधानं, अ-व्ययं [च] बीजम्॥१८॥ | The goal, the nourisher, the Lord, the [only] witness [of everything], the abode, the shelter, and the friend [are Me]. The origin, the dissolution, the continued existence, the receptacle, and the imperishable seed [i.e., continual cause of everything] [are Me]. (**18**) |

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ २१ ॥

---

| | |
|---|---|
| अहं तपामि। अहं वर्षं निगृह्णामि उत्सृजामि च। [अहं] अ-मृतं च एव मृत्युः च। अहं सत् अ-सत् च, अर्जुन॥१९॥ | I heat. I hold back and give forth the rain. The immortality [of the gods] and also the death [of mortals] [is Me]. Both reality [i.e., the sustaining cause] and unreality [i.e., the time-bound effects] is Me, O अर्जुन. (**19**) |
| त्रै-विद्याः सोम-पाः पूत-पापाः, मां यज्ञैः इष्ट्वा, स्वर्-गतिं प्रार्थयन्ते। पुण्यं सुर-इन्द्र-लोकम् आसाद्य, ते दिवि दिव्यान् देव-भोगान् अश्नन्ति॥२०॥ | Those versed in the three वेद-s, who drink [i.e., participate in] the सोम [ritual], [and thus are relatively] cleansed of karmic demerit, propitiating Me with rituals—they pray for going to heaven. Attaining the world of Lord इन्द्र as [a result of their] पुण्य, they enjoy heavenly experiences of the celestials in heaven. (**20**) |
| ते तं विशालं स्वर्-ग-लोकं भुक्त्वा, पुण्ये क्षीणे, मर्त्य-लोकं विशन्ति। एवं त्रयी-धर्मम् अनुप्रपन्नाः काम-कामाः गत-आगतं लभन्ते॥२१॥ | Having enjoyed that vast [subtle] world [called] heaven, when [their] पुण्य is spent, they [re-]enter the world of mortals. In this manner, following ritual [enjoined] by the three [श्रुति-s, the three वेद-s], those who require objects of desire take to coming and going [i.e., remain in संसार]. (**21**) |

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ २३ ॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

| | |
|---|---|
| ये जनाः अन्-अन्याः मां चिन्तयन्तः [मां] पर्युपासते, तेषां नित्य-अभियुक्तानाम् अहं योग-क्षेमं वहामि॥ २२॥ | [But] for those people who are not separate [from Me], who contemplate Me and gain [Me], being always one [with Me], I procure what [they] want to acquire and protect [i.e., I, the Lord, take care of the bodily and mental needs of these सन्न्यासिन्-s]. (**22**) |
| कौन्तेय, ये अपि अन्य-देवता-भक्ताः श्रद्धया अन्विताः यजन्ते, ते अपि माम् एव यजन्ति [परन्तु] अ-विधि-पूर्वकम्॥ २३॥ | O अर्जुन, even those who are devoted to deities as different [from Me and themselves]—who, filled with faith, perform [various] acts of worship—they also worship only Me, [but] not in accordance to a [valid] means [of knowing Me, the Lord, who is each of these deities]. (**23**) |
| अहं हि सर्व-यज्ञानां भोक्ता च प्रभुः एव च, मां तु तत्त्वेन न अभिजानन्ति। अतः ते च्यवन्ति॥ २४॥ | I am indeed the experiencer [i.e., recipient] of all यज्ञ-s (acts of worship) and the only Lord, but they do not know Me in reality. Therefore, they fall away [i.e., they lose Me out of ignorance]. (**24**) |

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

| | |
|---|---|
| देव-व्रताः देवान् यान्ति। पितृ-व्रताः पितॄन् यान्ति। भूत-इज्याः भूतानि यान्ति। मद्-याजिनः अपि मां यान्ति॥ २५॥ | Those who have commitment to the deities reach the [world of] deities. Those who have commitment to the ancestors reach the [world of] ancestors. Those who worship spirits reach the [world of] spirits. And those who are disposed to worship Me reach Me. (**25**) |
| यः मे पत्रं पुष्पं फलं तोयं भक्त्या प्रयच्छति, अहं तद् प्रयत-आत्मनः भक्ति-उपहृतम् अश्नामि॥ २६॥ | The one who offers to Me with devotion a leaf, a flower, a fruit, water—I receive that as offered out of the devotion of one whose mind is mastered [to that extent—to the extent that one acknowledges Me, the Lord, and can act on that acknowledgment]. (**26**) |
| कौन्तेय, यद् करोषि, यद् अश्नासि, यद् जुहोषि, यद् ददासि, यद् तपस्यसि तद् मद्-अर्पणं कुरुष्व॥ २७॥ | O अर्जुन, whatever you do, whatever you eat, whatever worship you perform, whatever you give, whatever discipline you undertake—that may you do as an offering to Me [as a कर्म-योग meant for gaining a mind that can know Me, not to get some small result]. (**27**) |

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
सन्न्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

---

| | |
|---|---|
| एवं शुभ-अ-शुभ-फलैः कर्म-बन्धनैः मोक्ष्यसे। सन्न्यास-योग-युक्त-आत्मा विमुक्तः [सन्] माम् उपैष्यसि॥ २८॥ | In this manner you will be freed from the bondage that is कर्मन्, which has [or is in the form of] pleasant and unpleasant results. [Being] one whose mind is endowed with [such] renunciation and with [कर्म-] योग and [to that extent] freed, you will attain Me. (**28**) |
| अहं सर्व-भूतेषु समः [अस्मि]। मे न द्वेष्यः न प्रियः [वा] अस्ति। ये तु मां भक्त्या भजन्ति, ते मयि, अहं च अपि तेषु॥ २९॥ | I am the सम (same) in all beings. For Me, no one is disfavored or favored. Rather, those who seek Me with devotion—they are in Me and I am also in them. (**29**) |
| अपि चेद् सु-दुर्-आचरः अन्-अन्य-भाक् [सन्] मां भजते, सः साधुः एव मन्तव्यः, सः हि (=यस्मात्) सम्यक् व्यवसितः॥ ३०॥ | Even if one whose conduct was highly maladaptive seeks Me—being one who seeks [Me] as not separate [from oneself]—that one is to be considered a साधु (an accomplished person), because that one is of clear understanding. (**30**) |

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ ॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

---

| | |
|---|---|
| क्षिप्रं [सः] धर्म-आत्मा भवति, शश्वत् शान्तिं निगच्छति। कौन्तेय, मे भक्तः न प्रणश्यति [इति] प्रतिजानीहि॥ ३१॥ | Quickly that [person of maladaptive conduct] becomes one whose mind conforms to धर्म and gains the peace that is ever the same [being the peace that is the nature of oneself]. O अर्जुन, please know that My devotee is never lost. (**31**) |
| पार्थ, ये अपि पाप-योनयः स्युः, तथा स्त्रियः वैश्याः शूद्राः, ते अपि मां हि (=यस्मात्) व्यपाश्रित्य परां गतिं यान्ति॥ ३२॥ | O अर्जुन, even those whose birth would be unwanted [e.g., born into a criminal or barbaric family]—also women, merchants, and laborers—they, too, because they take refuge in Me, gain the ultimate end. (**32**) |
| किं पुनः पुण्याः भक्ताः ब्राह्मणाः, तथा राज-ऋषयः। इमम् अ-नित्यम् अ-सुखं लोकं प्राप्य, मां भजस्व॥ ३३॥ | What again [to speak of] ब्राह्मण-s [considered to have] virtuous [births], who are devoted; similarly, kings who are also sages [like King जनक, taught by seer/sage याज्ञ-वल्क्य]. Having attained this impermanent and unpleasant लोक [i.e., human embodiment], may you seek Me. (**33**) |

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

---

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥९॥

---

| | |
|---|---|
| मन्-मनाः मद्-भक्तः मद्-याजी भव। मां नमस्-कुरु। एवम् आत्मानं युक्त्वा, मत्-पर-अयणः [सन्] माम् एव एष्यसि॥३४॥ | May you be one whose mind [remains] in Me, devoted to Me, and who performs [all actions as] rituals to Me. Surrender to Me. Having prepared your mind in this way, having Me as the ultimate end, you will attain Me alone. (**34**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे राज-विद्या-राज-गुह्य-योगः नाम नवमः अध्यायः॥९॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the ninth chapter, called "The Topic of the King of All Knowledge, the King of All Secrets," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 10 विभूति-योग

## The Topic of Glories

**विभूति** ***vibhūti*** (*vi̍-bhū-ti*) *f.* (*fr.* √भू सत्तायाम् be) विस्तार extent; ऐश्वर्य glory.

# Chapter 10 विभूति-योग
## The Topic of Glories

Literature is also part of our universe. For अर्जुन, literature includes the पुराण-s (*purāṇa*s, mythologies) and the वेद-s (*Veda*s). Many of the पुराण-s were written after the major उपनिषद्-s (*Upaniṣad*s) and the रामायण (*Rāmāyaṇa*) epic, but before the महा-भारत epic, of which the भगवद् गीता is part. Prior to the पुराण-s, the deities in the वेद-s, including the उपनिषद्-s, were barely personified forces of nature, such as अग्नि (*Agni*, Fire), वायु (*Vāyu*, Wind), and इन्द्र (*Indra*, Mind and king of the deities). The पुराण-s introduced personified deities, such as विष्णु (*Viṣṇu*, Sustainer), शिव (*Śiva*, Destroyer), लक्ष्मी (*Lakṣmī*, Abundance), and सरस्वती (*Sarasvatī*, Culture). The deities of the पुराण-s married, had families and adventures, and got in and out of trouble.

Similar to the shift in literature of natural forces to personified ones is the shift of human characters to deities. In वाल्मीकि-'s (*Vālmīki*'s) original रामायण epic (the story has undergone many retellings), राम (*Rāma*) is a man of धर्म. In the later, poetic retellings of the रामायण story, राम is a deity, an incarnation of Lord विष्णु. The personification of the divine aspects of nature and the divination of human characters have benefits—such as inspiring imaginative minds—but if we overlook the earlier literature, we may fail to appreciate the wonder and glory of the forces of nature and the majesty of life in a purely scientific spirit. We may also lose the culture-free unity inspired by nonpersonified nature deities. For example, a lack of attention to the earlier literature may contribute to one thinking that कृष्ण is superior to राम, or शिव to विष्णु (which is equivalent to a schoolyard argument that "my dad is better than your dad"). The Advaita Vedanta teaching has survived nonetheless, and the blend of the पुराण-s and earlier literatures has indeed blessed us—despite the fractured appearances of Hinduism today.

The महा-भारत epic and the भगवद् गीता present कृष्ण as Lord कृष्ण, an incarnation of Lord विष्णु. However, this teaching would be just as powerful and true if कृष्ण was presented as a man of knowledge who had completely assimilated the knowledge of the identity of himself with the total. If

this were the case, then we would understand that, when He talks about Himself, कृष्ण legitimately talks from the perspective of the Lord (compare *Taittirīya Upaniṣad* 3.10.5–6). This teaching, after all, unfolds the fact that we all are already free and are already the Lord, but we don't know it until we are taught. If we take कृष्ण as a person, a genius who was born already wise, and understand that कृष्ण would have been exposed from childhood to the wonderful literature and culture that confirms the wisdom that one is the self of all, then we would understand these statements He makes about Himself in the light of the पुराण literature. कृष्ण is a special incarnation of the Lord—not born of ignorance.

In this chapter, कृष्ण presents Himself as all the glories (which are described in both sets of literature—the वेद-s and the पुराण-s), since nothing is apart from the Lord. All we see and all we hear and think are but the Lord. This is a powerful acknowledgment of the real basis of this universe and, when that clear vision includes one's self, it is the limitless freedom called मोक्ष. The inclusion of oneself in the vision of the Lord is the difficult step indicated in the beginning and the end of कृष्ण-'s description of His glories (10.20, 10.42). This complete vision is the same as the culmination of the contemplation described earlier (6.10–26) that helps us assimilate this teaching. Meditation or prayer helps us mature into this complete vision until one's self is included inseparably in this vision of the Lord.

# अथ दशमोऽध्यायः

श्रीभगवानुवाच।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

---

## Tenth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। महा-बाहो, भूयः एव मे परमं वचः शृणु। यद् [परमं] प्रीयमाणाय ते (=तुभ्यम्) अहं हित-काम्यया वक्ष्यामि॥१॥ | The Lord said: O अर्जुन, listen again to My words [revealing] the limitless. To you who are pleased at this [which is limitless] I will, with a desire for [your] benefit, [again] expound. (**1**) |
| न सुर-गणाः न महा-ऋषयः मे प्रभवं विदुः, अहं हि (=यस्मात्) सर्वशः देवानां महा-ऋषीणां च आदिः॥२॥ | Neither the hosts of deities nor the great seers/sages know [in detail] My glory, since I am the cause of each and every one of [the embodiments of] the deities and sages. (**2**) |
| यः मां लोक-महा-ईश्वरम् अ-जम् अन्-आदिं च वेत्ति, सः मर्त्येषु अ-सम्मूढः सर्व-पापैः प्रमुच्यते॥३॥ | The one who knows Me, the limitless Lord of the universe, as unborn [i.e., not an effect] and beginningless [i.e., having no cause]—that one, being no longer deluded among mortals, is freed from all पाप-s (everything unwanted). (**3**) |

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ ७ ॥

| | |
|---|---|
| बुद्धिः, ज्ञानम्, अ-सम्मोहः, क्षमा, सत्यं, दमः, शमः, सुखं, दुःखं, भवः, अ-भावः, भयं च, अ-भयम् एव च, अ-हिंसा, समता, तुष्टिः, तपः, दानं, यशः, अ-यशः — भूतानां पृथग्-विधाः भावाः मत्तः एव भवन्ति॥ ४–५॥ | From Me alone are [all these] different kinds of things belonging to [living] beings: the capacity to know, knowledge, freedom from delusion, accommodation [i.e., patience and understanding], truthfulness, mastery over [ways of] behavior, mastery over [ways of] thinking, pleasure, pain, birth [including the becoming within change], death [including the un-becoming within change], fear and also fearlessness, harmlessness, equanimity [toward any result], contentment, prayerful discipline, charity, and fame and ill fame. (**4–5**) |
| पूर्वे सप्त महा-ऋषयः तथा चत्वारः मनवः मद्-भावाः मानसाः जाताः, येषां लोके इमाः प्रजाः॥ ६॥ | The ancient, seven seers and four मनु-s [progenitors of the four social lineages], whose minds [were resolved] in Me, were born from [My] mind [i.e., via हिरण्य-गर्भ]. Of them, [all] these people in the world [were born]. (**6**) |
| यः एतां विभूतिं मम योगं च तत्त्वतः वेत्ति, सः अ-विकम्पेन योगेन युज्यते, अत्र न संशयः॥ ७॥ | The one who knows in truth this glory and My [ऐश्वर्य] योग (connection to/attainment in) [the world]—that one is endowed with an unshakable योग (vision of sameness). In this there is no doubt. (**7**) |

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ ८ ॥

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ ९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १० ॥

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

---

| | |
|---|---|
| अहं सर्वस्य प्रभवः, मत्तः सर्वं प्रवर्तते इति मत्वा बुधाः भाव-समन्विताः मां भजन्ते (=प्राप्नुवन्ति)॥८॥ | I am the source of everything and because of Me everything continues. Knowing this, the wise, endowed with [this] भाव (vision—initially an attitude giving relative freedom, then a clear knowledge giving complete freedom), [thus] attain Me. (**8**) |
| मच्-चित्ताः मद्-गत-प्राणाः परस्-परं बोधयन्तः मां च नित्यं कथयन्तः — [ते] तुष्यन्ति च रमन्ति च॥९॥ | Those whose mind is centered on Me, whose powers [of sensing and action] are resolved in Me, teaching one another [i.e., maintaining this teaching tradition], and always telling about Me—they are satisfied [not needing anything else] and happy [in Me]. (**9**) |
| तेषां सतत-युक्तानां प्रीति-पूर्वकं भजतां तं बुद्धि-योगं ददामि, येन ते माम् उपयान्ति॥१०॥ | For those who are always committed and worship [Me] with love, I give the attainment through knowledge by which they gain Me. (**10**) |
| तेषाम् एव अनुकम्पा-अर्थम् अहम् आत्म-भाव-स्थः अ-ज्ञान-जं तमः ज्ञान-दीपेन भास्वता नाशयामि॥११॥ | Out of compassion for them alone, I, attaining in [every] thought in the mind [as the conscious I itself], destroy the darkness [i.e., delusion] born of ignorance—with the shining oil lamp that is knowledge. (**11**) |

अर्जुन उवाच।
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

---

| | |
|---|---|
| अर्जुनः उवाच। भवान् परं ब्रह्म, परं धाम, परमं पवित्रम्। शाश्वतं पुरुषं, दिव्यम् आदि-देवम्, अ-जं, विभुं [इति] त्वां सर्वे ऋषयः देव-ऋषिः नार-दः तथा असितः देवलः व्यासः आहुः। स्वयं च एव मे ब्रवीषि॥१२–१३॥ | अर्जुन said: You are परं ब्रह्मन् (limitless reality), limitless light [or the ultimate abode], the most purifying. All the sages, the divine sage नारद, similarly [the seers] असित, देवल and व्यास call You "the timeless one who fills everything," the "celestial [i.e., not of this ordinary world] Lord who was there at the beginning—unborn and all pervasive." And You, Yourself, say to me [the same thing]. (**12–13**) |
| एतद् सर्वं यद् मां वदसि ऋतं मन्ये, केशव। भगवन्, न हि देवाः न दानवाः ते व्यक्तिं विदुः॥१४॥ | All this that You tell me, I consider true, O कृष्ण. O Lord, indeed neither the deities nor demons know Your [full] manifestation. (**14**) |
| पुरुष-उत्तम भूत-भावन भूत-ईश देव-देव जगत्-पते, त्वं स्वयम् एव आत्मानम् आत्मना वेत्थ॥१५॥ | O Being Who Transcends, Producer of Beings, Lord of Beings, Lord of the Gods, and Lord of the Universe—You, Yourself alone, know Yourself with [Your] mind. (**15**) |

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥ १७ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥

| | |
|---|---|
| याभिः विभूतिभिः त्वम् इमान् लोकान् व्याप्य तिष्ठसि, [याः] दिव्याः आत्म-विभूतयः हि अ-शेषेण वक्तुम् अर्हसि॥१६॥ | The glories by which You remain, pervading these worlds—[the] extraordinary glories of आत्मन् (Yourself, the self of all)—indeed, You [alone] are able to describe completely. (**16**) |
| योगिन्, कथम् अहं सदा परिचिन्तयन् त्वां विद्याम्। भगवन्, केषु केषु भावेषु च मया चिन्त्यः असि॥१७॥ | O योगिन् [of योगिन्-s], [while] always contemplating [You] everywhere, how should I know You? And, O Lord, in which things are [You] to be meditated on by me? (**17**) |
| जन-अर्दन, आत्मनः योगं विभूतिं च विस्तरेण भूयः कथय, मे हि (=यस्मात्) अ-मृतं शृण्वतः तृप्तिः न अस्ति॥१८॥ | O कृष्ण, please tell again in detail the connection/attainment (योग) of आत्मन् (Yourself, the self of all) and [of Your] glory [in the world], because—in listening to [this] immortal nectar [i.e., the words from the Lord's mouth]—I have no satiation [i.e., I cannot get enough]. (**18**) |

श्रीभगवानुवाच।
हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

| | |
|---|---|
| श्री-भगवान् उवाच।<br>हन्त कुरु-श्रेष्ठ, दिव्याः आत्म-विभूतयः ते (=तुभ्यं) प्राधान्यतः कथयिष्यामि, मे हि (=यस्मात्) विस्तरस्य अन्तः न अस्ति॥१९॥ | The Lord said:<br>Well now, O अर्जुन, I will tell to you the extraordinary glories of My self [the self of all] wherever there is importance, since there is no end to My detailed description. (**19**) |
| गुडाका-ईश, अहं सर्व-भूत-आशय-स्थितः आत्मा। अहं भूतानाम् आदिः च मध्यं च अन्तः एव च॥२०॥ | O अर्जुन, the self [yourself, the I] residing in the mind [i.e., in the seat of thoughts wherein reality is to be acknowledged] of all beings is Me [i.e., "तत् त्वम् असि (that [Lord] you are)"—contemplate on that, O अर्जुन]. The source, the center, and the resolution of [all] beings is Me. (**20**) |
| अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः अस्मि। अहं नक्षत्राणां शशी॥२१॥ | I am, among the twelve sun deities [for the twelve months], [the one called] विष्णु (the one who pervades); among luminaries, the sun with [its] rays; and among the storm deities, [the प्रजा-पति called] मरीचि. Among the [nightly] luminous bodies, the moon is Me. (**21**) |

| | | | | | |
|---|---|---|---|---|---|
| वेदानां | सामवेदोऽस्मि | देवानामस्मि | वासवः । | | |
| इन्द्रियाणां | मनश्चास्मि | भूतानामस्मि | चेतना ॥ | २२ | ॥ |
| रुद्राणां | शङ्करश्चास्मि | वित्तेशो | यक्षरक्षसाम् । | | |
| वसूनां | पावकश्चास्मि | मेरुः | शिखरिणामहम् ॥ | २३ | ॥ |
| पुरोधसां च | मुख्यं मां | विद्धि पार्थ | बृहस्पतिम् । | | |
| सेनानीनामहं | स्कन्दः | सरसामस्मि | सागरः ॥ | २४ | ॥ |

---

| | |
|---|---|
| वेदानां साम-वेदः अस्मि। देवानां वासवः (=इन्द्रः) अस्मि। इन्द्रियाणां च मनः अस्मि। भूतानां चेतना अस्मि॥ २२॥ | I am [the melodious] साम-वेद among the वेद-s. I am Lord इन्द्र among the deities [i.e., among the वसु-s]. And I am the मनस् (mind) among the powers [of perception and action]. I am the faculty of cognition [i.e., बुद्धि] among [all created] things [i.e., the apex of evolution]. (**22**) |
| रुद्राणां च शङ्करः अस्मि। यक्ष-रक्षसां वित्त-ईशः, वसूनां च पावकः अस्मि। शिखरिणां मेरुः अहम्॥ २३॥ | And among the deities of destruction, I am [their source called] शङ्कर (the one who blesses—by removing obstructions). I am, among protectors and stealers of wealth, कुबेर (the Lord of wealth), and Lord अग्नि among the eight वसु-s. I am Mount मेरु among peaks. (**23**) |
| पार्थ, पुरो-धसां च मुख्यं बृहस्-पतिं मां विद्धि। अहं सेना-नीनां स्कन्दः, सरसां सागरः अस्मि॥ २४॥ | And, O अर्जुन, know [Lord इन्द्र-'s priest] बृहस्-पति—the chief among priests in charge—to be Me. I am स्कन्द (the leader of the divine army, also called Lord सुब्रह्मण्य) among army commanders, and the ocean among natural bodies of water. (**24**) |

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥ २७ ॥

---

| | |
|---|---|
| अहं महा-ऋषीणां भृगुः, गिराम् एकम् अ-क्षरम् अस्मि। यज्ञानां जप-यज्ञः, स्थावराणां हिम-आलयः अस्मि॥ २५॥ | I am [the seer/sage and प्रजा-पति, called] भृगु [son of Lord वरुण] among divine sages, and the single syllable [i.e., ओम्] among words. I am, among यज्ञ-s, the यज्ञ that is [the simple, harmless] जप (mental repetition of the Lord's name). And, among mountain ranges, the हिमालय-s. (**25**) |
| [अहं] सर्व-वृक्षाणाम् अश्वत्थः, देव-ऋषीणां च नार-दः, गन्धर्वाणां चित्र-रथः, सिद्धानां कपिलः मुनिः॥ २६॥ | The sacred fig tree [depicted as the tree of संसार] among trees, [the popular, trickster sage] नारद among the celestial sages, चित्र-रथ [the king] among divine musicians, and the seer/sage कपिल among सिद्ध-s (a class of sages born already wise from deities) [are Me]. (**26**) |
| अश्वानाम् अ-मृत-उद्भवम् उच्चैः-श्रवसं, गज-इन्द्राणाम् ऐरावतं, नराणां च नर-अधिपं मां विद्धि॥ २७॥ | Know among horses [Lord इन्द्र-'s white steed called] उच्चैः-श्रवस्, born from [the gods and demons churning the primordial milky ocean for] the immortal nectar; [Lord इन्द्र-'s white] ऐरावत among noble elephants; and, among people, the king—[know all to be] Me. (**27**) |

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

---

| | |
|---|---|
| अहम् आयुधानां वज्रं, धेनूनां काम-धुक् अस्मि। प्रजनः च कन्-दर्पः अस्मि। सर्पाणां वासुकिः अस्मि॥ २८॥ | I am [Lord इन्द्र-'s] lightning bolt among weapons and काम-धेनु (the wish-fulfilling cow) among cows. I am the deity that is desire [for immortality] who causes progeny. I am [the divine, poisonous king of snakes used to churn the primordial milky ocean] वासुकि among snakes. (**28**) |
| नागानां च अन्-अन्तः अस्मि। यादसां वरुणः अहम्। पितॄणां च अर्यमा अस्मि। संयमतां यमः अहम्॥ २९॥ | And I am अनन्त [on whom Lord विष्णु reclines] among [many-headed] snakes. I am [the Lord of water] वरुण among creatures [and deities] of water. I am [the king of the ancestors called] अर्यमन् among the ancestors. I am [the feared] यम (Lord Death) among discipliners. (**29**) |
| दैत्यानां च प्रह्लादः अस्मि। कलयतां कालः अहम्। अहं च मृगाणां मृग-इन्द्रः, पक्षिणां च वैनतेयः (=गरुडः)॥ ३०॥ | And I am [the demon-yet-नारायण-devotee called] प्रह्लाद among the demons [born of दिति]. I am time [itself] among those who calculate [time]. I am [the fearless king of beasts] the lion among wild animals, and [विष्णु-'s high-flying devotee] गरुड among birds. (**30**) |

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥

| | |
|---|---|
| पवतां पवनः अस्मि। शस्त्र-भृतां रामः अहम्। झषाणां च मकरः अस्मि। स्रोतसां जाह्नवी (=गङ्गा) अस्मि॥ ३१॥ | I am the wind among those that purify. I am [one of My अवतार-s, the embodiment of धर्म] Lord राम among those who wield weapons. I am [a type of dangerous water beast] मकर among aquatic creatures. I am the [sacred] river गङ्गा among rivers. (**31**) |
| सर्गाणाम् आदिः, मध्यं च, अन्तः एव च अहम्, अर्जुन। विद्यानाम् अध्यात्म-विद्या, प्रवदतां वादः अहम्॥ ३२॥ | I am the source, the center, and the resolution of the cycles of manifestation [of the universe], O अर्जुन. I am knowledge centered on the self [amounting to मोक्ष] among [all forms of] knowledge, and the discussion [that leads to truth] among those who discuss. (**32**) |
| अक्षराणाम् अकारः, सामासिकस्य च द्वन्-द्वः अस्मि। अहम् एव अ-क्षयः कालः। अहं विश्वतो-मुखः धाता॥ ३३॥ | I am [the initial] letter [or simplest and most common sound] *a* among the letters [or sounds] of the alphabet, and the list compound[5] [where importance is the same, सम, in each member] among compounds. Ceaseless time is Me. The all-pervasive giver [of कर्म-फल-s] is Me. (**33**) |

[5] A list compound (द्वन्द्व-समास) is a Sanskrit grammatical formation where two or more words are combined together, with an understood *and/or* connection between them; e.g., देश-काल (space and time) (see *The Aruna Sanskrit Grammar Reference* **6.40:**).

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४ ॥

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥

---

| | |
|---|---|
| सर्व-हरः च मृत्युः, भविष्यतां च उद्भवः अहम्। नारीणां कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा च [अहम्] ॥ ३४ ॥ | And I am मृत्यु (Lord Death) [as] the one who takes away everything [i.e., your life], and prosperity among what will be. Among feminine [संस्कृत words], [I am] *fame*, *wealth*, *speech*, *memory*, *the capacity to retain [what is learned]*, *resolve*, and *accommodation*. (**34**) |
| तथा साम्नां बृहत्-साम, छन्दसां गायत्री अहम्। मासानां मार्ग-शीर्षः, ऋतूनां कुसुम-आकरः अहम् ॥ ३५ ॥ | Similarly I am the [prominent] साम-वेद verses [sung] in the बृहती [meter] among साम-वेद verses, and the [most famous verse, called] गायत्री among [all] verses of the वेद. I am [the cool] November/December among lunar months and the flowering spring among seasons. (**35**) |
| छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। सत्त्ववतां सत्त्वम् अहम् ॥ ३६ ॥ | I am the [royal] game of dice among those that deceive. I am the brilliance of the brilliant. I am victory. I am clarity in thinking. I am the सत्त्व (contemplative disposition) among the contemplative. (**36**) |

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

| | |
|---|---|
| वृष्णीनां वासु-देवः, पाण्डवानां धनञ्-जयः अस्मि। अहम् अपि मुनीनां व्यासः, कवीनाम् उशना कविः (=शुक्राचार्य)॥ ३७॥ | I am, among the वृष्णि clan, [Mr.] कृष्ण; among पाण्डु-'s sons, [you, the award-winning] अर्जुन. Among sages, also, वेद-व्यास [another name or title for व्यास, who is composing this epic] and, among seers, the seer शुक्राचार्य [the wise but unheeded counselor to the demons] are Me. (**37**) |
| दमयतां दण्डः अस्मि। जिगीषतां नीतिः अस्मि। गुह्यानां च एव मौनम् अस्मि। ज्ञानवतां ज्ञानम् अहम्॥ ३८॥ | I am the rod among those that tame. I am the process of justice among those who desire victory. I am silence among secrets. I am the knowledge among those who have knowledge. (**38**) |
| यद् च सर्व-भूतानां बीजं तद् अपि अहम्, अर्जुन। यद् मया विना स्यात्, तद् चर-अ-चरं भूतं न अस्ति॥ ३९॥ | Moreover, what is the बीज (seed, or efficient cause—निमित्त-कारण, intelligent cause) of all things, that also I am, O अर्जुन. There is no moveable or immovable [sentient or insentient] being that can exist without Me [as both the efficient cause and material cause of the universe]. (**39**) |
| मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, परन्-तप। मया तु एषः विभूतेः विस्तरः उद्देशतः प्रोक्तः॥ ४०॥ | There is no end to My divine glories, O अर्जुन. Rather, I have told [only] in part this detailed description of [My] glory. (**40**) |

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥ ४१ ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥१०॥

---

| | |
|---|---|
| यद् यद् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं, तद् तद् एव मम तेजो-अंश-सम्भवं त्वम् अवगच्छ॥४१॥ | Whatever entity has glory, has wealth, or is indeed powerful—that itself, may you know, is born of a fraction of My power. [No one is the author of any glory, so arrogance or jealousy regarding these glories is baseless. Knowing this brings relative freedom.] (**41**) |
| अथवा एतेन बहुना तव ज्ञातेन किम्, अर्जुन। अहम् इदं कृत्स्नं जगत् एक-अंशेन विष्टभ्य स्थितः॥४२॥ | —But, rather, what [is gained] by your knowing [just] this much [about Me], O अर्जुन? I remain sustaining this entire universe with [just] a fraction [of My self]. [The whole, infinite Me includes everything, including you. Knowing this brings complete freedom.] (**42**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे विभूति-योगः नाम दशमः अध्यायः॥१०॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the tenth chapter, called "The Topic of Glories," of the [eighteen chapters of] *Songs of the Glorious Lord,* which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] knowledge of ब्रह्मन् and योग. |

# Chapter 11 विश्व-रूप-दर्शन-योग

## The Topic of the Vision of the Cosmic Form

**विश्व** ***viśva*** (*vi̍ś-va*) *prn. a.* (*fr.* √विश् प्राप्तौ attain, अन्तर्गमने enter into) स-कल every, all, entire, समस्त complete; सर्व-गत all-pervading. **विश्व** ***viśva*** *n.* जगत् universe, world. **विश्वाः** ***viśvāḥ*** *m. pl.* दश-गण-देवता-भेद a group of ten deities (*Vasu*, *Satya*, *Kratu*, *Dakṣa*, *Kāla*, *Kāma*, *Dhṛti*, *Kuru*, *Purā-ravas*, and *Mādrava*[*s*]).

# Chapter 11 विश्व-रूप-दर्शन-योग

## The Topic of the Vision of the Cosmic Form

Now अर्जुन makes a bold claim that is common among new students to this teaching. He says, "OK, I get it!" But what अर्जुन "gets" is a particular concept; he has not fully assimilated the teaching. We know this because his next request is to especially experience the vision of this teaching. And the vision of this teaching is not a special experience.

The culmination of this teaching is a complete vision, a complete knowledge, of the all—including, inseparably, oneself—so every single experience, no matter how mundane, is immediately assimilated within this complete vision. This complete vision cannot be lost—because it is not an experience; it is simply knowledge. Once gained, it cannot be forgotten. Just as one cannot forget that one exists, one cannot forget—once clearly known—that one exists free of limitations.

If we think that there is some special enlightenment experience in the future to be reached, then we simply are not yet clear in this knowledge and what the complete vision is. It is often confused with a kind of समाधि in meditation, wherein the experiential subject/object separation disappears for a time. That is just what it is: a temporary experience that can be produced with a lot of practice. We all naturally have a very similar experience when we have a good night's sleep. Like when we wake from sleep, when we get up from meditation we aren't wiser. We simply get up with new information that such a nice experience happens and thus is possible. Like with sleep, we only know we had that special experience when it is over. How that experience could ever be confused with enlightenment is a wonder. A temporary मोक्ष is hardly a मोक्ष. It is like a prisoner getting out of jail for a few minutes every other day. At first it is something to look forward to, but eventually it becomes just another frustration; the person remains a prisoner.

That said; the mind is capable of such epiphanies. These are natural and may be triggered by a breakthrough at some level in understanding oneself or the world, or even mechanically by certain physical or mental practices. These epiphanies can occur, but they are not the permanent, assimilated

vision—the knowledge—that is unfolded by the Lord in the भगवद् गीता. In the Lord's teaching, the real knowledge is of what is, always has been, and always will be (2.16–25). It is knowledge of the timeless reality as one's self right now. It is not knowledge of what will be for a certain time and remembered later. It is a vision that, once gained, is never lost. This is especially indicated in verses 6.27–31 and 9.1–2.

Yet, in chapter 11, अर्जुन naively asks कृष्ण for a special perception of the Lord. Lord कृष्ण indulges him, as only कृष्ण can—as a friend and also as a teacher—to tamp down अर्जुन-'s boastful claim. He temporarily gives अर्जुन a special sight of the infinite Lord. But though the vision starts wonderfully, अर्जुन soon becomes fearful—because he has not assimilated his self in his understanding of the Lord. He feels overwhelmingly limited by what he sees as "out there" in this infinite sight, and this exacerbates the already existing fear in his heart. This fear, naturally occurring in the human heart, is due to the sense of limitation that arises from our perception of all the "others." अर्जुन-'s fear indicates that he has not yet acquired clarity, much less maturity, in the vision of oneness. Maturity in this knowledge first requires clarity, then assimilation in the heart. Habitual doubts and their connected emotions based on our prior ignorance are gradually rendered more and more impotent as we mature in this vision. So this chapter, although seeming to be simply a praise of the Lord, importantly conveys a warning that this teaching is not meant to be additional information about God and life. Rather, it is a transformative, liberating teaching that is to be completely assimilated.

# अथैकादशोऽध्यायः

अर्जुन उवाच।

मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

---

## Eleventh Chapter

| | |
|---|---|
| अर्जुनः उवाच। यद् परमं गुह्यम् अध्यात्म-सञ्ज्ञितं वचः त्वया मद्-अनुग्रहाय उक्तं, तेन अयं मम मोहः विगतः ॥ १॥ | अर्जुन said: This delusion of mine [i.e., lack of discernment about the nature of myself] is gone [i.e., more or less, as questions follow] because of those words, the greatest secret—called the [ज्ञान, knowledge] centered on the आत्मन् (self)—which You told for my blessing. (**1**) |
| कमल-पत्र-अक्ष, मया भूतानां भव-अप्ययौ हि त्वत्तः विस्तरशः श्रुतौ, अ-व्ययम् अपि च माहात्म्यम् [श्रुतम्] ॥ २॥ | O Lotus-Petal Eyes, I have indeed heard from You in detail about the manifestation and dissolution of [all] beings, and also about [Your] imperishable glory. (**2**) |
| यथा त्वम् आत्मानम् आत्थ, परम-ईश्वर, एवम् एतद् ते ऐश्वरं रूपं द्रष्टुम् इच्छामि, पुरुष-उत्तम ॥ ३॥ | Just as You describe Yourself, O Lord—in that way I wish to see this, Your divine form, O Being Who Transcends. (**3**) |

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

श्रीभगवानुवाच।
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

---

| | |
|---|---|
| यदि तद् मया द्रष्टुं शक्यम् इति मन्यसे, प्रभो, योग-ईश्वर, ततः त्वं मे अ-व्ययम् आत्मानं दर्शय॥ ४॥ | If You think that I am able to see that, O Lord, then—O Lord of the Pursuits of योगिन्-s—please show to me [Your] imperishable form. (**4**) |
| श्री-भगवान् उवाच। पार्थ, पश्य शतशः अथ सहस्रशः मे रूपाणि दिव्यानि नाना-विधानि नाना-वर्ण-आकृतीनि च॥ ५॥ | The Lord said: Behold, O अर्जुन, My forms by the hundreds and by the thousands—effulgent, of many varieties, and of many colors and forms. (**5**) |
| पश्य आदित्यान्, वसून्, रुद्रान्, अश्विनौ, तथा मरुतः। पश्य बहूनि अ-दृष्ट-पूर्वाणि आश्चर्याणि, भारत॥ ६॥ | Behold the [twelve] आदित्य-s (sun deities), the [eight] वसु-s (attendant deities to Lord इन्द्र), the [eleven] रुद्र-s (deities of destruction), the [two] अश्विन्-s (charioteers of the sun), and the मरुत्-s (storm deities). Behold [My] many unseen-before wonders, O अर्जुन. (**6**) |

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

सञ्जय उवाच।
एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

---

| | |
|---|---|
| गुडाका-ईश, पश्य अद्य इह मम देहे एक-स्थं कृत्स्नं स-चर-अचरं जगत्, अन्यद् च यद् द्रष्टुम् इच्छसि॥७॥ | Behold, O अर्जुन—now, here in My body, in one place—the entire universe consisting of both the moving and the nonmoving, and whatever else you wish to see. (**7**) |
| अनेन तु स्व-चक्षुषा एव मां द्रष्टुं न शक्यसे। दिव्यं चक्षुः ते (=तुभ्यं) ददामि। पश्य मे ऐश्वरं योगम्॥८॥ | But with just this, your own vision, you cannot see [all of] Me. I give to you an extraordinary [i.e., magical] vision [a capacity to see everything, including the entire subtle universe, and to see into the future]. Behold My Lordly power. (**8**) |
| सञ्जयः उवाच। राजन् [धृत-राष्ट्र], एवम् उक्त्वा, ततः महा-योग-ईश्वरः हरिः पार्थाय परमम् ऐश्वरं रूपं दर्शयामास॥९॥ | सञ्जय said: O King [धृत-राष्ट्र], having spoken thus, then Lord हरि (Lord कृष्ण as the destroyer of all पाप-s), the limitless Lord of pursuits of the योगिन्-s, showed to अर्जुन the limitless form of the Lord. (**9**) |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अनेकवक्त्रनयनम् | | | | अनेकाद्भुतदर्शनम् | । | | |
| अनेकदिव्याभरणं | | | | दिव्यानेकोद्यतायुधम् | ॥ | १० | ॥ |
| दिव्यमाल्याम्बरधरं | | | | दिव्यगन्धानुलेपनम् | । | | |
| सर्वाश्चर्यमयं | | देवमनन्तं | | विश्वतोमुखम् | ॥ | ११ | ॥ |
| दिवि | | सूर्यसहस्रस्य | | भवेद्युगपदुत्थिता | । | | |
| यदि भाः | सदृशी | सा | स्याद्भासस्तस्य | महात्मनः | ॥ | १२ | ॥ |
| तत्रैकस्थं | | जगत्कृत्स्नं | | प्रविभक्तमनेकधा | । | | |
| अपश्यद्देवदेवस्य | | शरीरे | | पाण्डवस्तदा | ॥ | १३ | ॥ |

---

| | |
|---|---|
| [तद् रूपम्] अन्-एक-वक्त्र-नयनम्, अन्-एक-अद्भुत-दर्शनम्, अन्-एक-दिव्य-आभरणं, दिव्य-अन्-एक-उद्यत-आयुधम्॥१०॥ | [That form] consisted of countless mouths and eyes; countless amazing sights; countless celestial ornaments; and countless extraordinary, upraised weapons. (**10**) |
| [तद् रूपम्] दिव्य-माल्य-अम्बर-धरं, दिव्य-गन्ध-अनुलेपनं, सर्व-आश्चर्यमयं, देवम्, अन्-अन्तं, विश्वतो-मुखम्॥११॥ | [That form also] wore celestial garlands and attire, [was anointed] with celestial, fragrant ointment, mostly all a wonder—effulgent, boundless, and in all directions. (**11**) |
| यदि दिवि सूर्य-सहस्रस्य भाः युग-पद् उत्थिता भवेत्, सा तस्य महा-आत्मनः भासः सदृशी स्यात्॥१२॥ | If the brilliance of a thousand suns were to simultaneously arise in the sky, that would be akin to the brilliance of that magnificent form. (**12**) |
| तदा पाण्डवः तत्र देव-देवस्य शरीरे एक-स्थम् अन्-एकधा प्रविभक्तं कृत्स्नं जगत् अपश्यत्॥१३॥ | Then अर्जुन saw in that body of the Lord of deities the entire universe in one place [but] distinctly divided in manifold ways. (**13**) |

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ १४ ॥

---

अर्जुन उवाच।
पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

---

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥ १६ ॥

---

| | |
|---|---|
| ततः सः विस्मय-आविष्टः हृष्ट-रोमा धनञ्-जयः देवं शिरसा प्रणम्य कृत-अञ्जलिः अभाषत॥ १४॥ | Thereupon, that अर्जुन—overwhelmed with awe and with body hairs on end, bowing [his] head to the Lord, with hands folded [in supplication]—spoke. (**14**) |
| अर्जुनः उवाच। देव, पश्यामि तव देहे सर्वान् देवान्, तथा भूत-विशेष-सङ्घान्, ईशं कमल-आसन-स्थं ब्रह्माणं, सर्वान् ऋषीन् च दिव्यान् उर-गान् च॥ १५॥ | अर्जुन said: O Lord, I see in Your body all the deities and hosts of different types of beings, Lord ब्रह्मा seated in the lotus [i.e., in ब्रह्म-लोक within the lotus-like universe], [and] all the sages and celestial serpents. (**15**) |
| त्वाम् अन्-एक-बाहु-उदर-वक्त्र-नेत्रं, सर्वतः अन्-अन्त-रूपं पश्यामि। तव पुनः न अन्तं न मध्यं न आदिं पश्यामि, विश्व-ईश्वर विश्व-रूप॥ १६॥ | I see You as having countless [bodies with] arms, bellies, mouths, and eyes—whose forms are endless in all directions. And I see not Your end, nor middle, nor beginning, O Lord of the Universe whose form is the universe. (**16**) |

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतोदीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९ ॥

---

| | |
|---|---|
| त्वां किरीटिनं गदिनं चक्रिणं च, सर्वतो-दीप्तिमन्तं तेजो-राशिं, दुर्-निरीक्ष्यं समन्तात् दीप्त-अन्-अल-अर्क-द्युतिम्, अ-प्रमेयं पश्यामि॥१७॥ | I see You [i.e., अर्जुन sees the Lord as he would have imagined Him from reading the पुराण-s, and so it was shown by the Lord] with crown, mace, and discus [i.e., the popular Lord विष्णु form]—a mass of brilliance lit up on all sides, whose brilliance on all sides is like blazing fire or the sun, difficult to see and incomprehensible [to the senses]. (**17**) |
| त्वम् अ-क्षरं परमं वेदितव्यं, त्वम् अस्य विश्वस्य परं निधानं, त्वम् अ-व्ययः शाश्वत-धर्म-गोप्ता, त्वं सनातनः पुरुषः मे मतः॥१८॥ | You are thought by me to be the imperishable, limitless [ब्रह्मन्] [that is] to be known, the ultimate basis of this universe, the imperishable protector of the perennially eternal धर्म (laws) [remanifesting during each creation cycle], and the eternal पुरुष (being who fills everything). (**18**) |
| त्वाम् अन्-आदि-मध्य-अन्तम्, अन्-अन्त-वीर्यम्, अन्-अन्त-बाहुं, शशि-सूर्य-नेत्रं, दीप्त-हुत-आश-वक्त्रं, स्व-तेजसा इदं विश्वं तपन्तं पश्यामि॥१९॥ | I see You as having no beginning, middle, or end, [as One] whose power is limitless, whose arms are countless, for whom the moon and the sun are eyes, whose mouths are like blazing हुताश-s (fires, literally "oblation eaters"), and heating this universe with Your radiance. (**19**) |

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

---

| | |
|---|---|
| त्वया एकेन हि इदं द्यावा-पृथिव्योः अन्तरं सर्वाः च दिशः व्याप्तम्। इदं तव रूपम् अद्भुतम् उग्रं [च] दृष्ट्वा लोक-त्रयं प्रव्यथितं, महा-आत्मन्॥ २०॥ | You alone indeed pervade this [space] between heaven and earth [i.e., the subtle to the physical universe] and all the directions. Seeing this, Your form [as separate from themselves]—wondrous and violent—the [beings of the] three worlds are shaken with fear, O Lord. (**20**) |
| अमी सुर-सङ्घाः हि त्वां विशन्ति। के-चिद् भीताः प्राञ्जलयः गृणन्ति। महा-ऋषि-सिद्ध-सङ्घाः "सु-अस्ति" इति उक्त्वा, पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति॥ २१॥ | Those hosts of deities [who have incarnated in the form of the good warriors about to do battle on the field] indeed enter into You [into Death]. Some, frightened, pray with hands folded [in supplication]. The hosts of great sages and divine sages, saying "let there be well-being," worship You with eloquent praise. (**21**) |
| रुद्र-आदित्याः, वसवः, ये च साध्याः, विश्वे, अश्विनौ, मरुतः च, ऊष्मपाः च, गन्धर्व-यक्ष-असुर-सिद्ध-सङ्घाः — सर्वे विस्मिताः एव, त्वां च वीक्षन्ते॥ २२॥ | The [eleven] रुद्र-s and the [twelve] आदित्य-s, the [eight] वसु-s and these [twelve] साध्य-s [deities], the [ten] विश्व-s, the twin अश्विन् deities, the मरुत्-s, certain of the ancestors, and the hosts of celestial musicians, यक्ष-s, असुर-s, and सिद्ध-s—all are indeed struck with wonder and gaze upon You. (**22**) |

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३ ॥

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥ २४ ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

| | |
|---|---|
| महा-बाहो, महत् ते रूपं बहु-वक्त्र-नेत्रं, बहु-बाहु-ऊरु-पादं, बहु-उदरं, बहु-दंष्ट्रा-करालं दृष्ट्वा लोकाः प्रव्यथिताः, तथा अहम्॥ २३॥ | O Mighty Armed, seeing Your immense form—with countless mouths and eyes; with countless arms, thighs, and feet; with countless bellies; and horrible with countless fangs—the people are shaken with fear, and so am I [not understanding my identity with You]. (**23**) |
| त्वां नभः-स्पृशं, दीप्तम् अन्-एक-वर्णं, व्यात्त-आननं, दीप्त-विशाल-नेत्रं दृष्ट्वा हि [अहं] प्रव्यथित-अन्तर्-आत्मा धृतिं शमं च न विन्दामि, विष्णो॥ २४॥ | Indeed, seeing You reaching the sky, blazing with countless appearances, with gaping mouths and brilliant, large eyes—[my] mind shaken with fear—I find no resolve or composure, O Lord विष्णु. (**24**) |
| दंष्ट्रा-करालानि काल-अनल-सन्निभानि च ते मुखानि दृष्ट्वा एव, दिशः न जाने, शर्म न च लभे। प्रसीद, देव-ईश जगन्-निवास॥ २५॥ | Indeed, seeing Your mouths—horrible with fangs and like the fire [at the end] of time [itself] [i.e., at the end of each cycle of the universe]—I know not [i.e., have lost] [my] bearings and have no joy. Be gracious, O Lord of the Deities, Abode of the Universe. (**25**) |

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ २७ ॥

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ २८ ॥

---

| | |
|---|---|
| अवनि-पाल-सङ्घैः सह एव अमी च सर्वे धृत-राष्ट्रस्य पुत्राः, तथा भीष्मः द्रोणः, असौ सूत-पुत्रः, अस्मदीयैः अपि योध-मुख्यैः सह त्वां [विशन्ति] ॥ २६ ॥ | Indeed, along with the host of world rulers, all those sons of धृत-राष्ट्र [enter into You]. Similarly, भीष्म, द्रोण, and the charioteer's son [कर्ण]—along with our prominent warriors also—[all] enter into You [into Death]. (**26**) |
| त्वरमाणाः ते (=तव) दंष्ट्रा-करालानि भयानकानि वक्त्राणि विशन्ति। के-चिद् चूर्णितैः उत्तम-अङ्गैः दशन-अन्तरेषु विलग्नाः सन्दृश्यन्ते ॥ २७ ॥ | Hurrying, they enter into Your frightening mouths [that are] horrible with fangs. Some are clearly seen stuck between [Your] teeth, with [their] heads crushed. (**27**) |
| यथा नदीनां बहवः अभिमुखाः अम्बु-वेगाः समुद्रम् एव द्रवन्ति, तथा अमी नर-लोक-वीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ॥ २८ ॥ | Like the many, converging streams of rivers flow only to the ocean, so those heroes of the world of humans enter into Your flaming mouths. (**28**) |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| यथा | प्रदीप्तं | ज्वलनं | पतङ्गा | विशन्ति | नाशाय | समृद्धवेगाः । | | | |
| तथैव | नाशाय | विशन्ति | लोकास्तवापि | वक्त्राणि | समृद्धवेगाः ॥ | २९ ॥ | | | |
| लेलिह्यसे | ग्रसमानः | समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः । | | | | | | | |
| तेजोभिरापूर्य | जगत्समग्रं | भासस्तवोग्राः | प्रतपन्ति | विष्णो ॥ | ३० ॥ | | | | |
| आख्याहि | मे | को | भवानुग्ररूपो | नमोऽस्तु | ते | देववर | प्रसीद । | | |
| विज्ञातुमिच्छामि | भवन्तमाद्यं | न | हि | प्रजानामि | तव | प्रवृत्तिम् ॥ | ३१ ॥ | | |

| | |
|---|---|
| यथा समृद्ध-वेगाः पतङ्-गाः नाशाय प्रदीप्तं ज्वलनं विशन्ति, तथा एव समृद्ध-वेगाः लोकाः अपि नाशाय तव वक्त्राणि विशन्ति॥ २९॥ | Like moths at full speed enter a burning flame to [their] death, in the very same way [those] people also, at full speed, enter Your mouths to [their] death. (**29**) |
| ज्वलद्भिः वदनैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे। तेजोभिः समग्रं जगत् आपूर्य, तव उग्राः भासः प्रतपन्ति, विष्णो॥ ३०॥ | Completely swallowing all the people with [Your] burning mouths, You repeatedly lick [Your lips as if enjoying this]. Filling the entire universe with [Your] brilliance, Your violent flames burn, O Lord विष्णु. (**30**) |
| कः भवान् उग्र-रूपः। मे आख्याहि। नमः ते अस्तु, देव-वर, प्रसीद। भवन्तम् आद्यं विज्ञातुम् इच्छामि, तव हि (=यस्मात्) प्रवृत्तिं न प्रजानामि॥ ३१॥ | Who are You with [such] a violent form? Please tell me. Let [my] salutation be unto You, O Exalted Among Deities; please be gracious. I wish to clearly know You, the cause [of everything], because Your action I do not understand. (**31**) |

श्रीभगवानुवाच।
कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥

---

| | |
|---|---|
| श्री-भगवान् उवाच।<br>कालः अस्मि लोक-क्षय-कृत् प्रवृद्धः।<br>इह लोकान् समाहर्तुं प्रवृत्तः। त्वाम् ऋते अपि, प्रति-अनीकेषु ये योधाः अवस्थिताः, सर्वे न भविष्यन्ति॥ ३२॥ | The Lord said:<br>I am time who destroys people, expanded [to fill this cosmic form]. Here [now, in this form] [I] undertake to destroy the people. Even without you, all these warriors stationed [here] in the opposing armies will not survive [it being their कर्म-फल to perish]. (**32**) |
| तस्मात् त्वम् उत्तिष्ठ, यशः लभस्व।<br>शत्रून् जित्वा समृद्धं राज्यं भुङ्क्ष्व।<br>मया एव एते पूर्वम् एव निहताः।<br>निमित्तमात्रं भव, सव्य-साचिन्॥ ३३॥ | Therefore, get up and gain fame. Conquering the enemies, may you enjoy the prosperous kingdom. By Me alone these [warriors] have already indeed been destroyed. May you [i.e., your actions] be merely [My] instrument, O अर्जुन (Skilled with the Left Hand). (**33**) |
| द्रोणं, भीष्मं च, जयद्-रथं च, कर्णं च, तथा अन्यान् योध-वीरान् अपि मया हतान् — त्वं जहि। मा व्यथिष्ठा। रणे सपत्नान् जेतासि। [अर्जुन,] युध्यस्व॥ ३४॥ | Please kill द्रोण, भीष्म, जयद्-रथ, and कर्ण, [and] similarly [the] other leaders among [the] warriors also—who [already] have been destroyed by Me [as the giver of their कर्म-फल]. Do not be afraid [that what you are doing is अधर्म; it is not]. In battle you will conquer the enemies. [O अर्जुन] fight. (**34**) |

सञ्जय उवाच।
एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

---

अर्जुन उवाच।
स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥ ३६ ॥

---

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

---

सञ्जयः उवाच।
केशवस्य एतद् वचनं श्रुत्वा वेपमानः किरीटी कृत-अञ्जलिः नमस्-कृत्वा भीत-भीतः प्रणम्य भूयः एव कृष्णं स-गद्गदम् आह॥ ३५॥

सञ्जय said:
Hearing these words of कृष्ण, the trembling अर्जुन (the Crowned One)—with hands folded, bowing, and very frightened, bowing again—spoke with a faltering voice to कृष्ण. (**35**)

---

अर्जुनः उवाच।
हृषीक-ईश, स्थाने तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च, भीतानि रक्षांसि दिशः द्रवन्ति, सर्वे च सिद्ध-सङ्घाः नमस्यन्ति॥ ३६॥

अर्जुन said:
O कृष्ण, it is proper that by the praise of You the world rejoices and is attracted [to You], [while] the frightened demons run in [all] directions, and all the hosts of divine sages surrender [to You]. (**36**)

---

महा-आत्मन्, कस्मात् च ब्रह्मणः अपि गरीयसे आदि-कर्त्रे [च] ते (=तुभ्यं) न नमेरन्। अन्-अन्त देव-ईश जगन्-निवास, त्वं तद् अ-क्षरं परं, यद् सद्-असत्॥ ३७॥

O Lord, why would they not surrender to You who are greater than Lord ब्रह्मा, and [who are] the primal cause? O Limitless, Lord of the Deities, and Abode of the Universe, You are that imperishable परं [ब्रह्मन्], which is both reality and unreality [i.e., both cause and effect, as well as सद्-असत्-परं— beyond both these concepts]. (**37**)

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥ ३८ ॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ४० ॥

---

| | |
|---|---|
| त्वम् आदि-देवः, पुराणः पुरुषः। त्वम् अस्य विश्वस्य परं निधानं। वेत्ता, वेद्यं च, परं च धाम असि। त्वया विश्वं ततम्, अन्-अन्त-रूप॥ ३८॥ | You are [the one existing before] the beginning of the deities, the पुरुष (the being who fills this universe) that is always there. You are the ultimate place of resolution of this universe. You are both the [only] knower and what is to be known, and the ultimate abode. You pervade the universe, O You of Endless Forms. (**38**) |
| त्वं वायुः यमः अग्निः वरुणः शश-अङ्कः प्रजा-पति प्र-पिता-महः च। नमः नमः ते अस्तु, सहस्र-कृत्वः पुनः च भूयः अपि, ते नमः नमः॥ ३९॥ | You are [the deities and the entities] Wind, Death, Fire, Water, and Moon, [as well as] Lord of the Universe and Great-Grandfather [i.e., the uncaused cause of the cause of the universe]. Let there be repeated salutations to You—again and again, a thousand times, repeated salutations to You. (**39**) |
| पुरस्तात् अथ पृष्ठतः ते नमः, सर्वतः एव नमः ते अस्तु, सर्व। त्वम् अन्-अन्त-वीर्य-अ-मित-विक्रमः सर्वं समाप्नोषि। ततः सर्वः असि॥ ४०॥ | Salutation to You in front [of me] and behind [me]. Let there be salutation to You, indeed, in all directions, O Everything. You of infinite power and infinite prowess completely pervade all. Therefore, You are all. (**40**) |

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥

---

अ-च्युत, यद् तव महिमानम् इदम् [रूपं neut., or = इमं महिमानं masc.] अ-जानता मया प्रमादात् प्रणयेन वा अपि सखा इति मत्वा "हे कृष्ण", "हे यादव", "हे सखा" [normally सखे m. sg. voc.] इति प्रसभम् उक्तम्, यद् च विहार-शय्या-आसन- भोजनेषु एकः अथवा तद् समक्षम् अपि अवहास-अर्थम् अ-सत्-कृतः असि — तद् अहं त्वाम् अ-प्रमेयं क्षामये॥ ४१–४२॥

O Changeless, if, not knowing this [form], Your glory—whether out of carelessness or even out of friendship—thinking [You a mere] "friend," I impulsively called out "O [Mr.] कृष्ण," "O यादव [Clansman]," "O Buddy," and if—while walking, lying down, sitting, or eating, alone or even there in public—You have, out of jest, been slighted [i.e., treated as if not there], then I beg the patience and understanding of You who cannot be [separately] known. (**41–42**)

त्वं चर-अ-चरस्य लोकस्य पिता, पूज्यः, अस्य च गरीयान् गुरुः असि। लोक-त्रये अपि त्वत्-समः न अस्ति, कुतः अभ्यधिकः अन्यः, अ-प्रतिम-प्रभाव॥ ४३॥

You are the father of the mobile and immobile world, [alone] to be worshipped, and its venerable teacher. There is no equal to You in even the three worlds [i.e., earth, sky, and heaven], [so] how [could there be] another who is superior, O You of Incomparable Glory? (**43**)

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥ ४५ ॥

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

---

| | |
|---|---|
| तस्मात् प्रणम्य कायं प्रणिधाय अहं त्वाम् ईड्यम् ईशं प्रसादये। पुत्रस्य पिता इव, सख्युः सखा इव, प्रियायाः [normally प्रियाया अर्हसि per **2.30:**, instead of hiatus removing प्रियायार्हसि] प्रियः [इव] सोढुम् अर्हसि, देव॥ ४४॥ | Therefore, bowing and properly prostrating [my] body, I propitiate You who are the worshipful Lord. Like a father [toward his] son, a friend [toward his] friend, and a beloved [toward his] lover [i.e., as my creator, comrade, and the focus of my devotion], you ought to be patient and understanding [toward my mistakes], O Lord. (**44**) |
| अ-दृष्ट-पूर्वं दृष्ट्वा हृषितः अस्मि, भयेन च मे मनः प्रव्यथितम्। देव, तद् रूपम् एव मे दर्शय। प्रसीद, देव-ईश जगन्-निवास॥ ४५॥ | Having seen what was not seen before, I am pleased—and [yet] my mind is shaken with fear. O Lord, please show me that form [as my friend] alone. Be gracious, O Lord of the Deities, the Abode of the Universe. (**45**) |
| तथा एव अहं त्वां किरीटिनं गदिनं चक्र-हस्तं द्रष्टुम् इच्छामि। तेन एव चतुर्-भुजेन रूपेन भव, सहस्र-बाहो विश्व-मूर्ते॥ ४६॥ | [But first], so too, I wish to [again] see You [as before—*as in* 11.17] with crown, mace, and discus in hand [within the cosmic form]. Please be with just that same four-armed form [as Lord विष्णु that I worship as my personal deity, इष्ट-देवता], O Thousand-Armed Whose Form Is the Universe. (**46**) |

श्रीभगवानुवाच।

मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

---

| | |
|---|---|
| श्री-भगवान् उवाच। अर्जुन, प्रसन्नेन मया आत्म-योगात् इदं परं रूपं तव [तुभ्यम् इत्यर्थः] दर्शितं, यद् मे तेजोमयं विश्वम् अन्-अन्तम् आद्यं [रूपं] त्वद्-अन्येन न दृष्ट-पूर्वम्॥ ४७॥ | [Having again taken the popular Lord विष्णु form] the Lord said: O अर्जुन, being pleased, I showed to you through My power this limitless form, which—brilliant, universal, endless, and primal [form] of Me—has not been seen by anyone [other] than you. (**47**) |
| न वेद-यज्ञ-अध्ययनैः, न दानैः, न क्रियाभिः, न च उग्रैः तपोभिः अहम् एवं-रूपः नृ-लोके त्वद्-अन्येन द्रष्टुं शक्यः, कुरु-प्रवीर॥ ४८॥ | Not by study of the वेद-s or of यज्ञ-s, or by charity, or by [performing] rituals, or by vigorous prayerful disciplines can I be seen in such a form in the world of humans by anyone [other] than you, O अर्जुन. (**48**) |
| इदं मम ईदृक् घोरं रूपं दृष्ट्वा, ते व्यथा मा [अस्तु], विमूढ-भावः च मा [अस्तु]। त्वं व्यपेत-भीः प्रीत-मनाः पुनः तद् एव मे रूपम् इदं प्रपश्य॥ ४९॥ | Seeing such a gruesome form as this of Mine, may you have no fear, nor [may] [your] mind [be] confused. Being without fear and of pleased mind again, may you see now that same form of me [as your friend]. (**49**) |

सञ्जय उवाच।
इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥

---

अर्जुन उवाच।
दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

---

श्रीभगवानुवाच।
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ५२ ॥

---

सञ्जयः उवाच।
इति तथा वासु-देवः अर्जुनम् उक्त्वा,
स्वकं रूपं भूयः दर्शयाम्-आस।
महा-आत्मा च सौम्य-वपुः पुनः भूत्वा,
एनं भीतम् आश्वासयाम्-आस॥५०॥

सञ्जय said:
Thus having spoken to अर्जुन, कृष्ण showed again his own [human] form. And, having become again the Lord with a pleasing form, soothed him who was frightened. (**50**)

---

अर्जुनः उवाच।
जन-अर्दन, इदं तव सौम्यं मानुषं रूपं
दृष्ट्वा, इदानीं स-चेताः संवृत्तः प्रकृतिं
[च] गतः अस्मि॥५१॥

अर्जुन said:
O कृष्ण, seeing this, Your pleasing human form, now I have recovered [my] mind and have returned to [my] original disposition. (**51**)

---

श्री-भगवान् उवाच।
यद् इदं मम सु-दुर्-दर्शं रूपं दृष्टवान्
असि, देवाः अपि अस्य रूपस्य नित्यं
दर्शन-काङ्क्षिणः॥५२॥

The Lord said:
This form of Mine that you have seen, which is very difficult to see—even the gods are always desirous of seeing this form. (**52**)

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| नाहं | वेदैर्न | तपसा | न | दानेन | न | चेज्यया । | | |
| शक्य | एवंविधो | द्रष्टुं | दृष्टवानसि | मां | यथा ॥ | ५३ ॥ | | |
| भक्त्या | त्वनन्यया | शक्य | अहमेवंविधोऽर्जुन । | | | | | |
| ज्ञातुं | द्रष्टुं | च | तत्त्वेन | प्रवेष्टुं | च | परन्तप ॥ | ५४ ॥ | |
| मत्कर्मकृन्मत्परमो | मद्भक्तः | सङ्गवर्जितः । | | | | | | |
| निर्वैरः | सर्वभूतेषु | यः | स | मामेति | पाण्डव ॥ | ५५ ॥ | | |

| | |
|---|---|
| यथा मां दृष्टवान् असि, एवं-विधः अहं न वेदैः, न तपसा, न दानेन, न च इज्यया द्रष्टुं शक्यः ॥ ५३ ॥ | In which way you have seen Me, in such a form, I can be seen not by [study of] the वेद-s, or by prayerful discipline, or by charity, or by ritual. (**53**) |
| अर्जुन परन्-तप, अन्-अन्यया तु भक्त्या एवं-विधः अहं तत्त्वेन ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः [normally शक्योऽहम् per **2.32:**, instead of hiatus retaining शक्य अहम् per **2.31:**] ॥ ५४ ॥ | —Whereas, O अर्जुन, Vexer of Foes, [only] by a devotion in which there is no other [outside of Me] am I—in such a form—possible, in truth, to know; to see [not with a magical eye, but with the ज्ञानिन्-'s eye that sees only Me]; and to enter into [i.e., to include oneself as Me]. (**54**) |
| यः मत्-कर्म-कृत्, मत्-परमः, मद्-भक्तः, सङ्ग-वर्जितः, सर्व-भूतेषु निर्-वैरः [च], सः माम् एति, पाण्डव ॥ ५५ ॥ | The one who performs [one's] duty for the sake of [attaining] Me, for whom the paramount [achievement] is Me, who is devoted to Me, free from attachment [as there is only Me], and without hostility toward any being [all of them being Me]—that one attains Me, O अर्जुन. (**55**) |

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः ॥११॥

---

ओं तद् सत्। इति
श्रीमद्-भगवद्-गीतासु उपनिषत्सु
ब्रह्म-विद्यायां योग-शास्त्रे
श्री-कृष्ण-अर्जुन-संवादे
विश्व-रूप-दर्शन-योगः नाम एका-दशः
अध्यायः ॥११॥

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the eleventh chapter, called "The Topic of Vision of the Cosmic Form," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

# Chapter 12 भक्ति-योग

## The Topic of Devotion

**भक्ति** ***bhakti*** (*bhak-ti*ˈ) *f.* (*fr.* √भज् सेवायाम् seek) सेवा seeking, worship, devotion.

# Chapter 12 भक्ति-याग

## The Topic of Devotion

The majesty and power of the physical and subtle universe was presented in the preceding chapter. The individual—who takes himself or herself as trapped within that universe, as a victim of the devouring jaws of time—is naturally afraid of the crushing immensity of everything "out there." But, if one understands that this universe is a single manifestation of the reality that one calls the Lord; that one's body-mind complex, along with its action, is naturally within the order that manifests as this universe; and that the physical and subtle laws that inform this universe are outside of one's control but are certain and just—then one can start to objectively reconcile one's life within the universe.

The results in life are outside of one's control, but the results are always in keeping with one's attitude and effort—because all results are within the cosmic order, which takes all factors into account. Every result is acceptable because every result is naturally in keeping with the entirety of the cosmic order. There is no pseudoscientific "randomness" in nature; there is only order and probability everywhere. Only possibilities exist.

The obvious intelligent design that is inherent in nature is evident as its discoverable laws. All is a manifestation of an order that only intelligence can appreciate. This is the starting point of devotion—appreciating and accepting the Lord, the reality, manifesting as the intelligent order within this cosmic wheel. In this chapter, we can understand devotion as the commitment to gaining this appreciation and acceptance. Devotion is not emotional and it is not intellectual. It is the whole person committing the body and mind to the understanding that this universe is an expression of the Lord as the cosmic order and to living this understanding appropriately.

But the Lord is more than this universe. The universe cycles in and out of manifestation within this reality that is the Lord. This Lord is the untainted reality in which the universe appears, plays itself out, and disappears. At the unchanging core of all beings is reality, the Lord's reality. This reality can be appreciated as having all the glories we see in the universe—this is one appropriate vision. This

reality can also be appreciated as being completely free of and untainted by this universe—this is the other appropriate vision.

In the first verse of chapter 12, अर्जुन has a question as to which of these two visions is most efficacious in one's साधन (*sādhana*, means) of seeking श्रेयस्. The Lord has sanctioned both lifestyles—प्रवृत्ति (*pravṛtti*, pursuit in) and निवृत्ति (*nivṛtti*, withdrawal from) the world (i.e., कर्म-योग and सन्न्यास). कृष्ण again explains in this chapter that both lifestyles and their respective visions given above—appreciating the glories and acting within them, and appreciating being totally free from the glorious universe—are efficacious. But if one is not prepared—if one is still highly identified with the body and mind and is full of desires—then सन्न्यास, the lifestyle wherein one renounces duties in the world and takes only to study and contemplation of the ultimate reality, is a more difficult path. Therefore, कृष्ण recommends कर्म-योग as a better starting point for such a person. This is obvious, but still it has to be explained because there are many people, like अर्जुन, who fancy taking to सन्न्यास—not out of a mature understanding of reality, but as a way to run away from the world and their duties. This seems to have been as common a problem in कृष्ण-'s time as it is today.

# अथ द्वादशोऽध्यायः

अर्जुन उवाच।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

---

श्रीभगवानुवाच।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

---

## Twelfth Chapter

| | |
|---|---|
| अर्जुनः उवाच।<br>ये एवं सतत-युक्ताः भक्ताः त्वां पर्युपासते, ये च अपि अ-व्यक्तम् अ-क्षरम् [त्वां पर्युपासते], तेषां के योग-वित्तमाः॥१॥ | अर्जुन said:<br>Between those devotees who in this same way (*see* 11.55) are always committed [to You] [i.e., मत्-कर्म-कृत्] and seek You [as the विश्व-रूप], and those who [seek You] as the not objectified अक्षर [i.e., formless ब्रह्मन्]—who are the best knowers of योग? (**1**) |
| श्री-भगवान् उवाच।<br>ये मयि मनः आवेश्य, नित्य-युक्ताः, परया श्रद्धया उपेताः माम् उपासते, ते युक्ततमाः मे मताः॥२॥ | The Lord said:<br>Those who, placing [their] mind in Me, being always committed [i.e., कर्म-योगिन्-s who are मत्-कर्म-कृत्], and being endowed with ultimate trust [in My teaching] [and thus] seek Me—they are considered by Me to be [among] the best knowers of योग (the means to attain Me). (**2**) |

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

---

ये तु अ-निर्देश्यम् अ-व्यक्तं सर्वत्र-गम् अ-चिन्त्यं कूट-स्थम् अ-चलं ध्रुवं च अ-क्षरं पर्युपासते, [ये] इन्द्रिय-ग्रामं सन्नियम्य, सर्वत्र सम-बुद्धयः, सर्व-भूत-हिते रताः — ते माम् एव प्राप्नुवन्ति ॥ ३–४ ॥

—Whereas those who seek [i.e., know] [Me as] अक्षर (imperishable ब्रह्मन्)—which cannot be described [i.e., delimited by words], not objectified [by the senses], [is] locationless, which cannot be an object of the mind, which remains [true] in the apparent [i.e., as the basis and witness of माया], [is] immovable and permanent [in time]—[and those who] completely master [their] organs [of sense and action], whose vision remains the same toward everything, and who are dedicated to the welfare of all beings—they attain only Me. (**3–4**)

तेषाम् अ-व्यक्त-आसक्त-चेतसां क्लेशः अधिकतरः [स्यात्], देहवद्भिः हि (=यस्मात्) अ-व्यक्ता गतिः दुःखम् अवाप्यते ॥ ५ ॥

Among those whose mind is committed to what is not objectified, affliction [is or can be] greater, because an end that cannot be objectified is reached with difficulty by those who [instead of being ज्ञानिन्-s] are [सन्न्यासिन्-s who are still] देहवत् (identified with their body). (**5**)

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

---

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

---

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ ९ ॥

---

| | |
|---|---|
| पार्थ, ये तु सर्वाणि कर्माणि मयि सन्न्यस्य, मत्-पराः, अन्-अन्येन एव योगेन मां ध्यायन्तः उपासते, तेषां मयि आवेशित-चेतसाम् अहं मृत्यु-संसार-सागरात् समुद्धर्ता न-चिरात् भवामि॥६–७॥ | —Whereas, O अर्जुन, those [कर्म-योगिन्-s] who seek [Me]—giving up all action unto Me, having Me as their ultimate, and meditating on Me with undivided discipline—for them whose mind is absorbed in Me, I become before long [their] liberator from the ocean that is संसार (a life of becoming), [which is] filled with death. (**6–7**) |
| मयि एव मनः आधत्स्व। मयि बुद्धिं निवेशय। अतः ऊर्ध्वं मयि एव निवसिष्यसि, न संशयः॥८॥ | Place [your] मनस् (the vacillating mind) only in Me [i.e., gain a steadiness contemplating Me]. Place [your] बुद्धि (intellect/knowledge) in Me [i.e., gain clear knowledge of Me]. Thereupon, you will abide in [i.e., attain] Me alone. [In this] there is no doubt. (**8**) |
| अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः अभ्यास-योगेन माम् आप्तुम् इच्छ, धनञ्-जय॥९॥ | If you are not able to place [your] mind steadily in Me, then seek to attain Me by a योग consisting of continual practice [i.e., study and contemplation—repeatedly bringing the mind back to these two], O अर्जुन. (**9**) |

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

---

| | |
|---|---|
| [अथ] अभ्यासे अपि अ-समर्थः असि, मत्-कर्म-परमः भव। कर्माणि मद्-अर्थं कुर्वन् अपि सिद्धिम् अवाप्स्यसि॥१०॥ | [If] you are incapable in even [this] continual practice, [then as a कर्म-योगिन्] be one for whom action dedicated to [attaining] Me is paramount. Even doing actions [at their outset] for the sake of [attaining] Me, you will attain success [in terms, initially, of maturity and peace of mind]. (**10**) |
| अथ मद्-योगम् आश्रितः एतद् अपि कर्तुम् अ-शक्तः असि, ततः यत-आत्मवान् [सन्] सर्व-कर्म-फल-त्यागं कुरु॥११॥ | If, being committed to My योग, you are not able to do even this, then—being one whose mind is disciplined—please give up [the false notion of being the author of] the results of all actions (*see* 2.47 *and* 18.11). (**11**) |
| अभ्यासात् ज्ञानं श्रेयः हि, ज्ञानात् ध्यानं विशिष्यते, ध्यानात् कर्म-फल-त्यागः [विशिष्यते]। त्यागात् शान्तिः अन्-अन्तरम् [स्यात्]॥१२॥ | Than अभ्यास (continued practice), understanding [with practice] is better indeed. Than understanding, contemplation [with understanding] is better. Than contemplation, कर्म-फल-त्याग [is (initially) better]. Out of [this] renunciation, peace [of mind] immediately follows. (**12**) |

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १३ ॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

| | |
|---|---|
| सर्व-भूतानाम् अ-द्वेष्टा, मैत्रः, करुणः एव च, निर्-ममः, निर्-अहङ्-कारः, सम-दुख-सुखः, क्षमी, सन्तुष्टः स-ततं योगी, यत-आत्मा, दृढ-निश्चयः, मयि अर्पित-मनो-बुद्धिः, यः [ईदृक्] मद्-भक्तः, सः मे प्रियः ॥ १३–१४ ॥ | [The ज्ञानिन्] who is not displeased toward any being, is friendly and compassionate, free from the judgment "this is mine," free from the judgment that "I [am only this body-mind]," the same in pleasure or pain [i.e., not elated nor saddened], accommodative [i.e., patient and understanding], always contented and contemplative, disciplined, of firm resolve, with mind and intellect resolved in Me, who is [in this way] devoted to Me—that one—is dear to Me [i.e., as dear as Myself; because that one is Myself, and that one knows this fact]. (**13–14**) |
| यस्मात् लोकः न उद्विजते, यः च लोकात् न उद्विजते, यः च हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः, सः मे प्रियः ॥ १५ ॥ | Of whom the world [i.e., living beings and the environment] is not afraid [or need not protect itself against] and who is not afraid of the world, and the one who is freed from elation, intolerance, fear, and anxiety—that one is dear to Me. (**15**) |
| अन्-अपेक्षः, शुचिः, दक्षः, उदासीनः, गत-व्यथः, सर्व-आरम्भ-परित्यागी, यः [ईदृक्] मद्-भक्तः, सः मे प्रियः ॥ १६ ॥ | Without dependence [on anything for happiness], clean [externally and mentally], adept [i.e., wise in all situations], neutral, not shaken with fear, completely renounced all [doership in] activities—who is [in this way] devoted to Me, that one is dear to Me. (**16**) |

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

---

| | |
|---|---|
| यः न हृष्यति, न द्वेष्टि, न शोचति, न काङ्क्षति, शुभ-अ-शुभ-परित्यागी, यः [ईदृक्] भक्तिमान्, सः मे प्रियः ॥१७॥ | Does not become elated, does not become displeased, does not grieve, does not require/anticipate, who [naturally and] completely renounces [the status of being the doer and experiencer in] pleasant and unpleasant activity—who [thus] has devotion, that one is dear to Me. (**17**) |
| [यः] शत्रौ च मित्रे च तथा मान-अपमानयोः समः, शीत-उष्ण-सुख-दुःखेषु समः, सङ्ग-विवर्जितः, तुल्य-निन्दा-स्तुतिः, मौनी, येन केन-चिद् सन्तुष्टः, अ-निकेतः, स्थिर-मतिः, [ईदृक्] भक्तिमान्, [सः] नरः मे प्रियः ॥१८–१९॥ | The same toward [another who takes himself or herself as] an enemy or a friend and toward respect or disrespect; the same toward [the opposites] cold and hot, pleasure and pain; free from attachment, for whom censure and praise are alike [addressing only this body or mind, but not one's self]; disciplined in speech; satisfied with whatever [happens]; homeless [i.e., a सन्न्यासिन् or one who has no ownership toward a house he or she may own]; whose knowledge is firm—who [in this way] has devotion, [that] person is dear to Me. (**18–19**) |

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

---

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥

---

| | |
|---|---|
| ये तु यथा-उक्तम् इदं धर्म्य-अ-मृतं पर्युपासते, श्रद्-दधानाः, मत्-परमाः, [ईदृशः] भक्ताः ते मे अतीव प्रियाः॥२०॥ | Those indeed who follow this, as was told, that is in keeping with धर्म and [is an expression of and therefore leading to] complete freedom, who are endowed with trust [in My teaching], for whom I am paramount—such devotees as those are very dear to Me. (**20**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे भक्ति-योगः नाम द्वा-दशः अध्यायः॥१२॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the twelfth chapter, called "The Topic of Devotion," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 13 क्षेत्र-क्षेत्रज्ञ-विभाग-योग

## The Topic of the Distinction of the Field and the Knower of the Field

**क्षेत्र *kṣetra*** (*kṣe´-tra*) *n.* (*fr.* √क्षि निवासे dwell) भूमि a field; क्षेत्रवत् क्षेत्रम् what is like a harvest field, कार्य-करण-सङ्घात the human mind-body complex (where the fruits of *karma* are reaped), महा-भूतादि-सङ्घात everything consisting of the basic elements plus their cause and all their modifications, i.e., the gross, the subtle and the unmanifest universe.

# Chapter 13 क्षेत्र-क्षेत्रज्ञ-विभाग-योग

## The Topic of the Distinction of the Field and the Knower of the Field

Knowledge is the direct means of freeing oneself from संसार (the life of unending need for becoming) because the bondage of संसार is one of ignorance—ignorance of the fact that one's self is none other than the reality of this universe and yet is free of this universe. Through ignorance alone one is bound (yoked) to "otherness," to the limitations that appear in one's body and mind in relation to the vast universe. Knowledge does not *create* freedom since, by one's very nature, one is already free. Rather, knowledge removes the ignorance that veils the oneness of reality from our understanding.

The reality and freedom of the self is predominately taught in the first six chapters of the भगवद् गीता, and the reality and glories of the universe as the Lord is predominately taught in chapters 7–12. Clear statements of the identity of the self and the Lord have been given. In the next six chapters, the oneness of reality is emphasized and methodically unfolded. Through every chapter of the भगवद् गीता, the means to assimilate the teaching is continually taught. This means, called योग, is essentially an enlightened attitude with appropriate values—an attitude one takes to all aspects of the relationship between oneself and the whole. This enlightened attitude is one of a भक्त, a devotee—one who intelligently appreciates and participates in the great cosmic wheel. The भक्त-'s attitude yields a clarity that allows the knowledge to be completely assimilated and, hence, made firm.

This teaching of oneness—and of the way to assimilate it—is a means within संसार to get out of संसार. It is the key to release from limitation. In each cycle of the universe, this teaching is handed to the beings who are intelligent and mentally mature enough to make use of it. The योग (literally, "uniting," "yoking") taught in the भगवद् गीता is the "uniting" of oneself with this teaching of the oneness of reality. It is the योग, the commitment to the teaching, that frees us from the "yoke" that otherwise keeps us seemingly limited. In chapter 13, the Lord distinguishes (or "unyokes") क्षेत्र

(*kṣetra*)—the *field* (i.e., the universe, including one's body-mind complex)—from क्षेत्रज्ञ (*kṣetrajña*), the *knower of the field* (who is the Lord that is oneself).

Until the reality, ब्रह्मन्—which is to be known as oneself, as the basis of the universe, and as the Lord—is known, making the effort of योग and attending to the teaching is valid and required. This knowledge is not just a physical, emotional, or intellectual pursuit; nor is it a तामस or राजस pursuit. The whole person has to commit to this pursuit of knowledge.

There are two possible lifestyles in this pursuit—सन्न्यास and योग, or in other words निवृत्ति and प्रवृत्ति मार्ग-s)—but the means is one: Knowledge alone is the means. योग, as taught in the भगवद् गीता, is the preparation for its assimilation. It is सात्त्विक—all the way. Both the one who knows this knowledge and the one who wants to know this knowledge are भक्त-s (7.16–18). The belief that there are many योग-s (depending on one's personality) that separately lead to श्रेयस् is not grounded in this teaching here, though elsewhere—outside the उपनिषद्-s, भगवद्गीता, and ब्रह्म-सूत्र-s—such divisions are expressed by those who don't yet understand this teaching. कृष्ण warned us of such distractions early on (*see* 2.41). Instead of creating unnecessary divisions among sincere भक्त-s, कृष्ण brings the traditional teaching all together in this chapter.

ओम् अथ त्रयोदशोऽध्यायः

अर्जुन उवाच।
प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥

---

श्रीभगवानुवाच।
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥

---

## Thirteenth Chapter

| | |
|---|---|
| अर्जुनः उवाच।<br>प्रकृतिं पुरुषम् एव च, क्षेत्रं क्षेत्र-ज्ञम् एव च, ज्ञानं ज्ञेयं च, एतद् वेदितुम् इच्छामि, केशव॥ | अर्जुन said:<br>What I wish to know, O कृष्ण, is this: प्रकृति and पुरुष (nature and the one who fills nature), क्षेत्र and क्षेत्रज्ञ (the field and the knower of the field), and ज्ञान and ज्ञेय (knowledge and what is to be known).[6] |
| श्री-भगवान् उवाच।<br>कौन्तेय, इदं शरीरं क्षेत्रम् इति अभिधीयते। यः एतद् वेत्ति, तं तद्-विदः क्षेत्र-ज्ञः इति प्राहुः॥१॥ | The Lord said:<br>O अर्जुन, this body [where one reaps the fruits—पुण्य and पाप—initially presented as this human body; later to be expanded to the entire body of the universe, to प्रकृति] is called क्षेत्र. Those who know both of these [क्षेत्र and क्षेत्रज्ञ] call the one who knows this [क्षेत्र] as क्षेत्रज्ञ. (**1**) |

[6] This first verse of the chapter does not appear in some manuscripts. The verse could be a later addition, but since it introduces this chapter, it is included.

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ २ ॥

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

---

| | |
|---|---|
| सर्व-क्षेत्रेषु अपि च मां क्षेत्र-ज्ञं विद्धि, भारत। यद् क्षेत्र-क्षेत्रज्ञयोः ज्ञानं, तद् ज्ञानं मम मतम्॥ २॥ | In all the क्षेत्र-s, know Me [who is not subject to संसार] to be the [only] क्षेत्रज्ञ [i.e., know Me, the Lord, as the only I, the only knower], O अर्जुन. Knowledge which is of [this] क्षेत्र and क्षेत्रज्ञ—that [alone] is considered by Me to be ज्ञान [as it alone is final and it alone releases one from संसार]. (**2**) |
| यद् तद् क्षेत्रं, यादृक् च, यद्-विकारि च, यतः च यद्, यः च सः, यत्-प्रभावः च — तद् समासेन मे शृणु॥ ३॥ | What is that क्षेत्र? [What is] its appearance, having which modifications? From what [source] [does] it [arise]? And what is that [source, the क्षेत्रज्ञ, which is Me] and what glories is [that source] having? About that, in brief, listen to Me. (**3**) |
| ऋषिभिः विविधैः छन्दोभिः, विनिश्चितैः हेतुमद्भिः ब्रह्म-सूत्र-पदैः एव च बहुधा पृथक् गीतम्॥ ४॥ | [Each, the क्षेत्र and its source] has been sung as distinct [from each other] in many ways by the seers/sages—through various verses and through concise statements that reveal ब्रह्मन् (reality) with [supporting] logic and which are well ascertained [i.e., without doubt]. (**4**) |

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५ ॥
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥

---

महा-भूतानि, अहङ्-कारः, बुद्धिः, अ-व्यक्तम् एव च, दश इन्द्रियाणि, एकं च [मनः], पञ्च च इन्द्रिय-गोचराः, इच्छा, द्वेषः, सुखं, दुःखं, सङ्घातः, चेतना, धृतिः — एतद् क्षेत्रं स-विकारं समासेन उदाहृतम्॥ ५–६॥

The [five distinct] pervasive [i.e., subtle] elements, the अहङ्कार [i.e., the universe's अहङ्कार = Lord ब्रह्मा, the कर्तृ of the universe], the बुद्धि [i.e., the universe's intellect = the सङ्कल्प of the Lord at the time of manifestation, wherein the laws are determined by which everything is manifest], the अव्यक्त (unmanifest cause, ईश्वर-शक्ति/माया) [all the aforementioned constitute प्रकृति], [and then प्रकृति-'s modifications, including] the ten organs, the one [mind, including the intellect], the five [gross] sense objects [i.e., the physical universe], desire, aversion, pleasure, pain, the physical body, cognition, and resolve—[all] this is in brief called the क्षेत्र (field) along with [its] modifications.[7](**5–6**)

---

[7] The five elements, the subtle and gross objects (i.e., unmanifest and manifest to the senses, respectively), are आकाश (space—dimension), वायु (air—movement), अग्नि (fire—heat/light), आपः (water—fluidity), and पृथिवी (earth—solidity). The ten organs include the five sense organs of hearing, feeling, seeing, tasting, and smelling, and the five action organs of speech, hands (fashioning), feet (locomotion), evacuation, and generation.

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

---

[यद् ज्ञानम् इति—] अ-मानित्वम्, अ-दम्भित्वम्, अ-हिंसा, क्षान्तिः, आर्जवम्, आचार्य-उपासनं, शौचं, स्थैर्यम्, आत्म-विनिग्रहः, इन्द्रिय-अर्थेषु वैराग्यम्, अन्-अहङ्-कारः एव च, जन्म-मृत्यु-जरा-व्याधि-दुःख-दोष-अनुदर्शनम्, …॥७–८॥

[What also is ज्ञान is] absence of conceit [i.e., not demanding that others know one's virtues]; absence of hypocrisy [i.e., not demanding that others recognize virtues that one does not have]; harmlessness; accommodation [i.e., patience and understanding]; straightforwardness; reverence for [and attendance to] the teacher; cleanliness; steadfastness; self-discipline; dispassion toward sense objects; absence of arrogance [i.e., not presenting oneself in the reflection of some glory in one's possession]; and seeing the problem of sorrow [i.e., guilt and hurt] in birth, death, ageing, and diseases. (**7–8**)

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वम् अरतिर्जनसंसदि ॥ १० ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥

---

[किं च] अ-सक्तिः, पुत्र-दार-गृह-आदिषु अन्-अभिष्वङ्गः, इष्ट-अन्-इष्ट-उपपत्तिषु च नित्यं सम-चित्तत्वं, मयि अन्-अन्य-योगेन च अ-व्यभिचारिणी भक्तिः, विविक्त-देश-सेवित्वं, जन-संसदि अ-रतिः, अध्यात्म-ज्ञान-नित्यत्वं, तत्त्व-ज्ञान-अर्थ-दर्शनम् — एतद् ज्ञानम् इति प्रोक्तं, यद् अतः अन्यथा अ-ज्ञानम्॥ ९–११॥

[Also] absence of ownership; lack of identification toward son [i.e., offspring], wife [i.e., spouse], house, etc.; continual equanimity of mind toward occurrences of the desirable and the undesirable; unswerving devotion in Me through a योग (vision of identity, समाधि) in which there is no other; the disposition to [or a value to] repair to a quiet place [where I do not have to fear, do not feel I have to change, and do not have to escape from]; not longing for the company of people [i.e., not needing to escape from myself through others]; being always centered on the knowledge of the I; and seeing the goal of the knowledge of truth [that goal being complete freedom]—[all] this is [also] called ज्ञान [an expression of knowledge and, thus, a means of gaining knowledge]. What is other than this is an obstacle to knowledge. (**9–11**)

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

---

| | |
|---|---|
| यद् ज्ञेयं तद् प्रवक्ष्यामि। यद् ज्ञात्वा अ-मृतम् अश्नुते, तद् अन्-आदिमत् परं ब्रह्म, न सत् न अ-सत् उच्यते॥१२॥ | What is ज्ञेय (to be known), that I will [now] tell [you]. Knowing which one gains immortality [called मोक्ष (the reason it's to be known)]—that [ज्ञेय] is beginningless and limitless ब्रह्मन् (reality, My nature), said to be neither [an object] that *is*, nor *is not*.(**12**) |
| सर्वम् आवृत्य तद् लोके सर्वतः-पाणि-पादं सर्वतो-[अ]क्षि-शिरो-मुखं सर्वतः-श्रुतिमन् तिष्ठति॥१३॥ | [Not that *it is not*, since] that [ज्ञेयं ब्रह्मन्] remains [motionless, yet] pervading all in the लोक (universe) [as each being's reality]—with [all beings'] hands and feet everywhere; with [their] eyes, heads, and mouths everywhere; and with [their] ears everywhere.(**13**) |
| सर्व-इन्द्रिय-गुण-आभासं सर्व-इन्द्रिय-विवर्जितम्, अ-सक्तं सर्व-भृत् एव च, निर्-गुणं गुण-भोक्तृ च॥१४॥ | [Not that *it is*, since that ज्ञेयं ब्रह्मन्] [merely] appears as the attributes [i.e., the functioning— seeing, etc.] of all the organs [in these bodies], [yet] is free from all the organs; is unattached [yet] sustains all; and is free from the गुण-s [yet] is the experiencer of the गुण-s.(**14**) |

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

| | |
|---|---|
| भूतानां बहिः अन्तः च, चरम् अ-चरम् एव च। सूक्ष्मत्वात् तद् अ-विज्ञेयं। तद् दूर-स्थं च अन्तिके च॥१५॥ | It is [with reference to these bodies] outside and inside of [all] beings, and is whatever does and does not move [in the universe]. Since it is subtle [i.e., innermost, as "I"], it is not knowable [as a "this or that," an object]. It is [as] far [as the farthest, imagined object] and [as] near [as "I"].(**15**) |
| भूतेषु च अ-विभक्तं विभक्तम् इव च स्थितं, भूत-भर्तृ ग्रसिष्णु च प्रभविष्णु च तद् ज्ञेयं॥१६॥ | That ज्ञेय remains undivided [i.e., as one only] yet [is] seemingly divided [as many] in [all] beings; [this one and only] is the one who sustains [all these] beings [embodiments and objects] and is [their] devourer and creator. (**16**) |
| तद् ज्योतिषाम् अपि ज्योतिः, तमसः परम् उच्यते। [तद्] ज्ञानं ज्ञेयं ज्ञान-गम्यम्। [तद्] सर्वस्य हृदि विष्ठितम्॥१७॥ | It is the light of lights [i.e., the solely self-revealing conscious-being by which even the sun is revealed] said to be beyond darkness [or ignorance, as it reveals both]. It is ज्ञान (*see* 13.2 *and* 13.7–11), ज्ञेय, and the result to be attained by ज्ञान. It abides in the center of everything [and is to be known in this intellect]. (**17**) |

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥

---

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १९ ॥

---

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥

---

| | |
|---|---|
| इति क्षेत्रं तथा ज्ञानं ज्ञेयं च समासतः उक्तम्। एतद् विज्ञाय, मद्-भक्तः मद्-भावाय उपपद्यते॥१८॥ | Thus the क्षेत्र, the ज्ञान, and the ज्ञेय have been briefly told. Clearly knowing this, one who is devoted to Me [who is this ज्ञेय] is fit for My nature [called मोक्ष, complete freedom]. (**18**) |
| प्रकृतिं पुरुषम् एव च उभौ अपि अन्-आदी विद्धि। गुणान् च विकारान् एव च प्रकृति-सम्भवान् विद्धि॥१९॥ | May you know that both प्रकृति and पुरुष are beginningless. And may you know that the गुण-s [i.e., mental dispositions—not the three unmodified गुण-s (the constituents of प्रकृति)] and [other] modifications [from intellects to all physical bodies] are born of प्रकृति. (**19**) |
| प्रकृतिः कार्य-करण-कर्तृत्वे हेतुः उच्यते। पुरुषः सुख-दुःखानां भोक्तृत्वे हेतुः उच्यते॥२०॥ | प्रकृति is said to be the cause of the origination of the physical body and [its] instruments [i.e., mind, senses, etc.]. The पुरुष (क्षेत्रज्ञ or, in this case, the individual जीव) is said to be the cause of being the experiencer of pleasant and unpleasant situations. (**20**) |

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ २२ ॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

---

| | |
|---|---|
| प्रकृति-स्थः हि (=यस्मात्) पुरुषः प्रकृति-जान् गुणान् भुङ्क्ते। सद्-अ-सद्-योनि-जन्मसु कारणम् अस्य गुण-सङ्गः॥ २१॥ | —Because the पुरुष, abiding in प्रकृति, experiences the [modifications of the] गुण-s born of प्रकृति. In regard to births in virtuous and nonvirtuous wombs [i.e., संसार], one's [i.e., the ignorant जीव-'s] attachment to [the modifications of the] गुण-s is the cause. (**21**) |
| अस्मिन् देहे पुरुषः परः, उपद्रष्टा, अनुमन्ता च, भर्ता, भोक्ता, महा-ईश्वरः, परम-आत्मा च इति अपि उक्तः॥ २२॥ | [But in fact] the पुरुष—[even while] in this body—is limitless, the immediate witness, the permitter, the sustainer, the [unattached] experiencer, the [very] Lord [i.e., Myself], and is indeed called the परमात्मन् (the limitless I). (**22**) |
| यः एवं पुरुषं गुणैः सह प्रकृतिं च वेत्ति, सः सर्वथा वर्तमानः अपि भूयः न अभिजायते॥ २३॥ | The one who in this way knows पुरुष and प्रकृति with its गुण-s—that one, even though performing action in all ways [whether as a student, householder, retiree, or सन्न्यासिन्] is not born again. (**23**) |

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

| | |
|---|---|
| के-चिद् ध्यानेन (=श्रवण-मनन-निदिध्यासनेन) आत्मनि आत्मना आत्मानं पश्यन्ति, अन्ये साङ्ख्येन योगेन (=श्रवणेन एव), अपरे (=कर्मयोगिनः) च कर्म-योगेन॥ २४॥ | Some [ज्ञानिन्-s] see the self—in the mind, by the mind—with contemplation [after study to remove obstacles to assimilation of knowledge], [a rare few] others [simply] by inquiry [i.e., study of the teaching], and [some] others [by this teaching] while engaged in [their] duties. (**24**) |
| अन्ये तु एवम् अ-जानन्तः अन्येभ्यः श्रुत्वा उपासते। ते अपि च श्रुति-परायणाः मृत्युम् अतितरन्ति एव॥ २५॥ | —Whereas others, not [yet] knowing [this teaching], worship [Me] according to what they have heard from others [i.e., from गुरु-s who tell them to initially do पूजा, जप (mental chanting), etc.]. They also, being ones for whom listening [to the teaching] is the ultimate end, [eventually] cross over death. (**25**) |
| यावत् किञ्-चिद् सत्त्वं स्थावर-जङ्गमं सञ्जायते, तद् क्षेत्र-क्षेत्रज्ञ-संयोगात् विद्धि, भरत-ऋषभ॥ २६॥ | As long as any being [i.e., a जीव] [continues to] be [re-]born as immobile or mobile—know that to be due to the संयोग (association—due to a lack of विवेक; i.e., knowing the difference) between the क्षेत्र and the क्षेत्रज्ञ, O अर्जुन. (**26**) |

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८ ॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥

| | |
|---|---|
| यः परम-ईश्वरं सर्वेषु भूतेषु समं तिष्ठन्तं, विनश्यत्सु [च] अ-विनश्यन्तं पश्यति, सः पश्यति॥ २७॥ | The one who sees the Lord [Me] as remaining the same in all beings and as not being destroyed among those [bodies] being destroyed—that one [alone] sees. (**27**) |
| ईश्वरं हि (=यस्मात्) सर्वत्र समं समवस्थितं पश्यन्, आत्मना आत्मानं न हिनस्ति, ततः परां गतिं याति॥ २८॥ | —Because seeing [Me] the Lord as remaining **सम** (the same) everywhere [as the self of all], one does not by oneself [i.e., through the mind] destroy [i.e., lose sight of] the self [since that self is the all-pervasive Me] and, hence, attains the ultimate end [i.e., the end of संसार]. (**28**) |
| यः च कर्माणि प्रकृत्या एव सर्वशः क्रियमाणानि, तथा आत्मानम् अ-कर्तारं पश्यति, सः पश्यति॥ २९॥ | And the one who sees actions being done in every way by प्रकृति alone and, in that way, [sees] that the self is not a doer—that one [alone] [correctly] sees. (**29**) |

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ ३० ॥

अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

---

| | |
|---|---|
| यदा भूत-पृथग्-भावम् एक-स्थं, ततः एव च विस्तारम् अनुपश्यति, तदा ब्रह्म सम्पद्यते॥ ३०॥ | When one, according [to the teaching], sees that the [apparent] separateness of beings resolves into one and [that all these apparently separate beings] are a projection [i.e., a manifestation] from that [one] alone—then he [or she] attains [that same] ब्रह्मन् [as himself or herself]. (**30**) |
| कौन्तेय, अन्-आदित्वात् निर्-गुणत्वात् अयम् अ-व्ययः परम-आत्मा शरीर-स्थः अपि न करोति, न लिप्यते॥ ३१॥ | O अर्जुन, since it is beginningless [i.e., uncaused/un-effected] and since it is without attributes, this changeless परमात्मन् (limitless I) does not do action—even though obtaining in the body—nor is it affected [by the results of action]. (**31**) |
| यथा सर्वगतम् आकाशं सौक्ष्म्यात् न उपलिप्यते, तथा सर्वत्र देहे अवस्थितः आत्मा न उपलिप्यते॥ ३२॥ | Just as the all-pervasive [element called] space is not affected [by movements of objects within space]—because it is subtle [i.e., it is innermost/pervasive; i.e., in and through and outside of objects, without itself moving]—similarly, the आत्मन्, obtaining in [each] body everywhere, is not affected. (**32**) |

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः॥१३॥

| | |
|---|---|
| यथा एकः रविः इमं कृत्स्नं लोकं प्रकाशयति, तथा क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति, भारत॥३३॥ | Just as the one sun illumines this entire world [yet is unaffected by it]—similarly, this one obtaining in the क्षेत्र illumines [i.e., lights up, as the conscious being, all thoughts in all minds, which thoughts alone reflect] the entire [known and inferred] क्षेत्र (field of the universe), O अर्जुन. (**33**) |
| ये एवं क्षेत्र-क्षेत्रज्ञयोः अन्तरं, भूत-प्रकृति-मोक्षं च ज्ञान-चक्षुषा विदुः, ते परं यान्ति॥३४॥ | Those who thus know, through the eye of wisdom, the distinction between the क्षेत्र and the क्षेत्रज्ञ [i.e., the object and the subject—the subject being the substance of all objects, of all names and forms] and [their inherent] freedom from प्रकृति [the cause] of [all] beings—they attain the ultimate. (**34**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे क्षेत्र-क्षेत्रज्ञ-विभाग-योगः नाम त्रयो-दशः अध्यायः॥१३॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the thirteenth chapter, called "The Topic of the Distinction between the Field and the Knower of the Field," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 14 गुण-त्रय-विभाग-योग

## The Topic of the Division of the Three *Guṇa*s

**गुण *guṇa*** (*guṇ-á*) *m.* (*fr.* √गुण् आमन्त्रणे invite, address) रज्जु-तन्तु strand of rope (three strands making a strong rope); धर्म (proper or improper) virtue; विशेष quality, attribute; धर्म principle (a basic or fundamental constituent within any thing/system proposed for explaining some aspect of that thing/system); *pl.* सत्त्व-रजस्-तमो-रूप-गुण-त्रय the three-fold *guṇa*s: *sattva*, *rajas*, and *tamas* (the three subtle principles of the universe—especially of mental dispositions).

# Chapter 14 गुण-त्रय-विभाग-योग

## The Topic of the Division of the Three *Guṇa*s

Chapter 14 marks the start of the elaboration of the three गुण-s (*guṇa*s, qualities): सत्त्व (*sattva*, related to knowledge); रजस् (*rajas*, related to activity); and तमस् (*tamas*, related to inactivity). The universal categorization of the गुण-s is used to encompass the total universe, the त्रैगुण्य (*traiguṇya*) (*e.g., see* 2.45 and 3.27–28), or to encompass just the subtle world of thoughts (*e.g., see* 10.36, 13.19, and 17.2).

The elaboration of the गुण-s that begins in this chapter distinguishes appropriate and inappropriate attitudes as they relate to कर्म-योग—and ultimately brings us to the transcendence of these गुण-s. Universal categorizations, such as the three गुण-s, the five elements linked to the five human sense-organs, or the three worlds (earth/sky/heaven), are employed throughout the उपनिषद्-s to help us apply the teaching to the entire universe. The method of using universal categorization, of covering everything with a few categories, is self-acknowledged in छान्दोग्य उपनिषद् (*Chāndogya Upaniṣad*) 6.4.5:

> Because they knew [everything] through these [three categories—the red/white/black, relating to the three visible elements fire/water/earth], they said, "None of us will speak of anything as unheard, unthought, or unknown."

The universal categorization method is also used in the भगवद् गीता to help us understand how the three-fold structure of the universe is reflected in the mind and how the mind should then relate objectively to the universe. Just as कृष्ण used the concept of योग from कठ उपनिषद् (*Kaṭha Upaniṣad*) and elaborated on it in previous chapters, in chapter 14 He uses the universal categorization of the गुण-s, given in श्वेताश्वतर उपनिषद् (*Śvetāśvatara Upaniṣad*)—which borrows heavily from कठ उपनिषद् and employs the terms साङ्ख्य (*sāṅkhya*, knowledge) and योग together (*see* 2.39)—to explain कर्म-योग.

Although a predominate सत्त्व (*sattva*, uplifting) attitude is the most appropriate attitude within various behaviors, the goal is to appreciate oneself as गुणातीत (*guṇātīta*)—one who transcends all three

गुण-s—as well as one who thus transcends all actions. Among all possible attitudes we can take toward life's basic activities, the chapters that follow (chapters 14, 17, and 18) indicate that the attitudes that can be categorized as सत्त्व are preferred and that the others are to be avoided.

Sometimes the गुण-s are used to categorize the predilections (i.e., dispositions) toward behaviors (e.g., all the categorizations in chapter 14 are of this type). Other times, they are used to categorize the behaviors themselves (e.g., most of the categorizations in chapter 17 are of this type—food choices, rituals, religious disciplines, and charities are related to the गुण-s). In these cases, predilections or inappropriate behaviors are not to be condemned in others or in one's self. After all, the things and actions of the world and the thoughts that make up the mind are what they are. They are governed by the universal laws of the total, both physical and psychological, and are affected by the whole universe. They are not meant to be viewed in isolation or out of context. In their context, they cannot be other than what they are—and ought to be accepted as they are.

However, as doers (i.e., as long as we take ourselves to be doers), we have a choice in our current action, and the Advaita Vedanta teaching can inform our attitude and our choice in that action. When we make choices informed by the teaching, we live a clean life conducive to assimilating the knowledge unfolded by the teaching. And, by living such a life, we gain this knowledge, which frees us from grief and death.

# अथ चतुर्दशोऽध्यायः

श्रीभगवानुवाच।
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥

---

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥

---

मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

---

## Fourteenth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। ज्ञानानाम् उत्तमं परं ज्ञानं भूयः प्रवक्ष्यामि, यद् ज्ञात्वा सर्वे मुनयः इतः परां सिद्धिं गताः॥१॥ | The Lord said: I will again tell [you] the ultimate knowledge—the most profound of [disciplines of] knowledge—knowing which, all the sages [being released by this knowledge] from this [body] have attained the ultimate accomplishment. (**1**) |
| इदं ज्ञानम् उपाश्रित्य, मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते, प्रलये न च व्यथन्ति॥२॥ | Following this knowledge [i.e., teaching], they—having attained My same nature [i.e., identity with Me, timeless reality]—do not arise even at the manifestation [of a new universe], nor fall at the dissolution [of this or succeeding universes]. (**2**) |
| मम योनिः महत् ब्रह्म। तस्मिन् अहं गर्भं दधामि। ततः सर्व-भूतानां सम्भवः भवति, भारत॥३॥ | My womb (प्रकृति) is [not different from Me, who is] महत् ब्रह्मन्. Into that [महत् ब्रह्मन्, as the womb], I implant the seed [ईश्वर is a masculine word and प्रकृति is a feminine word; hence, the impregnation metaphor]. From that is the manifestation of all beings, O अर्जुन. (**3**) |

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

---

| | |
|---|---|
| कौन्तेय, सर्व-योनिषु याः मूर्तयः सम्भवन्ति, तासां योनिः महत् ब्रह्म, अहं बीज-प्रदः पिता ॥ ४ ॥ | O अर्जुन, for those forms which arise in all wombs [of gods, humans, etc.], the [original] womb is महत् ब्रह्मन् [Me]. And I am [also] the father who implants the seed [which seed, being existence and conscious being, सत्यं ज्ञानं, gives प्रकृति the capacity to create]. (**4**) |
| महा-बाहो, सत्त्वं रजः तमः इति प्रकृति-सम्भवाः गुणाः देहे अ-व्ययं देहिनं निबध्नन्ति ॥ ५ ॥ | O अर्जुन, the गुण-s, which exist in [i.e., constitute] प्रकृति, are [called] सत्त्व, रजस्, and तमस् and [they, apparently, like notional ropes] bind the changeless embodied one [i.e., the जीव, the क्षेत्रज्ञ] into the body. (**5**) |
| तत्र निर्-मलत्वात् प्रकाशकम् अन्-आमयं सत्त्वं सुख-सङ्गेन ज्ञान-सङ्गेन च बध्नाति, अन्-अघ ॥ ६ ॥ | Among these, सत्त्व—since it is free from impurity—is illuminating and free from affliction—[yet] binds by [one's] attachment to pleasure and by [one's] attachment to knowing [i.e., attachment/identity is the problem, not the pleasure or knowledge], O अर्जुन. (**6**) |

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

---

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

---

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ ९ ॥

---

| | |
|---|---|
| राग-आत्मकं रजः तृष्ण-आसङ्ग-समुद्भवं विद्धि। कौन्तेय, तद् कर्म-सङ्गेन देहिनं निबध्नाति॥७॥ | Know रजस्, which is of the nature of attraction [i.e., it is an impurity to the natural clarity of the सत्त्व mind—projecting virtues on things that they don't have], as born of [i.e., increased by] longing and attachment. O अर्जुन, it binds the embodied one by attachment to activity. (**7**) |
| तमः तु अ-ज्ञान-जं सर्व-देहिनां मोहनं विद्धि। तद् प्रमाद-आलस्य-निद्राभिः निबध्नाति, भारत॥८॥ | —Whereas, know तमस्—for all those identified with their body—as delusion [i.e., as the lack of discerning the difference between oneself and objects of desire] born of [i.e., perpetuated by] ignorance. It binds by carelessness, laziness, and sleepiness, O अर्जुन. (**8**) |
| भारत, सत्त्वं सुखे सञ्जयति, रजः कर्मणि, तमः तु ज्ञानम् आवृत्य प्रमादे सञ्जयति उत॥९॥ | O अर्जुन, सत्त्व [as though] binds [one] into pleasure and रजस् [as though] binds [one] into activity, whereas तमस्—covering knowledge [by being an impurity to the natural clarity of the सत्त्व mind]—indeed [as though] binds [one] into carelessness. (**9**) |

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १० ॥

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ ११ ॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

| | |
|---|---|
| भारत, रजः तमः च अभिभूय सत्त्वं भवति, सत्त्वं तमः च एव रजः, तथा सत्त्वं रजः च तमः॥१०॥ | O अर्जुन, सत्त्व [throughout the day and one's life] arises [by] overwhelming रजस् and तमस्. रजस् arises [by overwhelming] सत्त्व and तमस्. Similarly, तमस् arises [by overwhelming] सत्त्व and रजस्. (**10**) |
| यदा अस्मिन् देहे सर्व-द्वारेषु ज्ञानं प्रकाशः उपजायते, तदा सत्त्वं विवृद्धम् इति विद्यात् उत॥११॥ | When the brightness, which is knowledge, arises in all the sense organs in this body, then one should know indeed that सत्त्व has increased. (**11**) |
| लोभः, प्रवृत्तिः, कर्मणाम् आरम्भः, अ-शमः, स्पृहा — एतानि रजसि विवृद्धे जायन्ते, भरत-ऋषभ॥१२॥ | Greed, [physical] restlessness, कर्मन् (action that binds), [mental] restlessness, attraction—these arise when रजस् has increased, O अर्जुन. (**12**) |

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४ ॥

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥

---

| | |
|---|---|
| अ-प्रकाशः अ-प्रवृत्तिः च, प्रमादः मोहः एव च — एतानि तमसि विवृद्धे जायन्ते, कुरु-नन्दन॥१३॥ | Dullness (here described as a darkness over the mind), absence of [physical] activity, carelessness, and delusion—these arise when तमस् has increased, O अर्जुन. (**13**) |
| यदा तु सत्त्वे प्रवृद्धे देह-भृत् प्रलयं याति, तदा उत्तम-विदाम् अ-मलान् लोकान् प्रतिपद्यते॥१४॥ | But upon सत्त्व being predominant, when an embodied one dies, that one goes to the virtuous worlds of those who know the most exalted [i.e., the heavens]. (**14**) |
| रजसि प्रलयं गत्वा कर्म-सङ्गिषु जायते। तथा तमसि प्रलीनः मूढ-योनिषु जायते॥१५॥ | Upon रजस् [being predominant], after dying, one is born among those committed to [the results of] actions [i.e., born among humans]. Similarly, upon तमस् [being predominant], having died, one is born in wombs of those who lack discriminative faculties [i.e., born among animals, plants, etc.]. (**15**) |

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १६ ॥

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १७ ॥

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

| | |
|---|---|
| सु-कृतस्य कर्मणः निर्-मलं सात्त्विकं फलम् [इति] आहुः, रजसः तु दुःखं फलं, तमसः अ-ज्ञानं फलम्॥१६॥ | They say that, for virtuous action, the result—[being] connected to सत्त्व—is free from impurity; but for रजस् [cutting corners to get results], the result is pain; and for तमस्, the result is ignorance [i.e., the inability to get out of ignorance—birth as an animal, etc.]. (**16**) |
| सत्त्वात् ज्ञानं सञ्जायते, रजसः लोभः एव च। तमसः प्रमाद-मोहौ भवतः अ-ज्ञानम् एव च॥१७॥ | From सत्त्व is born knowledge and from रजस् is only greed. From तमस् are born carelessness and delusion, and also [continuance in] ignorance. (**17**) |
| सत्त्व-स्थाः ऊर्ध्वं गच्छन्ति। राजसाः मध्ये तिष्ठन्ति। जघन्य-गुण-वृत्त-स्थाः तामसाः अधः गच्छन्ति॥१८॥ | Those who live a life [predominantly] of सत्त्व go up [i.e., get birth in heaven]. Those predominantly रजस् stay in the middle [i.e., get human birth]. Those predominantly तमस्, who are situated in the condition of this bottom गुण, go down [i.e., get a lower birth]. (**18**) |

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

---

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥

---

अर्जुन उवाच।
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥

---

| | |
|---|---|
| यदा द्रष्टा न गुणेभ्यः अन्यं कर्तारम् अनुपश्यति, गुणेभ्यः च परं वेत्ति, [तदा] सः मद्-भावम् अधिगच्छति॥१९॥ | When the seer sees [according to the teaching] that there is not a doer other than the गुण-s and knows [the self] as beyond the गुण-s, [then] that one attains My nature [called मोक्ष]. (**19**) |
| एतान् देह-समुद्भवान् त्रीन् गुणान् अतीत्य, जन्म-मृत्यु-जरा-दुःखैः विमुक्तः देही अ-मृतम् अश्नुते॥२०॥ | Transcending these three गुण-s that give rise to the body—and freed from birth, death, ageing, and sorrow [i.e., guilt and hurt]—the embodied one attains immortality. (**20**) |
| अर्जुनः उवाच।<br>कैः लिङ्गैः एतान् त्रीन् गुणान् अतीतः भवति, प्रभो। किम्-आचारः। कथं च एतान् त्रीन् गुणान् अतिवर्तते॥२१॥ | अर्जुन said:<br>By what indications is [it known that] one has transcended these three गुण-s, O Lord? What is [that one's] conduct? And how does one transcend these three गुण-s? (**21**) |

श्रीभगवानुवाच।
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३ ॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४ ॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥

---

श्री-भगवान् उवाच।
पाण्डव, [यः] प्रकाशं च प्रवृत्तिं च मोहम् एव च सम्प्रवृत्तानि न द्वेष्टि, निवृत्तानि न काङ्क्षति, यः उदासीनवत् आसीनः गुणैः न विचाल्यते, यः "गुणाः वर्तन्ते" इति एव अवतिष्ठति, न इङ्गते, सम-दुःख-सुखः, स्व-स्थः, सम-लोष्ट-अश्म-काञ्चनः, तुल्य-प्रिय-अ-प्रियः, धीरः, तुल्य-निन्दा-आत्म-संस्तुतिः, मान-अपमानयोः तुल्यः, मित्र-अरि-पक्षयोः तुल्यः, सर्व-आरम्भ-परित्यागी — सः गुण-अतीतः उच्यते॥ २२–२५॥

The Lord said:
O अर्जुन, Brightness, [attachment-based] activity, and, indeed, delusion—the one who is not displeased [when they] wax, nor longs for [them when they] wane [throughout the day and one's life]; who, remaining seemingly indifferent, is not disturbed by the गुण-s; who abides—[knowing] indeed that the गुण-s act—and does not waiver [from this knowledge]; who is the same in pleasure and pain [and] abides in the self; for whom a lump of clay, a stone, and gold are [transcended as] the same; for whom the pleasant and the unpleasant are [objectively viewed] the same [way]; who is wise; for whom censure and praise of the self are alike [addressing only the mind or body—as the आत्मन् cannot be flattered nor damaged by any misconception of it]; who is the same in respect and disrespect [which express only the others' understanding and value structure, unrelated to the self]; the same regarding the side of a friend or an enemy [seeing neither as friend nor enemy]; and who has completely renounced [doership in] all activities—that one is called गुणातीत (beyond the गुण-s). (**22–25**)

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ २६ ॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥१४॥

---

| | |
|---|---|
| यः च माम् अ-व्यभिचारेण भक्ति-योगेन सेवते, सः एतान् गुणान् समतीत्य ब्रह्म-भूयाय कल्पते॥२६॥ | The one who seeks Me with unswerving devotion [i.e., commitment to attain Me through this teaching]—that one transcends these गुण-s, [i.e.,] becomes fit for being ब्रह्मन्. (**26**) |
| अ-मृतस्य हि (=यस्मात्), अ-व्ययस्य च, शाश्वतस्य, धर्मस्य च, सुखस्य, ऐकान्तिकस्य च ब्रह्मणः प्रतिष्ठा अहम्॥२७॥ | —Because I [the "I" which is क्षेत्रज्ञ and is महेश्वर] am the प्रतिष्ठा (basis) of [knowing and, thus, of being that] ब्रह्मन्—which is deathless, changeless, ever the same; [is] धर्म (that which supports); is fulfillment; and is unfailing [i.e., not subject to negation]. (**27**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे गुण-त्रय-विभाग-योगः नाम चतुर्-दशः अध्यायः॥१४॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fourteenth chapter, called "The Topic of the Distinction of the Three गुण-s," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 15 पुरुषोत्तम-योग

## The Topic of the Being Who Transcends

**पुरुष** ***puruṣa*** (*púr-u-ṣa*) *m.* (*fr.* √पृ व्यापने fill *or* √पुर् अग्र-गमने go ahead) नर man, person; देहिन् the one who fills the body, जीवात्मन् the experiencer; क्षर-पुरुष the one who fills the perishable (i.e., the Lord in the form of the physical universe), and अ-क्षर-पुरुष the one who fills the imperishable (i.e., the Lord in the form of the unmanifest [*a-vyakta* or *māyā*]), हिरण्य-गर्भ (सूत्रात्मन्) the cosmic person (who is the Lord in the form of the total subtle [non-gross, non-material] world); ईश्वर the one who fills everything, the आत्मन्.

# Chapter 15 पुरुषोत्तम-योग

## The Topic of the Being Who Transcends

The fifteenth chapter of the भगवद् गीता is a marvelously complete chapter, like the second and the thirteenth. In each of these chapters, the entire Advaita Vedanta teaching is summarized. In chapter 15, the whole universe is presented through the उपनिषद् imagery of the Tree of संसार. In the भगवद् गीता, as in कठ उपनिषद् (which is the source of this imagery), the Tree of संसार is *not* an upside-down tree. This common, but mistaken, notion is due to confusion about the meanings of the संस्कृत (*Saṃskṛta*, Sanskrit) words "ऊर्ध्व" (*ūrdhva*) and "अधस्" (*adhas*).

In संस्कृत, ऊर्ध्व can mean *up* or it can mean *superior*. Similarly, अधस् can mean *down* or *inferior*. In कठ उपनिषद् 6.1 and in the first verse of this chapter, these two words are used in their valuation and cause-effect sense (i.e., as *superior* and *inferior*), *not* in their directional sense (*up* and *down*). If the meanings are taken as *up* and *down*, then the imagery is self-contradictory—since the "downward" secondary roots (*see* 15.2), which extend from the taproot, would actually be upward if the tree were upside down. (For more about the meanings of ऊर्ध्व and अधस्, see *The Bhagavad Gita Dictionary*.)

The taproot of the Tree of संसार is the अव्यक्त ब्रह्मन् (*avyakta brahman*—the unsensed, unmanifest source of the seen universe). This अव्यक्त ब्रह्मन् does not mutate into the व्यक्त (*vyakta*—manifest) universe at the beginning of each manifestation cycle. Rather, the अव्यक्त ब्रह्मन् continues to be *while* the manifest universe shimmers in our perception of it, like the unseen taproot continuously supports the visible and ever-changing tree.

Quantum physics assists in understanding this imagery. The अव्यक्त (*avyakta*, unmanifest), the कूट-स्थ (*kūṭa-stha*, what remains immutable and in the form of deception), is like the quantum soup out of which each observer fixes what each calls "my reality" due to individual observations. This "my reality" is no more real than the perceptions and mentations that fix it. It is limited, ever-changing, and not the definitive truth. But there *is* truth; it is reality in and of itself. It is not other than the reality of oneself, the only observer—not other than the reality of the अव्यक्त, called अव्यक्त ब्रह्मन्. This

unchanging reality is not in time or space, which are just ingredients in "my reality." Identification with this shimmering "my reality"—a mutual imposing of natures between the observed and the observer, who wants and expects "my reality" to be as unchanging and real as myself (आत्मन्) yet, at the same time, perceives the observed as limiting and impinging on myself (simply because it is perceived as other than myself)—is the source of grief and death. Therefore, the first step in realizing the inherent freedom that is one's birthright is cutting attachment to this "my reality," this Tree of संसार (15.3–4).

Just as this timeless teaching has no fear of sciences, but rather embraces the sciences for what they are, so also does this teaching have no fear of religion. It embraces religion. This is why, in chapter 15, कृष्ण describes this limitless reality as the Lord, which "in-forms" this universe and the individual—nourishing all. The term *Lord* is used because this reality is not a dead, insentient thing. It is not the insentient प्रधान (*pradhāna*, unevolved nature) of the later-day साङ्ख्य philosophy, akin to the evolutionary materialism of the immature Western sciences. Rather, it is the source of the singular intelligent energy that modern string theorists cannot hope to describe. It is the real "soup of everything." The source of intelligent energy we call "the Lord" is infinitely more than what our minds can grasp; it is beyond all words and thoughts—because it is, indeed, none other than one's self. The limitless being that we can appreciate is but the self—the observer of all limitations, free of all limitations. It is not theory, not belief.

# अथ पञ्चदशोऽध्यायः

श्रीभगवानुवाच।
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २ ॥

## Fifteenth Chapter

| | |
|---|---|
| श्री-भगवान् उवाच। ऊर्ध्व-मूलम् [उत्कृष्ट-मूलम् इत्यर्थः], अधः-शाखम् [निकृष्ट-शाखम् इत्यर्थः], अ-व्ययम् अश्वत्थं प्राहुः, छन्दांसि यस्य पर्णानि। यः तं वेद, सः वेद-विद्॥१॥ | The Lord said: They say of the imperishable अश्वत्थ tree [i.e., संसार] that its [tap]root is ऊर्ध्व (superior) [i.e., grounded out of sight in the अव्यक्त ब्रह्मन्], its branches are अधस् (inferior) [i.e., within time–space], and its leaves are the वेद-s. The one who knows that is one who is a knower of the वेद. (**1**) |
| तस्य शाखाः अधः ऊर्ध्वं च प्रसृताः, गुण-प्रवृद्धाः, विषय-प्रवालाः। अधः च अनुसन्ततानि मूलानि मनुष्य-लोके कर्म-अनुबन्धीनि॥२॥ | Its branches [i.e., bodies] extend अधस् (below) [i.e., as humans, etc.] and ऊर्ध्व (above) [i.e., as celestial beings], are nourished by the गुण-s, and their buds [for new bodies] are the objects [in the world]. The अधस् (downward) [i.e., connected with humans] [secondary] roots spread out [from the taproot], connect to [past] कर्मन् [inciting new कर्मन्] in the world of humans. (**2**) |

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

---

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

---

इह तथा अस्य रूपं न उपलभ्यते, न अन्तः, न च आदिः, न च सम्प्रतिष्ठा। सु-विरूढ-मूलम् एनम् अश्वत्थं दृढेन अ-सङ्ग-शस्त्रेण छित्त्वा, ततः यस्मिन् गताः भूयः न निवर्तन्ति, तद् पदं परिमार्गितव्यम्। "यतः पुराणी प्रवृत्तिः प्रसृता, तम् एव च आद्यं पुरुषं प्रपद्ये" [इति] ॥ ३–४ ॥

As [described] here, its essential nature is not perceived—neither [its] end, beginning, nor middle [i.e., all of its perceived substantiality, upon further questioning, dissolves into ephemeral, contingent forms that "exist" only in name, none of which are its essential nature]. With a firm ax that is detachment, [first] cut [attachment to] this अश्वत्थ tree whose roots are well entrenched. Then that attainment is to be sought [i.e., inquired into] in which, having attained, they [the seekers] do not return again [by making this commitment]: "I surrender to that very पुरुष who is the origin from which [this] ancient manifestation is projected." (**3–4**)

---

निर्-मान-मोहाः, जित-सङ्ग-दोषाः, अध्यात्म-नित्याः, विनिवृत्त-कामाः, सुख-दुःख-सञ्ज्ञैः द्वन्-द्वैः विमुक्ताः, अ-मूढाः तद् अ-व्ययं पदं गच्छन्ति ॥ ५ ॥

Free from demanding respect and from delusion, having conquered the fault of attachment, always focused on the [limitless] I, whose requirements have completely gone, freed from the pairs of opposites known as pleasure and pain—[those who are] undeluded attain that imperishable attainment. (**5**)

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

---

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

---

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८ ॥

---

| | |
|---|---|
| न सूर्यः न शश-अङ्कः न पावकः तद् भासयते, यद् गत्वा न निवर्तन्ते। तद् मम परमं धाम॥६॥ | Neither the sun, nor moon, nor fire illumines that [because that limitless conscious being instead illumines these sources of light] which, having gained, they [the undeluded] do not return. That is the limitless abode of Me. (**6**) |
| मम एव अंशः सनातनः जीव-लोके जीव-भूतः प्रकृति-स्थानि मनः-षष्ठानि इन्द्रियाणि कर्षति॥७॥ | An aspect of Me alone, eternal and in the form of a जीव (an individual)—within [this] world having [many such] जीव-s—draws [to itself, as the conscious-being-reflected] the [subtle] [five] senses, with the mind as the sixth, [all of] which abide in प्रकृति. (**7**) |
| यद् ईश्वरः शरीरम् अवाप्नोति, यद् च अपि उत्क्रामति, एतानि गृहीत्वा संयाति, वायुः आशयात् गन्धान् इव॥८॥ | When the Lord [in the form of a जीव] obtains a [gross] body and, indeed, when that one departs [i.e., the body dies], [then]—gathering these [the subtle senses and mind]—that one departs like the wind, [having gathered] the [subtle] fragrances from their seat [i.e., from flowers]. (**8**) |

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११ ॥

---

| | |
|---|---|
| श्रोत्रं, चक्षुः, स्पर्शनं, रसनं च, घ्राणम् एव च, मनः च अधिष्ठाय, अयं [ईश्वरः जीवभूतः] विषयान् उपसेवते॥९॥ | Presiding over [by giving सत्य-ज्ञान (conscious being) to] [the subtle functions of] hearing, vision, touching, taste, and smelling—and the mind—this [Lord, in the form of the individual] experiences the sense objects. (**9**) |
| विमूढाः उत्क्रामन्तं स्थितं वा अपि, भुञ्जानं गुण-अन्वितं वा न अनुपश्यन्ति। ज्ञान-चक्षुषः पश्यन्ति॥१०॥ | The deluded do not see [i.e., do not understand according to the teaching] [the Lord in the form of the individual] who departs or even remains [in the body], who is experiencing and is endowed with the गुण-s. Those who have the vision that is [this] knowledge do see. (**10**) |
| यतन्तः योगिनः च एनम् आत्मनि अवस्थितं पश्यन्ति। यतन्तः अपि अ-कृत-आत्मानः अ-चेतसः [च] एनं न पश्यन्ति॥११॥ | [Also] योगिन्-s who strive [i.e., who contemplate to remove obstacles to knowing] see this [limitless] one abiding in themselves [i.e., in the intellect as the I]. [But], though striving, those whose minds are not ready and are not discerning do not see it [the limitless I]. (**11**) |

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

---

| | |
|---|---|
| यद् आदित्य-गतं तेजः अ-खिलं जगत् भासयते, यद् चन्द्रमसि, यद् च अग्नौ — तद् तेजः मामकं विद्धि॥१२॥ | The brilliance which, obtaining in the sun, illumines the entire world—which is in the moon and which is in fire—know that brilliance as Mine. (**12**) |
| अहं च गाम् आविश्य भूतानि ओजसा धारयामि। रस-आत्मकः च सोमः भूत्वा सर्वाः ओषधीः पुष्णामि॥१३॥ | Having entered the earth [as the brilliance from the sun], I sustain with My strength all beings. And being the extracted juice in the form of sap [from the earth], I nourish all plants [hence, I am the food]. (**13**) |
| अहं प्राणिनां देहम् आश्रितः प्राण-अपान-समायुक्तः वैश्वा-नरः भूत्वा चतुर्-विधम् अन्नं पचामि॥१४॥ | Being the digestive fire, obtaining in the body of living beings, and united with [i.e., stoked by] exhalation and inhalation, I cook [inside the body] the four kinds of food [drunk, chewed, licked, and sucked]. (**14**) |

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

---

| | |
|---|---|
| अहं च सर्वस्य हृदि सन्निविष्टः। मत्तः स्मृतिः ज्ञानम् अपोहनं च। सर्वैः वेदैः च अहम् एव वेद्यः। अहम् एव वेद-अन्त-कृत् वेद-विद् च॥१५॥ | And I am present [as the conscious being] in everyone's intellect [energized by Me as the digested food]. From Me are memory, knowledge, and forgetting [a necessity for dropping invalid notions]. I alone am to be known through all the वेद-s. I alone am the author of the वेद-s [including their Vedanta] and the one who comes to know the वेद-s. (**15**) |
| लोके इमौ द्वौ पुरुषौ — क्षरः च अ-क्षरः एव च। सर्वाणि भूतानि क्षरः, कूट-स्थः अ-क्षरः उच्यते॥१६॥ | Within the world, there are two पुरुष-s [i.e., two aspects of the पुरुष]: the perishable and the imperishable. All beings [i.e., all things] are the perishable, and कूट-स्थ (what remains immutable and in the form of deception; i.e., अव्यक्त or माया) is called the imperishable. (**16**) |
| अन्यः तु उत्तमः पुरुषः परम-आत्मा इति उदाहृतः, यः अ-व्ययः ईश्वरः लोक-त्रयम् आविश्य बिभर्ति॥१७॥ | Whereas, there is another उत्तम (transcendent) पुरुष [–that includes the other two] called परमात्मन् (the limitless self), who is the changeless Lord that, pervading the three worlds, sustains [all this which is this perishable and imperishable]. (**17**) |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| यस्मात्क्षरमतीतोऽहमक्षरादपि | | | | चोत्तमः । | | | |
| अतोऽस्मि | लोके | वेदे | च | प्रथितः | पुरुषोत्तमः ॥ | १८ | ॥ |
| यो | मामेवमसम्मूढो | | जानाति | पुरुषोत्तमम् । | | | |
| स | सर्वविद्भजति | | मां | सर्वभावेन | भारत ॥ | १९ | ॥ |
| इति | गुह्यतमं | | शास्त्रमिदमुक्तं | मयानघ । | | | |
| एतद्बुद्ध्वा | बुद्धिमान्स्यात्कृतकृत्यश्च | | | | भारत ॥ | २० | ॥ |

---

| | |
|---|---|
| यस्मात् अहं क्षरम् अतीतः, अ-क्षरात् अपि च उत्तमः, अतः लोके वेदे च पुरुष-उत्तमः [इति] प्रथितः अस्मि॥१८॥ | Because I am beyond the perishable [पुरुष] and also उत्तम (transcendent)—even to the imperishable [पुरुष]—therefore, among people [in popular literature] and in the वेद, I am renowned as पुरुषोत्तम (the being who transcends). (**18**) |
| यः एवम् अ-सम्मूढः मां पुरुष-उत्तमं जानाति, सः सर्व-विद् सर्व-भावेन मां भजति, भारत॥१९॥ | Being without delusion [through this teaching], the one who thus knows [the meaning of] Me as पुरुषोत्तम—that one becomes the knower of all [by knowing Me, the reality of all], [and thus] attains Me, because of being [identical to the Lord, to] all, O अर्जुन. (**19**) |
| इति मया इदं गुह्यतमं शास्त्रम् उक्तम्, अन्-अघ। एतद् बुद्ध्वा बुद्धिमान् कृत-कृत्यः च स्यात्, भारत॥२०॥ | Thus, I have told this most secret [i.e., secret in terms of sanctity, value, and by appearing to be difficult to understand] teaching, O Sinless One. Knowing this, one becomes one who has [made best use of one's] intellect and has done what is to be done, O अर्जुन. (**20**) |

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ।। १५ ।।

ओं तद् सत्। इति
श्रीमद्-भगवद्-गीतासु उपनिषत्सु
ब्रह्म-विद्यायां योग-शास्त्रे
श्री-कृष्ण-अर्जुन-संवादे
पुरुष-उत्तम-योगः नाम पञ्च-दशः
अध्यायः ।। १५ ।।

ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the fifteenth chapter, called "The Topic of the Being Who Transcends," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग.

# Chapter 16 दैवासुर-सम्पद्-विभाग-योग

## The Topic of the Distinction BetweenWorthy and Unworthy Dispositions

**दैव *daiva*** (*daiv*-[*a*]-*a*) *a*. (*f*. **ई**) (*fr*. √दिव् द्युतौ, दीव्यति इति that which shines) देवात् आगतः what has come from the Lord or the deities; देवस्य इदम् having to do with the Lord or the deities, belonging to the Lord or the deities, divine, uplifting, सात्विक predominantly of सत्त्व-गुण; युक्त appropriate, worthy (e.g., a worthy behavior). **दैव *daiva*** *n*. देवता deity.

# Chapter 16 दैवासुर-सम्पद्-विभाग-योग

## The Topic of the Distinction Between Worthy and Unworthy Dispositions

In this chapter, Lord कृष्ण returns to distinguishing appropriate and inappropriate attitudes and behaviors, using the two terms दैव (*daiva*) and आसुर (*āsura*) (*see* 9.12–13), meaning *worthy* and *unworthy*, instead of using the three गुण-s. This change of categorization terminology brings up an important point: The teaching of Advaita Vedanta, unlike many philosophies and religions, has no interest in simply categorizing attitudes and behaviors, simply assigning names to various forms of thinking, behaving, or being. Rather, the ultimate purpose in categorizing is to direct us to see beyond names and forms, to appreciate the unchanging, underlying reality. If there are attitudes and behaviors that are helpful or not in bringing about this appreciation, they are indicated. It is not to praise or condemn them, but to point to their possible importance in gaining appreciation of the reality of oneself and the world. Once reality is appreciated for what it is, all these categories drop their significance. None of these categories are ultimate or absolute divisions in the final analysis.

The lack of importance in the naming and categorizing of things shows in the various ways for unfolding the vision of reality seen in वेदान्त (*Vedānta*, the concluding section of the *Veda*s), in the उपनिषद्-s. For example, the creation or evolution of divisions in the world being not ultimately real, different teachers in the different उपनिषद्-s describe the apparent creation of the universe variously as coming from सत् (*sat*, reality), from असत् (*asat*, the unmanifest), from ब्रह्मन् (another word for *reality*, and for the Lord), from आत्मन् (oneself, the limitless self), from प्राण (subtle being), etcetera. All these creation descriptions are only *as if*, temporary explanations for the student who believes the world is real to eventually reveal that these are just so many words and words, and that the reality of the student alone is the reality of these words, of this universe of words and their apparent divisions.

This one unchanging reality is also pointed out variously using different terms: as ब्रह्मन्, ईश् (meaning ईश्वर, *Īśvara*, the Lord), and आत्मन् that reference this one reality in terms of itself, the universe, and oneself, respectively. Moreover, the term for reality, ब्रह्मन्, is used interchangeably with

ईश्वर and आत्मन्; the term for the Lord, ईश्वर, with ब्रह्मन् or आत्मन् (*see* 15.8); and the term for the reality of oneself, आत्मन्, with ब्रह्मन्, ईश्वर, देव (*deva*, shinning one, deity), and so on.

Similar is the various categorizations of reality in this teaching, depending on the perspective towards the one reality that one is assuming for the moment. One can temporarily assume two levels of reality: the real and the unreal (सत् and असत्); or three: the absolute, objective, and imaginary (पारमार्थिक *pāramārthika*, व्यावहारिक *vyāvahārika*, and प्रातिभासिक *prātibhāsika*).

In the भगवद् गीता, कर्म-योग is taught specifically to move the individual's identity from predominately प्रातिभासिक (too much subjectivity and self-importance) to व्यावहारिक (more objectivity, more ईश्वर in one's life), and, eventually, to पारमार्थिक (that one is that ईश्वर, the only reality); whereas साङ्ख्य (the knowledge of reality introduced in the second chapter, *see* 2.39) assumes the individual is already reasonably objective and attempts to move the individual's identity from व्यावहारिक to पारमार्थिक, from the changing असत् (unreal) to the unchanging सत्.

This switching of terminology and perspective is a method employed in the Advaita Vedanta teaching tradition to clarify one's understanding of reality from every perspective, deterring just memorization of categories. But, to be effective, the method requires a teacher who knows the whole methodology and who has fully benefited from the teaching. The teaching tradition is for passing on this knowledge fully and faithfully to future teachers: oneself re-teaching oneself during situational backslides into habitual thinking and behaviors, as well as passing on this teaching methodology to future generations.

# अथ षोडशोऽध्यायः

श्रीभगवानुवाच।
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ ३ ॥

---

## Sixteenth Chapter

श्री-भगवान् उवाच।
अ-भयं, सत्त्व-संशुद्धिः,
ज्ञान-योग-व्यवस्थितिः, दानं, दमः च,
यज्ञः च, स्व-अध्यायः, तपः, आर्जवम्,
अ-हिंसा, सत्यम्, अ-क्रोधः, त्यागः,
शान्तिः, अ-पैशुनं, भूतेषु दया,
अ-लोलुप्त्वं, मार्दवं, ह्रीः, अ-चापलं,
तेजः, क्षमा, धृतिः, शौचम्, अ-द्रोहः,
न-अतिमानिता — दैवीं सम्पदम्
अभिजातस्य भवन्ति, भारत ॥ १–३ ॥

The Lord said:
Freedom from fear, purity of mind, steadiness in [i.e., commitment to] knowledge and its contemplation, charity, mastery over the [ways of] behavior, performing [daily] यज्ञ [prayers, etc.], reciting to oneself the वेद texts, prayerful discipline, straightforwardness, harmlessness, truthfulness, resolution of anger, renunciation, clarity, अपैशुन (not exposing defects of one person to another), compassion toward living beings, अलोलुप्त्वं (absence of agitation of the senses in the presence of objects), gentleness, modesty, absence of [meaningless] physical agitation, brilliance [expressed as self-confidence], accommodation [i.e., patience and understanding], resolve, cleanliness, absence of malice, absence of demanding respect from others—[these] are there for one born to the wealth of a देव, O अर्जुन. (**1–3**)

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥ ४ ॥

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥ ५ ॥

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

---

| | |
|---|---|
| पार्थ, दम्भः दर्पः अभिमानः च, क्रोधः पारुष्यम् एव च, अ-ज्ञानं च — आसुरीं सम्पदम् अभिजातस्य॥४॥ | O अर्जुन, hypocrisy, arrogance [i.e., not understanding the factors responsible for what one has, thinking “I am responsible for these”], demanding respect from others, anger, harshness and lack of discernment—[these] are there for one born to the wealth of an असुर. (**4**) |
| दैवी सम्पत् विमोक्षाय, आसुरी निबन्धाय मता। मा शुचः, दैवीं सम्पदम् अभिजातः असि, पाण्डव॥५॥ | The wealth [i.e., disposition] of a देव (worthy person) is considered [to lead] to freedom and of an असुर (unworthy person) to bondage. Do not worry; you are born to the wealth of a देव, O अर्जुन. (**5**) |
| अस्मिन् लोके द्वौ भूत-सर्गौ दैवः आसुरः एव च। पार्थ, दैवः विस्तरशः प्रोक्तः, आसुरं मे शृणु॥६॥ | In this world, there are two manifestations of [human] beings—the दैव (the worthy, who go with धर्म) and the आसुर (the unworthy, who fight against धर्म). O अर्जुन, the worthy has been told in detail. [Now] listen to Me about the unworthy. (**6**) |
| आसुराः जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। तेषु न शौचं, न अपि आचारः, न च सत्यं विद्यते॥७॥ | People who are unworthy do not know [adaptive] pursuit or [adaptive] withdrawal. In them there is no [inner] cleanliness, no [adaptive] conduct nor truth. (**7**) |

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ ८ ॥

---

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥

---

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ॥ १० ॥

---

| | |
|---|---|
| जगत् अ-सत्यम्, अ-प्रतिष्ठम्, अन्-ईश्वरम्, काम-हैतुकम् अपरस्-पर-सम्भूतं किम् अन्यद् [इति] ते आहुः ॥ ८ ॥ | —They say [that] people are untruthful [because they themselves are untruthful], are without [an ethical] basis [because they are without one], are godless [because they are], and are born of mutual union [of male and female] due to lust [not due to their कर्म-फल]—nothing else. (**8**) |
| एतां दृष्टिम् अवष्टभ्य, नष्ट-आत्मानः, अल्प-बुद्धयः, उग्र-कर्माणः, अ-हिताः जगतः क्षयाय प्रभवन्ति ॥ ९ ॥ | Having recourse to this view [where there is no personal responsibility toward others or for oneself], [thus] whose intellects are lost, [thus] whose minds are limited [to sense pursuits], who are of cruel actions—[these] enemies are set for destroying the world. (**9**) |
| दुष्-पूरं कामम् आश्रित्य, दम्भ-मान-मद-अन्विताः, मोहात् अ-सद्-ग्राहान् गृहीत्वा, अ-शुचि-व्रताः प्रवर्तन्ते ॥ १० ॥ | Taking to desire that is insatiable; filled with hypocrisy, demands for respect, and with arrogance; assuming improper understandings due to delusion; and with unworthy vows, they keep going [in संसार]. (**10**) |

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ ११ ॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १२ ॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥

---

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४ ॥

---

| | |
|---|---|
| प्रलय-अन्तां च अ-परिमेयां चिन्ताम् उपाश्रिताः, काम-उपभोग-परमाः, "एतावत्" इति निश्चिताः, आशा-पाश-शतैः बद्धाः, काम-क्रोध-पर-अयणाः, काम-भोग-अर्थम् अ-न्यायेन अर्थ-सञ्चयान् ईहन्ते ॥ ११–१२ ॥ | Committed to innumerable worries [over their possessions], which last till death; having consumption of objects of desire as the ultimate; having concluded that [life] is "only this much" [i.e., having a philosophy that life is only for consumption]; bound by hundreds of fetters that are anticipations; having as their goal [more and more exaggerated] requirements and anger [to control others]—they engage in accumulating wealth for the enjoyment of objects of desire through inappropriate means. (**11–12**) |
| "अद्य मया इदं लब्धम्, इदं मनो-रथं प्राप्स्ये। इदम् अस्ति, पुनः मे इदम् अपि धनं भविष्यति" ॥ १३ ॥ | [Boasting] "Today I have gained this, and I will acquire this fanciful object [tomorrow]. This [wealth I have] now, and this [other] wealth also will be mine." (**13**) |
| "मया असौ शत्रुः हतः, अपरान् च अपि हनिष्ये। अहम् ईश्वरः। अहं भोगी। अहं सिद्धः बलवान् सुखी" ॥ १४ ॥ | "I have destroyed this enemy, and others I will also destroy. I am the ruler. I am the enjoyer. I am successful, powerful, and happy." (**14**) |

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १५ ॥

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ १६ ॥

आत्मसम्भाविताः स्तब्धा धनमानमदान्तिताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १७ ॥

---

| | |
|---|---|
| "आढ्यः अभिजनवान् [च] अस्मि। कः अन्यः मया स-दृशः अस्ति। यक्ष्ये दास्यामि मोदिष्ये।" इति अ-ज्ञान-विमोहिताः॥१५॥ | "I am wealthy and have an exalted family. Who is there the equal of me! I will perform rituals, I will give, I will enjoy." Thus those [boast] who are variously lacking in discernment due to ignorance [of धर्म and अधर्म, much less of आत्मन्]. (**15**) |
| अन्-एक-चित्त-विभ्रान्ताः, मोह-जाल-समावृताः, काम-भोगेषु प्रसक्ताः अ-शुचौ नरके पतन्ति॥१६॥ | Variously deluded by many [such] thoughts, enveloped by a net of delusion, attached to the objects of desire [thus compromising on the means to attain these, they accumulate पाप], [and so] they fall into an unworthy hell [until the next bad birth]. (**16**) |
| आत्म-सम्भाविताः, स्तब्धाः, धन-मान-मद-अन्विताः ते दम्भेन अ-विधि-पूर्वकं नाम-यज्ञैः यजन्ते॥१७॥ | Honored only by themselves, pompous [i.e., unable to bow to anyone], filled with demands for respect, and arrogant because of wealth, they sacrifice with rituals that are in name only [since they are done] out of hypocrisy [not श्रद्धा] and not in accordance to injunction. (**17**) |

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥ १८ ॥
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥

---

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २० ॥

---

| | |
|---|---|
| [ये] अहङ्-कारं बलं दर्पं कामं क्रोधं च संश्रिताः, आत्म-पर-देहेषु मां प्रद्विषन्तः, अभ्यसूयकाः — तान् द्विषतः क्रूरान् नर-अधमान् अ-शुभान् अहं संसारेषु आसुरीषु एव योनिषु अ-जस्रं क्षिपामि॥ १८–१९॥ | Those who are given to an [exaggerated] self-opinion, power, arrogance, desirable objects, and anger; despising Me in their own and in others' bodies; and cynical—those hateful, cruel, lowest among people, who do ugly deeds—I continually toss [according to their कर्मन्] into [the many] paths of existence [i.e., births] [consisting of] only demonic wombs [i.e., births as frightening creatures]. (**18–19**) |
| कौन्तेय, मूढाः जन्मनि जन्मनि आसुरीं योनिम् आपन्नाः माम् अ-प्राप्य एव, ततः अधमां गतिं यान्ति॥ २०॥ | O अर्जुन, those lacking discernment, falling into a demonic womb in birth after birth, of course, having not attained Me—they [may] go from there [all the way] to the lowest end. (**20**) |

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥

---

| | |
|---|---|
| कामः क्रोधः तथा लोभः इदं त्रि-विधं नरकस्य द्वारम् आत्मनः नाशनम्। तस्मात् एतद् त्रयं त्यजेत्॥ २१॥ | Desire [i.e., requiring], anger, and greed: This is the threefold gate of hell [i.e., painful experience], which is the loss of oneself [i.e., it is the destruction of a mind able to pursue a worthy existence]. Therefore, one should give up this triad [by this teaching]. (**21**) |
| कौन्तेय, एतैः त्रिभिः तमो-द्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, ततः परां गतिं याति॥ २२॥ | O अर्जुन, being freed from these three gates to darkness [i.e., to further lack of discernment], one follows what is good for oneself. Thereupon, that one gains a better end [even all the way to complete freedom, मोक्ष]. (**22**) |
| यः शास्त्र-विधिम् उत्सृज्य काम-कारतः वर्तते, सः सिद्धिं न अवाप्नोति, न सुखं, न परां गतिम्॥ २३॥ | The one who, casting away the scriptural injunctions [regarding what is धर्म and अधर्म], acts out of the pressure of requiring—that one does not attain success [i.e., maturity], nor happiness [in this life], nor a better end. (**23**) |

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ २४ ॥

---

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः॥१६॥

---

| | |
|---|---|
| तस्मात् कार्य-अ-कार्य-व्यवस्थितौ शास्त्रं ते प्रमाणम्। शास्त्र-विधान-उक्तं ज्ञात्वा, इह कर्म कर्तुम् अर्हसि॥२४॥ | Therefore, in the determination of what is to be done and not to be done, the scripture is your प्रमाण (means of knowledge). Knowing what is said by the scripture as an injunction, you ought to do [your] duty here [i.e., as a human being capable of choice, follow धर्म]. (**24**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे दैव-असुर-सम्पद्-विभाग-योगः नाम षो-डशः अध्यायः॥१६॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the sixteenth chapter, called "The Topic of the Distinction between Worthy and Unworthy Dispositions," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 17 श्रद्धा-त्रय-विभाग-योग

## The Topic of the Distinction of the Three *Śraddhā*s

**श्रद्धा *śraddhā*** (*śrad-dh*[*ā*]-[*a*]-*ā*) *f.* (*fr.* श्रद् heart/mind + √धा प्रदाने give) विश्वास trust (especially in the *Veda* and *guru*), respect, a positive and receptive attitude in learning pending confirmation or dis-confirmation; भक्ति faith, devotion (towards the Lord); शील one's entire value structure and attitude towards life; (in regard to the *śruti*) आस्तिक्य-बुद्धि an attitude that the *Veda* is a *pramāṇa* (a valid means of knowledge).

# Chapter 17 श्रद्धा-त्रय-विभाग-योग

## The Topic of the Distinction of the Three *Śraddhā*s

Chapter seventeen is mostly about श्रद्धा (*śraddhā*)—a positive and receptive (सत्त्व) attitude toward learning and life. It is also about the importance of accepting particular universal concepts and facts of reality that are helpful to the development of spiritual maturity. These universal concepts (such as the existence of कर्मन् or of heaven) and facts (such as oneself being none other than the limitless existence, ब्रह्मन्) cannot be established by reason—but they are not against reason. Reason based on perceptions cannot prove or disprove what cannot in anyway be perceived or tested (heaven, ब्रह्मन्). However, reason *can* help us understand the concepts and facts, introduced by scripture teaching, that are outside of sense perception.

Let us assume a person has trust in the teaching that the individual can exist in some way before and after this life. Reason cannot establish this, but once accepted on trust, it can be seen as reasonable, in that it is not unlike the cycling of heavenly and hellish experiences we all have survived in this life that we know in some small or great way we deserved or could not avoid. This acceptance of a continuance of life, and its assumption based on universal कर्मन् (cause and effect, potentials created that can fructify much later), provides an objective basis for understanding how my and other's life is like it is, instead of basing these on sectarian morality, on simple mechanical causality, or on chaotic blind chance.

This objective, universal basis that spans this one life, as well as before and after this life, allows us to take a long-term approach to understanding and making choices in life. Such a long-term approach provides an objective and healthy balance to our whatever-I-can-get-away-with tendencies in life choices and to the why-me responses we have toward painful episodes.

In this short life it is not possible to perceive, and hence confidently infer, कर्मन्, heaven, or the limitless nature of oneself. In order to be as doubtless and confident in these concepts and facts as we are doubtless and confident in our sense perceptions, we must consider that there should be a

separate means for knowing these with certainty. That means of knowing is here called scripture (श्रुति, *śruti*). श्रद्धा (trust) in this श्रुति allows us to yield the full benefits of its resulting understandings of life and the world—because these understandings are taken as being as valid as sense perceptions. But if we only halfway believe in कर्मन् and heaven, then, when in crisis, we might lack confidence and spiritual maturity in the face of these situations.

With full श्रद्धा, we can remain unshaken during the unavoidable highs and lows of life. But these beliefs, unlike the fact of one's limitless nature, must be recognized as *beliefs*, as possibly as much a myth as any other myth (for example, that there definitely are no heavens or hells, no life prior to this life, etcetera). The real value of the beliefs one accepts is in the maturity of their resulting world view that they provide you.

On one hand, we have gathered in our life opinions based on current pop culture. Yet we know they can be contradicted next week, next year, next government, next decade, next century. These opinions may have benefited some people, but on what basis does one assume that they will benefit my life? Or that they will benefit me later on in my life when I know more than I do now?

On the other hand, we have traditional teachings, perhaps as mythical as the opinions from pop culture, yet we know those teachings must have benefited people throughout their life in some way for countless generations to have survived thousands of years. If those teachings have accumulated and developed over those thousands of years and are not just an ancient, frozen document, and if those teachings are about the common human condition and are about topics that modern science has no access, then in whom should you trust?

An intelligent seeker of truth ought not to blindly accept what any teacher says. Rather, the seeker asks questions in order to discern the validity and benefit of what is being taught. To whom should I surrender my श्रद्धा and my life? Are there half-truths, nonsense, or unintended consequences in these beliefs? These are the concerns of an intelligent seeker of truth. Our श्रद्धा should always be intelligent, always be सात्त्विक.

# अथ सप्तदशोऽध्यायः

अर्जुन उवाच।
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥

---

श्रीभगवानुवाच।
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥

---

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥

---

## Seventeenth Chapter

| | |
|---|---|
| अर्जुनः उवाच। कृष्ण, ये शास्त्र-विधिम् उत्सृज्य श्रद्धया तु अन्विताः यजन्ते, तेषां का निष्ठा — सत्त्वं रजः आहो तमः ॥ १ ॥ | अर्जुन said: O कृष्ण, those who perform ritual, casting away scriptural injunction yet being endowed with श्रद्धा—what is their disposition? सत्त्व, रजस्, or तमस्? (**1**) |
| श्री-भगवान् उवाच। देहिनां सा स्व-भाव-जा श्रद्धा सात्त्विकी राजसी च तामसी च इति त्रि-विधा एव भवति। तां शृणु ॥ २ ॥ | The Lord said: For embodied ones [i.e., for humans], that श्रद्धा (value structure and attitude toward life)—born of one's nature [i.e., from the mind's latent tendency]—is threefold: predominately सत्त्व, predominately रजस्, and predominately तमस्. Listen about these. (**2**) |
| सर्वस्य श्रद्धा सत्त्व-अनुरूपा भवति, भारत। अयं पुरुषः श्रद्धामयः। यः यच्-छ्रद्धः, सः एव सः ॥ ३ ॥ | Everyone's श्रद्धा is in keeping with [their] mind [with its specific, latent tendencies], O अर्जुन. The person [i.e., the whole life] is permeated by [that] श्रद्धा. Whatever is one's श्रद्धा [i.e., whatever it conforms to], that one is [i.e., lives]. (**3**) |

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥

---

| | |
|---|---|
| सात्त्विकाः देवान् यजन्ते, राजसाः यक्ष-रक्षांसि, अन्ये तामसाः जनाः प्रेतान् भूत-गणान् च यजन्ते॥४॥ | The predominately सत्त्व worship the deities; the predominately रजस् worship the यक्ष-s and रक्षस्-es (protectors and stealers of wealth); and other people, who are predominately तमस्, worship ghosts and the hosts of [harmful] spirits. (**4**) |
| ये दम्भ-अहङ्-कार-संयुक्ताः काम-राग-बल-अन्विताः अ-चेतसः जनाः शरीर-स्थं भूत-ग्रामम् अन्तः-शरीर-स्थं मां च एव कर्शयन्तः अ-शास्त्र-विहितं घोरं तपः तप्यन्ते, तान् आसुर-निश्चयान् विद्धि॥५–६॥ | Those people [predominately रजस् or तमस्] who are riddled with hypocrisy and an exaggerated self-opinion; filled with the pressure of requiring/anticipating and attraction; are nondiscerning; who perform gruesome [to themselves and to other creatures] तपस् (religious disciplines) not enjoined in the scripture; who emaciate the elements [i.e., organs] of the body and Me, also attaining in the body [in that they rub against My teaching, My laws]—know them to be ones whose convictions are unworthy. (**5–6**) |

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

---

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

---

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥

---

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥

---

| | |
|---|---|
| अपि तु सर्वस्य आहारः त्रि-विधः प्रियः भवति, तथा यज्ञः तपः दानं [च]। तेषाम् इमं भेदं शृणु॥७॥ | Food also, for everyone, is favored threefold; similarly is ritual, religious discipline, and charity. Listen to this their difference. (**7**) |
| आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीति-विवर्धनाः, रस्याः, स्निग्धाः, स्थिराः, हृद्याः आहाराः सात्त्विक-प्रियाः॥८॥ | Foods that increase longevity, mental clarity, strength, health, pleasure [in taste], and satisfaction [visually or physically], [that are] tasty, oily, long lasting [in the body], and pleasing to the mind—[they] are [said to be] a favorite of one predominately सत्त्व. (**8**) |
| कटु-अम्ल-लवण-अत्युष्ण-तीक्ष्ण-रूक्ष-विदाहिनः, दुःख-शोक-आमय-प्रदाः आहाराः राजसस्य इष्टाः॥९॥ | Foods that are [too] pungent, sour, salty, spicy hot, bitter, astringent, or burning and that give pain, sorrow, and disease are [said to be] a favorite of one predominately रजस्. (**9**) |
| यद् च यात-यामं, गत-रसं, पूति, पर्युषितं, उच्छिष्टम्, अ-मेध्यम् अपि च भोजनं तामस-प्रियम्॥१०॥ | Food whose occasion [to be eaten] has elapsed, [that is] without taste, stinking [e.g., liquor, meat, etc.], stale, [is] scrap [from another's plate], or not fit to be offered is [said to be] a favorite of one predominately तमस्. (**10**) |

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥

---

| | |
|---|---|
| "यष्टव्यम् एव" इति मनः समाधाय अ-फल-आकाङ्क्षिभिः यः विधि-दृष्टः यज्ञः इज्यते, सः सात्त्विकः॥११॥ | A ritual known through [i.e., followed according to] the scripture, which is performed by those who do not require/anticipate [its] result [and performed] with the resolve that [it] is "simply to be done as a worship"—that [यज्ञ] is predominately सत्त्व. (**11**) |
| भरत-श्रेष्ठ, फलं तु अभिसन्धाय दम्भ-अर्थम् अपि एव च यद् इज्यते, तं यज्ञं राजसं विद्धि॥१२॥ | —Whereas, O अर्जुन, whatever [ritual] is performed having as [its] purpose [its] result or, indeed, [is performed] only out of hypocrisy—know that ritual to be predominately रजस्. (**12**) |
| विधि-हीनम्, अ-सृष्ट-अन्नं, मन्त्र-हीनम्, अ-दक्षिणं, श्रद्धा-विरहितं यज्ञं तामसं परिचक्षते॥१३॥ | A ritual without [or against] scriptural injunction, in which no food is distributed, without मन्त्र [or defective in its accent or utterance], without [proper] दक्षिणा (wealth given as appropriate to the person's function), and without faith—they call predominately तमस्. (**13**) |

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥

---

| | |
|---|---|
| देव-द्विज-गुरु-प्राज्ञ-पूजनं, शौचम्, आर्जवं, ब्रह्म-चर्यम्, अ-हिंसा च शारीरं तपः उच्यते॥१४॥ | तपस् pertaining to the body is said to be the honoring of deities, of those initiated into scriptural study, [and] of teachers and scholars; cleanliness; straightforwardness [of thought, word, and deed]; a life of studentship to the वेद-s [for the unwed, it also implies chastity]; and harmlessness. (**14**) |
| यद् अन्-उद्वेग-करं सत्यं प्रिय-हितं च वाक्यं, स्व-अध्याय-अभ्यसनं च एव वाङ्मयं तपः उच्यते॥१५॥ | तपस् in the form of speech is said to be speech that is not agitating, is truthful, and both pleasant [now] and beneficial [later] [for the other person], as well as reciting to oneself the वेद texts [daily, in the prescribed manner]. (**15**) |
| मनः-प्रसादः, सौम्यत्वं, मौनं, आत्म-विनिग्रहः, भाव-संशुद्धिः इति एतद् मानसं तपः उच्यते॥१६॥ | तपस् pertaining to the mind is said to be this: mental clarity, cheerfulness, discipline over [inner] speech [i.e., the nonarising of—or the restraint of expressing—unhelpful thoughts], mastery [in general] over the mind, and clean intentions. (**16**) |

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७ ॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

| | |
|---|---|
| अ-फल-आकाङ्क्षिभिः युक्तैः नरैः परया श्रद्धया तप्तं तद् त्रि-विधं तपः सात्त्विकं परिचक्षते॥१७॥ | That threefold तपस् [pertaining to body, speech, and mind]—performed with complete श्रद्धा [in this teaching] by disciplined people who do not require/anticipate [limited] results [like wealth and पुण्य, but instead only seek clarity of mind for knowledge]—they say is predominately सत्त्व. (**17**) |
| सत्-कार-मान-पूजा-अर्थं दम्भेन च एव यद् तपः क्रियते, तद् इह चलम् अ-ध्रुवं राजसं प्रोक्तम्॥१८॥ | तपस् that is performed in word, mind, and deed for the sake of [demanding from others] worship and, indeed, only out of hypocrisy—that, [in keeping with its result] here, being unsteady and not long-lasting, is said to be predominately रजस्. (**18**) |
| मूढ-ग्राहेण आत्मनः पीडया परस्य उत्सादन-अर्थं वा यद् तपः क्रियते, तद् तामसम् उदाहृतम्॥१९॥ | तपस् that is performed out of a deluded understanding, for inflicting pain on oneself or for destroying another—that is said to be predominately तमस्. (**19**) |
| दातव्यम् इति अन्-उपकारिणे देशे काले च पात्रे च यद् दानं दीयते, तद् दानं सात्त्विकं स्मृतम्॥२०॥ | Charity that is given [with the thinking] "[it is simply] to be given," without regard to [the others'] ability to [return the] favor, at the [proper] place and time, and to a worthy person—that is held to be predominately सत्त्व. (**20**) |

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

| | |
|---|---|
| प्रत्युपकार-अर्थं तु फलम् उद्दिश्य वा पुनः, परिक्लिष्टं च यद् दीयते, तद् दानं राजसं स्मृतम्॥ २१॥ | —Whereas charity that is given for the sake of a return favor or, on the other hand, with a view for a [later] result [i.e., for पुण्य]—and is fraught with pain [i.e., a sense of loss at the cost of the charity]—that is held to be predominately रजस्. (**21**) |
| अ-देश-काले अ-पात्रेभ्यः च, अ-सत्-कृतम् अवज्ञातं यद् दानं दीयते, तद् तामसम् उदाहृतम्॥ २२॥ | Charity that is given at the wrong [or inauspicious] place or time, to those who are not worthy [e.g., fools or thieves], that is given improperly [i.e., with improper protocol, or] with disrespect [to the recipient]—that is said to be predominately तमस्. (**22**) |
| "ओं तद् सत्" इति ब्रह्मणः त्रि-विधः निर्देशः स्मृतः। तेन ब्राह्मणाः वेदाः च यज्ञाः च पुरा विहिताः॥ २३॥ | "ओं तद् सत्"[8] is considered the threefold expression [revealing] ब्रह्मन्. By that [Lord ब्रह्मा], the ब्राह्मण-s [i.e., all people; hence, all creatures—since जीव-s require various embodiments], the [four] वेद-s, and यज्ञ-s were formed in the beginning [of each cycle]. (**23**) |

[8] For more on the meaning of ओम् and सत्, see *The Bhagavad Gita Dictionary* (Aruna 2012).

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ २५ ॥

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥

---

| | |
|---|---|
| तस्मात् "ओम्" इति उदाहृत्य ब्रह्म-वादिनां विधान-उक्ताः यज्ञ-दान-तपः-क्रियाः स-ततं प्रवर्तन्ते॥ २४॥ | —Therefore, for those who know the वेद-s, activities—[such as] rituals, charity, and prayerful disciplines mentioned in [scriptural] injunctions—are always begun [by first] uttering "ओम्" (considered a purifying sound). (**24**) |
| "तद्" इति फलम् अन्-अभिसन्धाय मोक्ष-काङ्क्षिभिः विविधाः यज्ञ-तपः-क्रियाः दान-क्रियाः च क्रियन्ते॥ २५॥ | [Uttering] "तद्" ("that," also purifying when it refers to ब्रह्मन् in expressions such as "ओं तद् सत्"), those who [only] desire complete freedom perform various activities—[such as] यज्ञ, तपस्, and दान—without requiring [the particular activity's limited] result. (**25**) |
| पार्थ, "सत्" इति एतद् सद्-भावे साधु-भावे च प्रयुज्यते, तथा सच्-छब्दः प्रशस्ते कर्मणि युज्यते॥ २६॥ | O अर्जुन, this [word] "सत्" [also a purifying sound that in its various forms, from the root अस् ("to exist"), refers to existence, which is but ब्रह्मन्] is used in the sense of "being existent" and "being good." Similarly, the word "सत्" is used in the sense of "sacred action." (**26**) |

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥१७॥

---

| | |
|---|---|
| यज्ञे तपसि दाने च स्थितिः "सत्" इति उच्यते च, तद्-अर्थीयं च कर्म एव "सत्" इति एव अभिधीयते॥२७॥ | A स्थिति (pursuit or commitment, with श्रद्धा) toward यज्ञ, तपस्, or दान is also called "सत्" [i.e., a "proper" pursuit] and, indeed, [any] action that is for the sake of तद् (that [Lord], as in the expression, तत् त्वम् असि "That [Lord] you are") is called "सत्." (**27**) |
| पार्थ, अ-श्रद्धया हुतं दत्तं तपः तप्तं च यद् कृतम् "अ-सत्" इति उच्यते, तद् न [अस्ति] च प्रेत्य नो इह॥२८॥ | O अर्जुन, whatever offering, charity, or discipline is done without श्रद्धा is said to be "असत्" [i.e., as good as not done]; [since] after death it [i.e., the action in the form of कर्म-फल] is not, nor [is it] here [in this life] [i.e., it only amounts to a loss of effort and cost]. (**28**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे श्रद्-धा-त्रय-विभाग-योगः नाम सप्त-दशः अध्यायः॥१७॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the seventeenth chapter, called "The Topic of the Distinction of the Three श्रद्धा-s," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] a knowledge of ब्रह्मन् and योग. |

# Chapter 18 मोक्ष-सन्न्यास-योग

## The Topic of the Renunciation That Gives Complete Freedom

**मोक्ष** ***mokṣa*** (*mokṣ-a*) *m.* (*fr.* √मोक्ष् त्यागे free) मुक्ति complete freedom (from any notion of bondage).

# Chapter 18 मोक्ष-सन्न्यास-योग

## The Topic of the Renunciation That Gives Complete Freedom

This final chapter of the भगवद् गीता answers अर्जुन-'s long-lasting concern about a life of renunciation, completes the unfoldment of other open topics, and covers new ones (e.g., the five causes or factors for the accomplishment of all actions in verses 13–16). Chapter eighteen closes with praise of the teaching lineage (18.67–78) and sums up (18.50–66) the Advaita Vedanta teaching with the essentials that कृष्ण wishes अर्जुन—and us—to focus on. That focus is, through कर्म-योग and ज्ञान-योग, to drop identification as a separate body-mind complex. We are to objectively recognize that this time-bound, limited body-mind complex and its actions are not our own but instead belong to the interconnected totality, to the natural order as a temporary manifestation of the Lord. We are to recognize our timeless identity as the limitless Lord, as existence itself.

कृष्ण does not stop teaching until the student, अर्जुन, is fully satisfied and acknowledges that he has understood. This is because the teaching is not only for the student, but is also for the teacher inherent in the student, as the student becomes the teacher for himself or herself throughout the rest of life. Every time the unassimilated mind strays into its old, habitual thinking, the student's now-informed intellect catches the digression and brings the mind back to clarity. The student's informed intellect is the same as the teacher's informed intellect, the same as the informed intellect of that teacher's teacher, and so on, from the beginningless beginning. That student may eventually become the teacher of others also. The Advaita Vedanta teaching prepares us for all this. It is complete in every way.

All of life, then, is a field for us to resolve remaining habitual thinking. Ultimately, human life is for correcting the erroneous sense of limitation we have and the resulting unacceptability of oneself. It is natural that a teaching exists that directly addresses this need in the human heart—just as the human body needs air, so air is provided; needs food, so food is provided. This teaching is universal to all humankind. आत्मन्, the essential conscious being, is as universal as it gets. That the आत्मन् is the

limitless reality of this universe is also as universal as it gets. A life of acknowledging the interconnectedness of the entire cosmos is both ancient and modern, religious and scientific. A life of dedication to one's duty, in recognition of this interconnectedness, is similarly universal and timeless. To the extent that modern cultures do not emphasize this truth, to that extent these cultures have yet to mature. This complete teaching was not created by Indians. It is the teaching of the Lord—the Lord which is everything, including oneself.

Until we become teachers unto ourselves, we stay with these words of the Lord. We listen to a teacher (4.34) who can unfold these words as they have been unfolded for millennia. This will bring us to the fulfillment of human life—a life free of grief, free of guilt, free of hurt, free of fear, and free of death.

# अथाष्टादशोऽध्यायः

अर्जुन उवाच।
सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

---

श्रीभगवानुवाच।
काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥

---

## Eighteenth Chapter

| | |
|---|---|
| अर्जुनः उवाच।<br>हृषीक-ईश महा-बाहो केशि-निषूदन, सन्न्यासस्य त्यागस्य च पृथक् तत्त्वं वेदितुम् इच्छामि॥१॥ | अर्जुन said:<br>O कृष्ण, Great Warrior and Slayer of [the Demon] केशिन्, I want to know distinctly the truth of [i.e., the difference between] सन्न्यास and त्याग (both terms mean "renunciation" and are used both separately and seemingly interchangeably by Lord कृष्ण in this teaching). (**1**) |
| श्री-भगवान् उवाच।<br>कवयः काम्यानां कर्मणां न्यासं सन्न्यासं विदुः। विचक्षणाः सर्व-कर्म-फल-त्यागं त्यागं प्राहुः॥२॥ | The Lord said:<br>Sages know renunciation of [all] कर्मन्-s backed by desire to be सन्न्यास [i.e., the lifestyle and, especially, the knowledge "I am not the doer"]. The wise [also] say that renunciation of the फल (the result) of all actions [i.e., कर्म-योग as also taught here] is त्याग. (**2**) |

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥ ४ ॥

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥

---

| | |
|---|---|
| एके मनीषिणः "कर्म दोषवत् त्याज्यम्" इति प्राहुः। अपरे च "यज्ञ-दान-तपः-कर्म न त्याज्यम्" इति॥ ३॥ | [Now] some learned people say that [all] कर्मन्-s are defective [and thus] to be renounced [i.e., कर्म-योग is not accepted, so सन्न्यास lifestyle alone is for those desiring मोक्ष]. But others think that यज्ञ, दान, and तपस् कर्मन् are not to be renounced [i.e., कर्म-योग is accepted]. (**3**) |
| तत्र त्यागे मे निश्चयं शृणु, भरत-सत्तम। पुरुष-व्याघ्र, त्यागः हि त्रि-विधः सम्प्रकीर्तितः॥ ४॥ | In regard to त्याग [i.e., कर्म-योग in the previous verse], listen to My conclusion, O अर्जुन. [Since the preceding two opinions are both right and wrong, more needs to be said.] O Fearless amongst Men, त्याग (renunciation) indeed is well said to be threefold. (**4**) |
| यज्ञ-दान-तपः-कर्म न त्याज्यं, तद् कार्यम् एव। यज्ञः दानं तपः च एव मनीषिणां पावनानि॥ ५॥ | यज्ञ, दान, and तपस् कर्मन् are not to be renounced [but], indeed, to be done. यज्ञ, दान, and तपस् are indeed purifying for discerning people. [For those who consider themselves doers, subject to injunction and needing purification, कर्म-योग is a means to मोक्ष.] (**5**) |

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥

---

| | |
|---|---|
| पार्थ, एतानि कर्माणि अपि तु सङ्गं फलानि च त्यक्त्वा कर्तव्यानि इति मे निश्चितम् उत्तमं मतम्॥६॥ | But, O अर्जुन, even these [three] कर्मन्-s are to be done having renounced attachment [to कर्मन्-s] and [their limited] फल [i.e., done without identification with them as "my actions" and with the attitude of कर्म-योग]. This is My decided and final vision. (**6**) |
| नियतस्य कर्मणः तु सन्न्यासः न उपपद्यते, मोहात् तस्य परित्यागः तामसः परिकीर्तितः॥७॥ | —Whereas सन्न्यास (renunciation) of enjoined कर्मन् [i.e., the lifestyle of सन्न्यास for one who is still deluded about the nature of oneself] is not proper [because] परित्याग (renunciation; i.e., simply nondoing) of that [कर्मन्] out of delusion is said to be predominately तमस्. (**7**) |
| यद् दुःखम् इति एव काय-क्लेश-भयात् कर्म त्यजेत्, सः राजसं त्यागं कृत्वा त्याग-फलं न एव लभेत्॥८॥ | If one were to renounce कर्मन् [i.e., take सन्न्यास] out of fear of affliction to the body [thinking it to be] painful—after doing [this] predominately रजस् renunciation—that one would indeed not gain [any] result of that renunciation. (**8**) |

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

| | |
|---|---|
| अर्जुन, यद् सङ्गं फलं च एव त्यक्त्वा नियतं कर्म "कार्यम्" इति एव क्रियते, सः त्यागः सात्त्विकः मतः ॥ ९ ॥ | O अर्जुन, if—renouncing both attachment [to it] and [its] result [i.e., as कर्म-योग]—enjoined कर्मन् is performed as simply what is to be done, [then] that त्याग (renunciation) is considered predominately सत्त्व. (**9**) |
| सत्त्व-समाविष्टः मेधावी छिन्न-संशयः त्यागी अ-कुशलं कर्म न द्वेष्टि, कुशले न अनुषज्जते ॥ १० ॥ | The renunciate [whether a कर्म-योगिन् like King जनक or a सन्न्यासिन्] who is endowed with clarity of mind, [thus] who has gained knowledge, and whose doubts have been resolved is not displeased at inauspicious action, nor attached to auspicious [action].(**10**) |
| देह-भृता हि (=यस्मात्) कर्माणि अशेषतः त्यक्तुं न शक्यम्, यः तु कर्म-फल-त्यागी, सः त्यागी इति अभिधीयते ॥ ११ ॥ | Because one who has [the judgment that one is] the body is not able to completely renounce [all] action, [then] that one—who indeed renounces [at least] the result of actions [i.e., a beginning कर्म-योगिन्]—is called a त्यागिन् (renunciate). (**11**) |

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥ १२ ॥

---

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥

---

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४ ॥

---

| | |
|---|---|
| अ-त्यागिनां प्रेत्य अन्-इष्टम् इष्टं मिश्रं च त्रि-विधं कर्मणः फलं भवति। सन्न्यासिनां तु क्व-चिद् न॥१२॥ | The one who has not [completely] renounced [कर्मन्], upon passing away, has the threefold results of action—undesirable [hell, etc.], desirable [heaven, etc.], and [their] mixture [i.e., directly regaining the human condition]. But never for the सन्न्यासिन् (the complete renunciate). (**12**) |
| महा-बाहो, साङ्ख्ये कृत-अन्ते प्रोक्तानि एतानि सर्व-कर्मणां सिद्धये पञ्च कारणानि मे निबोध॥१३॥ | O अर्जुन, pay heed to Me [about] these [following] five causes [i.e., factors] for the accomplishment of all actions, which [factors] have been well told in the teaching that brings an end to action [i.e., in वेदान्त—and summarized in the second chapter onward]. (**13**) |
| अधिष्ठानं, तथा कर्ता, पृथग्-विधं च करणं, विविधाः च पृथक् चेष्टाः, अत्र पञ्चमं दैवं च एव॥१४॥ | —The locus [i.e., physical body]; the agent [i.e., अहङ्कार/the doer and experiencer]; the various organs [of action and knowledge, including the mind]; the various kinds of motions [i.e., प्राण-s]; and, indeed, here, the fifth being [their] presiding deities. (**14**) |

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ १५ ॥

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाल्ँलोकान्न हन्ति न निबध्यते ॥ १७ ॥

---

| | |
|---|---|
| नरः शरीर-वाङ्-मनोभिः यद् न्याय्यं वा विपरीतं वा कर्म प्रारभते, तस्य एते पञ्च हेतवः॥१५॥ | Whatever action—proper [i.e., adaptive] or otherwise—a person undertakes with the body, speech, or mind [i.e., physical, verbal, or mental action], that [action] has these five [instrumental] factors. (**15**) |
| एवं तत्र सति अ-कृत-बुद्धित्वात् यः आत्मानं केवलं तु कर्तारं पश्यति, सः दुर्-मतिः न पश्यति॥१६॥ | When that is so [i.e., that these five alone cause action], the one who, because of an unprepared mind [i.e., hasn't accepted or earned this teaching], sees the I—although pure [of action]—as an agent, that distorted thinker does not see [i.e., this fundamental mistake distorts everything else]. (**16**) |
| यस्य अहङ्-कृतः भावः न [अस्ति], यस्य बुद्धिः न लिप्यते, सः इमान् लोकान् हत्वा अपि न हन्ति न निबध्यते॥१७॥ | One who has no notion that "I did [this]," whose mind is not affected [i.e., who has no guilt or hurt regarding action or inaction]—that one, though [having the duty of] killing these people, does not kill, nor is [that one] bound [by the act, just as a judge passing sentence has no guilt]. (**17**) |

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥ १८ ॥

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥ १९ ॥

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥ २० ॥

---

| | |
|---|---|
| ज्ञानं ज्ञेयं परिज्ञाता [इति] त्रि-विधा कर्म-चोदना। करणं कर्म कर्ता इति त्रि-विधः कर्म-सङ्ग्रहः॥१८॥ | The knowing [of objects; i.e., the thought], the object known, and the knower [together] are the threefold instigators of action. The instrument, the object [i.e., the desired result], and the doer [together] are the threefold constituents of [i.e., factors/ requirements for] action. (**18**) |
| गुण-सङ्ख्याने ज्ञानं कर्म च कर्ता च [इति] गुण-भेदतः त्रि-धा एव प्रोच्यते। तानि अपि यथावत् शृणु॥१९॥ | In the teaching of the गुण-s, ज्ञान, कर्मन् and कर्तृ are said to be threefold according to the differences [in predominance] of गुण-s. Listen accordingly about them. (**19**) |
| येन विभक्तेषु सर्व-भूतेषु एकम् अ-व्ययम् अ-विभक्तं भावम् ईक्षते, तद् ज्ञानं सात्त्विकं विद्धि॥२०॥ | By which one sees [i.e., knows] the one changeless, undivided existence (भाव) in all divided things—know that ज्ञान (knowledge) to be predominately सत्त्व [i.e., there is only one undivided existence, आत्मन्, not many; here भाव cannot mean प्रकृति, as प्रकृति is not changeless]. (**20**) |

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३ ॥

| | |
|---|---|
| यद् तु ज्ञानं सर्वेषु भूतेषु नाना-भावान् पृथग्-विधान् पृथक्त्वेन वेत्ति, तद् ज्ञानं राजसं विद्धि॥ २१॥ | —Whereas the knowledge [by] which one understands as separate [from each other] the many existences of different kinds, in all things—know that knowledge [i.e., all philosophies that hold that there are many आत्मन्-s, including the later-day साङ्ख्य philosophy] to be predominately रजस्. (**21**) |
| यद् तु एकस्मिन् कार्ये कृत्स्नवत् सक्तं, [यद्] अ-हैतुकम् अ-तत्त्व-अर्थवत् अल्पं च, तद् [ज्ञानं] तामसम् उदाहृतम्॥ २२॥ | But the [knowledge] [by] which one is committed to one single effect [in the universe]—as if it is everything—[which knowledge is] without reason, without truth, and limited [i.e., the unfortunate position of history- and faith-based cults and pop cultures]—that is said to be predominately तमस्. (**22**) |
| यद् नियतं कर्म सङ्ग-रहितम् अ-राग-द्वेषतः अ-फल-प्रेप्सुना कृतं, तद् सात्त्विकम् उच्यते॥ २३॥ | कर्मन् that is adaptive [i.e., in keeping with धर्म ], that is done without identification [i.e., "I did this"], [is] free of attraction or repulsion, [and done] by one without a requirement to obtain [its] result [i.e., done by one whose mind is predominately सत्त्व]—that [कर्मन्] is said to be predominately सत्त्व. (**23**) |

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥ २६ ॥

---

| | |
|---|---|
| काम-ईप्सुना तु स-अहङ्-कारेण वा पुनः बहुल-आयासं यद् कर्म क्रियते, तद् राजसम् उदाहृतम्॥ २४॥ | —Whereas कर्मन् that is done with a requirement to attain an object of desire or, again, with excessive pride is said to be predominately रजस् [i.e., it is not the action itself that is रजस्, but the mind that motivates the action that is predominately रजस्]. (**24**) |
| अनुबन्धं क्षयं हिंसां पौरुषं च अन्-अपेक्ष्य मोहात् यद् कर्म आरभ्यते, तद् तामसम् उच्यते॥ २५॥ | कर्मन् that is undertaken out of delusion—without regard to [its] consequence, loss [to oneself or others], injury [to oneself or others], or one's personal capacity—that is said to be predominately तमस् [i.e., the mind that motivates the action is predominately तमस्]. (**25**) |
| मुक्त-सङ्गः, अन्-अहं-वादी, धृति-उत्साह-समन्वितः, सिद्धि-अ-सिद्ध्योः निर्-विकारः [च] कर्ता सात्त्विकः उच्यते॥ २६॥ | The कर्तृ (doer—one with the notion of doership) [striving toward] being free from attachment [i.e., not requiring the result], not claiming "I [did this]," endowed with resolve and effort, and being without change in success or non-success—is said to be predominately सत्त्व. (**26**) |

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥

---

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

---

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥

---

| | |
|---|---|
| रागी, कर्म-फल-प्रेप्सुः, लुब्धः, हिंसा-आत्मकः, अ-शुचिः, हर्ष-शोक-अन्वितः [च] कर्ता राजसः परिकीर्तितः ॥ २७ ॥ | The कर्तृ who has attraction [toward things], who has a requirement to obtain the result of an action, [who] is miserly, whose nature is to hurt [another or oneself], [who] is unclean [physically/mentally] and subject to elation and sorrow—is said to be predominately रजस्. (**27**) |
| अ-युक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अ-लसः, विषादी, दीर्घ-सूत्री च कर्ता तामसः उच्यते ॥ २८ ॥ | The कर्तृ who is disturbed, immature, unable to bow [i.e., show respect physically or mentally], [who is] deceptive, abusive, lazy, depressed, and procrastinating [about addressing any of these and other problems]—is said to be predominately तमस्. (**28**) |
| बुद्धेः धृतेः च एव गुणतः त्रि-विधं भेदं पृथक्त्वेन अ-शेषेण प्रोच्यमानं शृणु, धनञ्-जय ॥ २९ ॥ | Listen to what is going to be told separately and completely about the threefold difference according to [predominance of] गुण-s of the mind and of resolve, O अर्जुन. (**29**) |

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥

| | |
|---|---|
| पार्थ, या प्रवृत्तिं च निवृत्तिं च, कार्य-अ-कार्ये, भय-अ-भये, बन्धं मोक्षं च वेत्ति, सा बुद्धि सात्त्विकी ॥ ३० ॥ | O अर्जुन, the mind that knows [the nature of] pursuit and renunciation, what is to be done and not to be done, what is dangerous and not dangerous, and what is bondage and complete freedom—that [mind] is predominately सत्त्व. (**30**) |
| पार्थ, यया धर्मम् अ-धर्मं च, कार्यं च अ-कार्यं च एव अ-यथावत् प्रजानाति, सा बुद्धिः राजसी ॥ ३१ ॥ | O अर्जुन, the mind with which one wrongly knows what is धर्म and अधर्म and [also wrongly], indeed, what is to be done and not to be done—that [mind] is predominately रजस्. (**31**) |
| पार्थ, या तमसा आवृता अ-धर्मं धर्मम् इति, सर्व-अर्थान् च विपरीतान् मन्यते, सा बुद्धिः तामसी ॥ ३२ ॥ | O अर्जुन, the mind which, covered with ignorance, considers अधर्म to be धर्म and all things as contrary [to what they are]—that [mind] is predominately तमस्. (**32**) |

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

---

| | |
|---|---|
| पार्थ, यया धृत्या अ-व्यभिचारिण्या योगेन मनः-प्राण-इन्द्रिय-क्रियाः धारयते, सा धृतिः सात्त्विकी ॥ ३३ ॥ | O अर्जुन, [the] unswerving resolve with which one sustains activities of the mind, the physiological functions, and the organs [of action and sensing]—through [unswerving] योग (a life of discipline)—that resolve is predominately सत्त्व. (**33**) |
| अर्जुन पार्थ, यया तु धृत्या फल-आकाङ्क्षी प्रसङ्गेन धर्म-काम-अर्थान् धारयते, सा धृतिः राजसी ॥ ३४ ॥ | —Whereas, O अर्जुन, Son of पृथा, [the] resolve with which one, being desirous of results, sustains [activities for] religious merit, pleasure, and security [but not for मोक्ष]—according to [every] opportunity—that resolve is predominately रजस्. (**34**) |
| पार्थ, यया दुर्-मेधाः स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति, सा धृतिः तामसी ॥ ३५ ॥ | O अर्जुन, the [resolve] by which one whose thinking is distorted does not give up sleep, fear, sorrow, depression, or intoxication—that resolve [to not change] is predominately तमस्. (**35**) |

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

---

विषयेन्द्रियसंयोगाद् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

---

| | |
|---|---|
| भरत-ऋषभ, इदानीं तु त्रि-विधं सुखं मे शृणु। यत्र अभ्यासात् रमते, दुःख-अन्तं च निगच्छति, यद् तद् अग्रे विषम् इव परिणामे अ-मृत-उपमम् [भवति], आत्म-बुद्धि-प्रसाद-जम्, तद् सुखं सात्त्विकं प्रोक्तम्॥ ३६–३७॥ | But now, O अर्जुन, listen to Me about the threefold happiness. That in which one discovers happiness by [daily] repetition [of listening and contemplating the teaching] and gains the end of sorrow, that which in the beginning is like poison [as one is for the first time inquiring into the source of the guilt and hurt that for lifetimes have driven one to seek small gratifications in objects] [but], upon a change [in clarity of mind], is like immortal nectar, born of clarity of self-knowledge—that happiness is said to be predominately सत्त्व. (**36–37**) |
| यद् तद् विषय-इन्द्रिय-संयोगात्, अग्रे अ-मृत-उपमं परिणामे विषम् इव [भवति], तद् सुखं राजसं स्मृतम्॥ ३८॥ | That which is [born] from the contact of the senses with [their] objects, which in the beginning seems like nectar [but], upon [any] change [in the object, the capacity to acquire, the senses, or the mind], becomes like poison—that happiness is said to be predominately रजस्. (**38**) |

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

---

| | |
|---|---|
| यद् च सुखं निद्रा-आलस्य-प्रमाद-उत्थम् अग्रे अनुबन्धे च आत्मनः मोहनं, तद् तामसम् उदाहृतम्॥ ३९॥ | Happiness [i.e., lack of pain or lack of trouble of effort] that arises from sleepiness, laziness, and carelessness, which in the beginning and in the end is self-deluding—that is said to be predominately तमस्. (**39**) |
| पृथिव्यां दिवि वा देवेषु वा पुनः तद् सत्त्वं न अस्ति, यद् एभिः प्रकृति-जैः त्रिभिः गुणैः मुक्तं स्यात्॥ ४०॥ | There is no existent thing on earth, in the sky, or even among the gods that can be free from these three गुण-s, born as प्रकृति (nature) [i.e., ब्रह्मन्/reality, the self, the eternal subject, the "I" of the Lord and of every being, is alone free of the गुण-s; all bodies and minds are not]. (**40**) |
| परन्-तप, ब्राह्मण-क्षत्रिय-विशां शूद्राणां च कर्माणि स्व-भाव-प्रभवैः गुणैः प्रविभक्तानि॥ ४१॥ | O अर्जुन, the कर्मन्-s of ब्राह्मण-s, क्षत्रिय-s, वैश्य-s, and of शूद्र-s are divided by the [predominance of] गुण-s arising from their nature. [In India these titles also arise from birth, as those who completely accept कर्मन् understand that one's birth matches one's nature and needs]. (**41**) |

| | | | | | |
|---|---|---|---|---|---|
| शमो | दमस्तपः | शौचं | क्षान्तिरार्जवमेव | च । | |
| ज्ञानं | विज्ञानमास्तिक्यं | ब्रह्मकर्म | स्वभावजम् ॥ | ४२ | ॥ |
| शौर्यं | तेजो | धृतिर्दाक्ष्यं | युद्धे | चाप्यपलायनम् । | |
| दानमीश्वरभावश्च | क्षात्रं | कर्म | स्वभावजम् ॥ | ४३ | ॥ |
| कृषिगौरक्ष्यवाणिज्यं | वैश्यकर्म | स्वभावजम् । | | | |
| परिचर्यात्मकं | कर्म | शूद्रस्यापि | स्वभावजम् ॥ | ४४ | ॥ |

| | |
|---|---|
| शमः दमः तपः शौचं क्षान्तिः आर्जवं ज्ञानं विज्ञानम् आस्तिक्यम् एव च स्व-भाव-जं ब्रह्म-कर्म ॥ ४२ ॥ | The कर्मन् [i.e., the disposition showing through the activity] of ब्राह्मण-s—that is born of their nature—is composure, restraint, prayerful discipline, cleanliness, accommodation, straightforwardness, knowledge [and its] assimilation, and acceptance of the veracity of वेद. (**42**) |
| शौर्यं, तेजः, धृतिः, दाक्ष्यं, युद्धे च अपि अ-पलायनं, दानम्, ईश्वर-भावः च स्व-भाव-जं क्षात्रं कर्म ॥ ४३ ॥ | The कर्मन् [i.e., the disposition showing through the activity] of क्षत्रिय-s—that is born of their nature—is valor, self-confidence, resolve, adroitness [i.e., ability to act without confusion in sudden situations], not turning away in a conflict, charity, and leadership. (**43**) |
| कृषि-गौरक्ष्य-वाणिज्यं स्व-भाव-जं वैश्य-कर्म। परिचर्या-आत्मकम् अपि स्व-भाव-जं शूद्रस्य कर्म ॥ ४४ ॥ | The कर्मन् [i.e., the activity, not the disposition] of वैश्य-s—that is born of their nature—is agriculture, maintaining animals, or commerce. The कर्मन् of शूद्र-s—that is born of their nature—is in the form of service [to others, which is essential in all societies]. (**44**) |

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥

| | |
|---|---|
| स्वे स्वे कर्मणि अभिरतः नरः संसिद्धिं लभते। यथा स्व-कर्म-निरतः सिद्धिं विन्दति, तद् शृणु॥ ४५॥ | A person dedicated in his or her own कर्मन् (duty) attains success [i.e., a satisfaction of having done happily what is to be done and not requiring a change to become happier]. In this way, one gains success, being dedicated to one's duty—to this, please listen. (**45**) |
| यतः भूतानां प्रवृत्तिः, येन इदं सर्वं ततं, तं स्व-कर्मणा अभ्यर्च्य, मानवः सिद्धिं विन्दति॥ ४६॥ | From which is the origin of [all] beings and by which all this is pervaded—[by] invoking [i.e., showing as a worship] that [Lord] with one's duty [i.e., by converting duty into a worship through an appreciation of the Lord as the doer, the action, and the result], a person attains success. (**46**) |
| वि-गुणः स्व-धर्मः स्वनुष्ठितात् पर-धर्मात् श्रेयान्। स्व-भाव-नियतं कर्म कुर्वन्, किल्बिषं न आप्नोति॥ ४७॥ | One's own duty—[even if] devoid of merit [i.e., even if it does not create पुण्य]—is better than a different duty [even if] well performed [because inner maturity, not social climbing, leads to श्रेयस्]. Doing duty enjoined according to one's disposition, one incurs no fault [e.g., conflict]. (**47**) |

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥ ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

---

| | |
|---|---|
| कौन्तेय, स-दोषम् अपि सह-जं कर्म न त्यजेत्, सर्व-आरम्भाः हि (=यस्मात्) दोषेण आवृताः धूमेन अग्निः इव॥ ४८॥ | O अर्जुन, one should not give up [one's] natural duty—even though defective [i.e., even though it consists of the three गुण-s and, hence, is part of संसार; *cf.* 18.3–4]—because all [other] undertakings are covered with [the same] fault, like [all ritual] fire [is enveloped] by [irritating] smoke. (**48**) |
| सर्वत्र अ-सक्त-बुद्धिः जित-आत्मा विगत-स्पृहः सन्न्यासेन परमां नैष्कर्म्य-सिद्धिम् अधिगच्छति॥ ४९॥ | One whose mind is not attached anywhere, [who] has mastery over the mind, and [is] free from yearning [all through कर्म-योग], [then]—by सन्न्यास (renunciation) [i.e., by knowledge of the self as actionless]—attains the exalted accomplishment that is actionlessness. (**49**) |
| कौन्तेय, यथा सिद्धिं प्राप्तः ब्रह्म आप्नोति, या ज्ञानस्य परा निष्ठा, तथा समासेन एव मे निबोध॥ ५०॥ | O अर्जुन, in the way one who has attained success [of कर्म-योग] attains ब्रह्मन्, which is the final conclusion of knowledge [i.e., unlike knowledge of everything else, which can have no final conclusion]—in that way, in brief, pay heed to Me. (**50**) |

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

---

विशुद्धया बुद्ध्या युक्तः, धृत्या आत्मानं नियम्य च, शब्द-आदीन् विषयान् त्यक्त्वा, राग-द्वेषौ व्युदस्य च, विविक्त-सेवी, लघु-आशी, यत-वाक्-काय-मानसः, नित्यं ध्यान-योग-परः, वैराग्यं समुपाश्रितः, अहङ्-कारं बलं दर्पं कामं क्रोधं परिग्रहं [च] विमुच्य, निर्-ममः, शान्तः — ब्रह्म-भूयाय कल्पते ॥ ५१–५३ ॥

[That one] endowed with a clear mind and, by resolve, gaining mastery over the body-mind complex [so it is not wasted chasing fancies]; giving up the [requiring of] sense objects beginning with sound, etc., and giving up [i.e., being free from the hold of] attraction and repulsion; having the disposition to repair to a quiet place; having the habit of eating lightly [to stay bright in this quiet lifestyle]; whose speech, body, and mind are mastered; [who is] always keeping contemplation and dedication [i.e., focuses only on oneself] as the ultimate; [who is] completely committed to objectivity; [who is] free from a notional "I," power, arrogance, desire, anger, and possession(s); [who is] free from the judgment "[this] is mine" and is clear—that one is fit for being ब्रह्मन् (reality) [i.e., for simply being oneself, without mistaken notions of reality]. (**51–53)**

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

---

| | |
|---|---|
| ब्रह्म-भूतः प्रसन्न-आत्मा न शोचति न काङ्क्षति, सर्वेषु भूतेषु समः परां मद्-भक्तिं लभते॥५४॥ | Attaining ब्रह्मन् [by the knowledge that the limitless ब्रह्मन् is—i.e., I am—all this, including oneself] [and thus] with a cheerful mind, one neither grieves nor requires [anything]. [Thus] being the same toward all beings, [one] attains the ultimate भक्ति (devotion) to Me. (**54**) |
| [तया] भक्त्या माम् अभिजानाति, यावान् तत्त्वतः च यः अस्मि। ततः मां तत्त्वतः ज्ञात्वा, तद्-अन्-अन्तरं विशते॥५५॥ | By [that] भक्ति, one knows Me—who I am in extent [as everything] and in reality [as the only thing, the only reality]. Therefore, knowing Me in reality, that one [as though] enters [Me] immediately after that [i.e., by knowledge alone one attains Me even while living]. (**55**) |
| सर्व-कर्माणि अपि सदा कुर्वाणः, मद्-व्यपाश्रयः — मत्-प्रसादात् शाश्वतम् अ-व्ययं पदम् अवाप्नोति॥५६॥ | The one who—though always performing all कर्मन्—has Me as the basis [of all actions and results] attains by [this] My grace [i.e., by the result (clarity of mind), which is given by the Lord as the teacher and as what is taught] the end, which is ever the same and imperishable. (**56**) |

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८ ॥

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

---

| | |
|---|---|
| चेतसा सर्व-कर्माणि मयि सन्न्यस्य, मत्-परः, बुद्धि-योगम् उपाश्रित्य स-ततं मच्-चित्तः भव॥५७॥ | By [this] mind renouncing all actions in Me, having Me as the ultimate, and taking to बुद्धि-योग (the means that is evenness of attitude), may you always be one whose mind is centered on Me [i.e., always appreciate Me as the basis of yourself, of action, and of its result]. (**57**) |
| मच्-चित्तः मत्-प्रसादात् सर्व-दुर्-गाणि तरिष्यसि। अथ चेद् त्वम् अहङ्-कारात् न श्रोष्यसि, विनङ्क्ष्यसि॥५८॥ | Being centered on Me, by My grace, you will cross over all difficulties [i.e., all the reasons for संसार]. Now if, out of an exaggerated self-opinion [that you know better], you do not listen [to Me], [then] you will perish [i.e., remain in संसार]. (**58**) |
| यद् अहङ्-कारम् आश्रित्य "न योत्स्ये" इति मन्यसे, एषः ते व्यवसायः मिथ्या। प्रकृतिः त्वां नियोक्ष्यति॥५९॥ | If, relying on your exaggerated self-opinion, you think "I will not fight," this resolution [of yours] [would be] मिथ्या (false or useless). [Because your] natural disposition [as a क्षत्रिय] will impel you [to act as a warrior at some later date]. (**59**) |

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

---

| | |
|---|---|
| कौन्तेय, मोहात् यद् कर्तुं न इच्छसि, तद् अ-वशः अपि स्व-भाव-जेन स्वेन कर्मणा निबद्धः करिष्यसि॥६०॥ | O अर्जुन, out of delusion [in this case, in the form of an impulsive decision and misplaced sympathy] what you don't wish to do, you will do [just] that—even despite [your] will—[as you are] bound by your कर्मन् [i.e., क्षात्रं कर्म] born of your own disposition. (**60**) |
| अर्जुन, ईश्वरः मायया यन्त्र-आरूढानि [इव] सर्व-भूतानि भ्रामयन्, सर्व-भूतानां हृद्-देशे तिष्ठति॥६१॥ | O अर्जुन, the Lord—causing all beings to spin around, [as if] mounted on a machine [as on a wheel revolving in संसार (now up, now down)] by माया (the Lord's power of projecting)—remains [unmoved, as the self of all] in the seat of the intellect of all beings. (**61**) |
| सर्व-भावेन तम् एव शरणं गच्छ, भारत। तत्-प्रसादात् परां शान्तिं शाश्वतं स्थानं प्राप्स्यसि॥६२॥ | With all [your] being, surrender to that [Lord] alone [who is the center of your being and is in the form of your natural disposition moving you through life], O अर्जुन. By that [Lord's] grace you will attain the ultimate peace, the timeless abode. (**62**) |

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

---

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

---

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

---

| | |
|---|---|
| इति मया गुह्यात् गुह्यतरं ज्ञानं ते आख्यातम्। एतद् अ-शेषेण विमृश्य, यथा इच्छसि तथा कुरु॥ ६३॥ | Thus I have told to you the knowledge that is more secret than a secret [being known only through the scripture that reveals it and, even when revealed, which remains unknown to the unprepared]. Think this over completely; [then] do as you wish. (**63**) |
| मे सर्व-गुह्यतमं परमं वचः भूयः शृणु। मे दृढम् इष्टः असि इति, ततः ते हितं वक्ष्यामि॥ ६४॥ | Listen once more to My paramount declaration, the most secret of all. You [as a friend, a devotee, and a student] are definitely beloved to Me, so I will tell you what is good [for you]. (**64**) |
| मन्-मनाः मद्-भक्तः मद्-याजी भव। मां नमस्-कुरु। माम् एव एष्यसि। सत्यं, [अहं] ते प्रतिजाने, मे प्रियः असि॥ ६५॥ | Become one whose mind is on Me, who is devoted to Me, and who is disposed to the worship of Me. Do salutation to Me. [Being not separate from Me] you will reach Me alone. Yes, I promise you, [as] you are dear to Me. (**65**) |

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

---

| | |
|---|---|
| सर्व-धर्मान् परित्यज्य, माम् एकं शरणं व्रज। अहं त्वा सर्व-पापेभ्यः मोक्षयिष्यामि। मा शुचः ॥ ६६ ॥ | Giving up all धर्म [and अधर्म] (adaptive and maladaptive action) [by giving up doership], surrender to Me alone [as there is nothing other than Me]. I will completely free you from all पाप-s [i.e., all forms of bondage, including pleasant and unpleasant कर्म-फल-s]. Do not grieve. (**66**) |
| इदं ते [प्रोक्तम्] अ-तपस्काय न कदा-चन वाच्यं, न अ-भक्ताय, न च अ-शुश्रूषवे, न च यः माम् अभ्यसूयति ॥ ६७ ॥ | This [which I have taught] to you is never to be taught to one who has no prayerful discipline, or to one who has no devotion [to the teacher or Me], or to one not willing to listen, or to one who is cynical toward Me [the Lord]. (**67**) |
| यः इमं परमं गुह्यं [संवादरूपं ग्रन्थं] मद्-भक्तेषु अभिधास्यति, मयि परां भक्तिं कृत्वा माम् एव एष्यति। अ-संशयः ॥ ६८ ॥ | The one who will teach this paramount secret [teaching] to My devotees, [thus] offering the highest devotion unto Me—that one will reach Me alone. There is no doubt. (**68**) |

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभाल्ँलोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥

| | |
|---|---|
| मनुष्येषु च तस्मात् न कश्-चिद् मे प्रिय-कृत्तमः, भुवि च तस्मात् न अन्यः मे प्रियतरः भविता॥ ६९॥ | Among people, there is no one dearer to Me than that [teacher], and there will not be another dearer to Me on earth than that [teacher]. (**69**) |
| यः च इमम् आवयोः धर्म्यं संवादम् अध्येष्यते, तेन ज्ञान-यज्ञेन अहम् इष्टः स्याम् इति मे मतिः॥ ७०॥ | And the one who studies [or even recites] this dialogue of ours, which is in keeping with धर्म—by that ritual, in the form of knowledge, I would be worshipped [i.e., without the Vedic forms of worship available today, this study itself suffices for worship]. This is My vision. (**70**) |
| यः अपि श्रद्धावान् अन्-असूयः च नरः शृणुयात्, सः अपि मुक्तः पुण्य-कर्मणां शुभान् लोकान् प्राप्नुयात्॥ ७१॥ | Even the person who—having trust [in Me, viewing Me as the Lord and not just as Mr. कृष्ण] and not being cynical—would listen [to this teaching], that one also is freed [from much पाप] and would attain the auspicious worlds of those who do beneficial actions. (**71**) |

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय ॥ ७२ ॥

---

अर्जुन उवाच।
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥

---

सञ्जय उवाच।
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

---

| | |
|---|---|
| पार्थ, कच्-चिद् त्वया एक-अग्रेण चेतसा एतद् श्रुतम्। कच्-चिद् ते अ-ज्ञान-सम्मोहः प्रनष्टः, धनञ्-जय॥ ७२॥ | O अर्जुन, have you heard this with a single-pointed mind? Has your delusion caused by ignorance been completely destroyed, O अर्जुन? (**72**) |
| अर्जुनः उवाच। नष्टः मोहः। मया त्वत्-प्रसादात् स्मृतिः लब्धा, अ-च्युत। स्थितः गत-सन्देहः अस्मि। तव वचनं करिष्ये॥ ७३॥ | अर्जुन said: Gone is the delusion. I have gained recognition [without error] [of myself] by Your grace [i.e., by Your teaching], O कृष्ण. I am firm and with doubts gone. I will do what You have said [i.e., लोक-सङ्ग्रह (rallying the people to धर्म) or कर्म-योग (to assimilate the teaching)]. (**73**) |
| सञ्जयः उवाच। इति अहं वासु-देवस्य महा-आत्मनः पार्थस्य च इमम् अद्भुतं रोम-हर्षणं संवादम् अश्रौषम्॥ ७४॥ | सञ्जय said: Thus I have heard this extraordinary, thrilling dialogue between the great-minded कृष्ण and अर्जुन. (**74**) |

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥ ७७ ॥

---

| | |
|---|---|
| अहं व्यास-प्रसादात् एतद् परं गुह्यम् [शास्त्रम्] योगं साक्षात् कथयतः स्वयं योग-ईश्वरात् कृष्णात् श्रुतवान्॥ ७५॥ | I have heard—by the grace of [special perception given by] व्यास—this paramount, secret [teaching] [that is] योग (ज्ञान-योग and कर्म-योग) from कृष्ण, the Lord of योग [as the first teacher and as its subject matter], Himself directly teaching [it]. (**75**) |
| राजन्, केशव-अर्जुनयोः इमम् अद्भुतं पुण्यं संवादं संस्मृत्य संस्मृत्य, मुहुः मुहुः हृष्यामि च॥ ७६॥ | O King [धृत-राष्ट्र], remembering over and over this extraordinary, auspicious dialogue between कृष्ण and अर्जुन, I rejoice again and again. (**76**) |
| राजन्, हरेः च तद् अत्यद्भुतं रूपं संस्मृत्य संस्मृत्य, मे विस्मयः महान्। पुनः पुनः च हृष्यामि॥ ७७॥ | And, O King, remembering over and over that very extraordinary [cosmic] form of Lord हरि (Lord कृष्ण), my amazement is great. Again and again I rejoice. (**77**) |

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसन्न्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥

| | |
|---|---|
| यत्र योग-ईश्वरः कृष्णः यत्र धनुर्-धरः पार्थः, तत्र श्रीः, विजयः, भूतिः, ध्रुवा नीतिः [इति] मम मतिः ॥ ७८ ॥ | Wherever is कृष्ण, the Lord of योग, and wherever is the bow-bearing अर्जुन [i.e., in whoever's heart is the devoted student prepared for action and also the Lord]—there, in my opinion, is श्री [wealth and knowledge], विजय (victory), prosperity, and certain justice. (**78**) |
| ओं तद् सत्। इति श्रीमद्-भगवद्-गीतासु उपनिषत्सु ब्रह्म-विद्यायां योग-शास्त्रे श्री-कृष्ण-अर्जुन-संवादे मोक्ष-सन्न्यास-योगः नाम अष्टा-दशः अध्यायः ॥ १८ ॥ | ओं (ब्रह्मन्, the witness of all) is that [only] reality. Thus ends the eighteenth chapter, called "The Topic of the Renunciation That Gives Complete Freedom," of the [eighteen chapters of] *Songs of the Glorious Lord*, which is [looked upon as] उपनिषद् [and whose teaching is] in [the form of] a dialogue between श्री कृष्ण and अर्जुन, [the subject matter being] knowledge of ब्रह्मन् and योग. |

# ओम् अथ प्रथमोऽध्यायः

धृतराष्ट्र उवाच।

धर्मक्षेत्रे कुरुक्षेत्रे युयुत्सवः समवेता मामकाः पाण्डवाश्चैव किमकुर्वत, सञ्जय॥१॥

सञ्जय उवाच।

तदा तु राजा दुर्योधनः पाण्डवानीकं व्यूढं दृष्ट्वाचार्यं [द्रोणम्] उपसङ्गम्य वचनमब्रवीत्॥२॥ आचार्य, तव धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणामेतां महतीं चमूं पश्य॥३॥ चेकितानः, वीर्यवान्काशिराजश्च, पुरुजित्, कुन्तिभोजश्च, नरपुङ्गवः शैब्यश्च, विक्रान्तो युधामन्युश्च, वीर्यवानुत्तमौजाश्च, सौभद्रः, द्रौपदेयाश्च — सर्व एव महारथाः [सन्ति]॥४–६॥ द्विजोत्तम, ये तु मम सैन्यस्य नायका अस्माकं विशिष्टाः [सन्ति] तान्निबोध। तान्ते (=तव) सञ्ज्ञार्थं ब्रवीमि॥७॥ भवान्, भीष्मश्च, कर्णश्च, समितिञ्जयः कृपश्च, अश्वत्थामा, विकर्णश्च, तथैव च सौमदत्तिः [सन्ति]॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः, सर्वे नानाशस्त्रप्रहरणा युद्धविशारदाः [सन्ति]॥९॥ अस्माकं तद्भीष्माभिरक्षितं बलमपर्याप्तम्, एतेषां त्विदं भीमाभिरक्षितं बलं पर्याप्तम्॥१०॥ सर्वेषु चायनेषु यथाभागमवस्थिताः सर्व एव हि भवन्तो भीष्ममेवाभिरक्षन्तु॥११॥

प्रतापवान्कुरुवृद्धः पितामहस्तस्य हर्षं सञ्जनयन्नुच्चैः सिंहनादं विनद्य शङ्खं दध्मौ॥१२॥ ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यन्त। स शब्दस्तुमुलोऽभवत्॥१३॥ ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः॥१४॥ हृषीकेशः पाञ्चजन्यं [दध्मौ], धनञ्जयो देवदत्तं [दध्मौ], भीमकर्मा वृकोदरो महाशङ्खं पौण्ड्रं दध्मौ॥१५॥ कुन्तीपतुत्रो राजा युधिष्ठिरोऽनन्तविजयं [दध्मौ], नकुलः सहदेवश्च सुघोषमणिपुष्पकौ [दध्मतुः]॥१६॥ परमेष्वासः काश्यश्च, महारथः शिखण्डी च, धृष्टद्युम्नः, विराटश्च, अपराजितः सात्यकिश्च, द्रुपदः, द्रौपदेयाश्च, महाबाहुः सौभद्रश्च — पृथिवीपते, सर्वशः पृथक्पृथक्शङ्खान्दध्मुः ॥१७–१८॥ नभश्च पृथिवीं चैव व्यनुनादयन्स तुमुलो घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्॥१९॥

महीपते, अथ शस्त्रसम्पाते प्रवृत्ते धार्तराष्ट्रान्व्यवस्थितान्दृष्ट्वा कपिध्वजः पाण्डवो धनुरुद्यम्य, तदा हृषीकेशमिदं वाक्यमाह।

अर्जुन उवाच।

अच्युत, मे रथमुभयोः सेनयोर्मध्ये स्थापय, यावदहमेतानवस्थितान्योद्धुकामान्निरीक्षे, मया कैः सहास्मिन्रणसमुद्यमे योद्धव्यम्॥२०–२२॥ य एते युद्धे दुर्बुद्धेर्धार्तराष्ट्रस्य प्रियचिकीर्षवोऽत्र समागताः, [तान्] योत्स्यमानान् [यावद्] अहमवेक्षे॥२३॥

सञ्जय उवाच।

भारत, गुडाकेशेनैवमुक्तो हृषीकेश उभयोः सेनयोर्मध्ये भीष्मद्रोणप्रमुखतः सर्वेषां महीक्षिताम् [प्रमुखतः] च रथोत्तमं स्थापयित्वा — "पार्थ, एतान्समवेतान्कुरून्पश्य" इत्युवाच॥२४–२५॥

अथ पार्थस्तत्रोभयोः सेनयोरपि स्थितान्पितॄन्पितामहानाचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखीञ्श्वशुरान्सुहृदस्तथैव चापश्यत्। स कौन्तेयः, तान्सर्वानवस्थितान्बन्धून्समीक्ष्य, परया कृपयाविष्टः, विषीदन्निदमब्रवीत्॥२६–२७,२८॥

अर्जुन उवाच।

कृष्ण, इमं स्वजनं युयुत्सुं समुपस्थितं दृष्ट्वा, मम गात्राणि सीदन्ति, मुखं च परिशुष्यति, मे शरीरे वेपथुश्च, रोमहर्षश्च जायते॥२८,२९॥ गाण्डीवं हस्तात्स्रंसते, त्वक्चैव परिदह्यते। मे मनश्च भ्रमतीव, अवस्थातुं च न शक्नोमि॥३०॥ केशव, विपरीतानि च निमित्तानि पश्यामि, आहवे च स्वजनं हत्वा श्रेयो नानुपश्यामि॥३१॥ कृष्ण, विजयं न काङ्क्षे, न राज्यं च सुखानि च। गोविन्द, किं नो राज्येन, किं भोगैर्जीवितेन वा॥३२॥ येषामर्थे नो राज्यं भोगाः सुखानि च काङ्क्षितं, त इमे प्राणान्धनानि च त्यक्त्वा युद्धेऽवस्थिताः — आचार्याः, पितरः, पुत्राः, तथैव च पितामहाः, मातुलाः, श्वशुराः, पौत्राः, श्यालाः, तथा सम्बन्धिनः॥३३–३४॥ मधुसूदन, एतान्घ्नतोऽपि त्रैलोक्यराज्यस्य हेतोरपि हन्तुं नेच्छामि, किं नु महीकृते॥३५॥ धार्तराष्ट्रान्निहत्य नः का प्रीतिः स्यात्, जनार्दन। एतानाततायिनो हत्वा पापमेवास्मानाश्रयेत्॥३६॥ तस्माद्वयं स्वबान्धवान्धार्तराष्ट्रान्हन्तुं नार्हाः। स्वजनं हि हत्वा कथं [वयं] सुखिनः स्याम, माधव॥३७॥

यद्यप्येते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति, कुलक्षयकृतं दोषमस्माभिः प्रपश्यद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयम्, जनार्दन॥३८–३९॥ कुलक्षये सनातनाः कुलधर्माः प्रणश्यन्ति, धर्मे नष्टेऽधर्मः कृत्स्नं कुलमभिभवत्युत॥४०॥ कृष्ण, अधर्माभिभवात्कुलस्त्रियः प्रदुष्यन्ति। वार्ष्णेय, स्त्रीषु दुष्टासु वर्णसङ्करो

जायते।।४१।। सङ्करः कुलघ्नानां कुलस्य च नरकायैव [गमयति]। एषां पितरो हि लुप्तपिण्डोदकक्रियाः पतन्ति।।४२।। कुलघ्नानामेतैर्वर्णसङ्करकारकैर्दोषैः शाश्वता जातिधर्माः कुलधर्माश्चोत्साद्यन्ते।।४३।। जनार्दन, उत्सन्नकुलधर्माणां मनुष्याणां नियतं नरके वासो भवतीत्यनुशुश्रुम।।४४।।

अहो बत, यद्राज्यसुखलोभेन स्वजनं हन्तुमुद्यताः, वयं महत्पापं कर्तुं व्यवसिताः।।४५।। यदि शस्त्रपाणयो धार्तराष्ट्रा मामप्रतीकारमशस्त्रं रणे हन्युः, तन्मे क्षेमतरं भवेत्।।४६।।

सञ्जय उवाच।

अर्जुन एवमुक्त्वा सङ्ख्ये सशरं चापं विसृज्य शोकसंविग्नमानसो रथोपस्थ उपाविशत्।।४७।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्यायः।।१।।

# ओम् अथ द्वितीयोऽध्यायः

सञ्जय उवाच।

मधुसूदनस्तम् [अर्जुनं] तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तम् [च] इदं वाक्यमुवाच।।१।।

श्रीभगवानुवाच।

विषम इदमनार्यजुष्टमस्वर्ग्यमकीर्तिकरं [च] कश्मलं कुतस्त्वा समुपस्थितम्, अर्जुन।।२।। क्लैब्यं मा स्म गमः, पार्थ। एतत्त्वयि नोपपद्यते। क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ, परन्तप।।३।।

अर्जुन उवाच।

मधुसूदनारिसूदन, कथमहं सङ्ख्ये पूजार्हौ भीष्मं द्रोणं च [उभौ] इषुभिः प्रतियोत्स्यामि।।४।। महानुभावान्गुरूनहत्वा हीह लोके भैक्ष्यमपि भोक्तुं श्रेयः [स्यात्], अर्थकामांस्तु गुरून्हत्वेहैव रुधिरप्रदिग्धान्भोगान्भुञ्जीय।।५।। कतरन्नो गरीय एतन्न विद्मः — यद्वा जयेम यदि वा नो जयेयुः। यानेव हत्वा न जिजीविषामः, ते धार्तराष्ट्राः प्रमुखेऽवस्थिताः।।६।। [अहं] कार्पण्यदोषोपहतस्वभावो धर्मसम्मूढचेताः [च] त्वां पृच्छामि — यन्निश्चितं श्रेयः स्यात्, तन्मे ब्रूहि। अहं ते शिष्यः। त्वां

प्रपन्नं, मां शाधि॥७॥ भूमौ हि (=यस्मात्) असपत्नमृद्धं राज्यं, सुराणामपि चाधिपत्यमवाप्य, यन्ममेन्द्रियाणामुच्छोषणं शोकमपनुद्यात्, [तद्] न प्रपश्यामि॥८॥

सञ्जय उवाच।

हृषीकेशमेवमुक्त्वा, परन्तपो गुडाकेशो गोविन्दं "न योत्स्ये" इत्युक्त्वा, तूष्णीं बभूव ह॥९॥ भारत, हृषीकेशः प्रहसन्निव तमुभयोः सेनयोर्मध्ये विषीदन्तमिदं वच उवाच॥१०॥

श्रीभगवानुवाच।

त्वमशोच्यानन्वशोचः, प्रज्ञावादांश्च भाषसे। पण्डिता गतासूनगतासूंश्च नानुशोचन्ति॥११॥ न त्वेव जात्वहं नासं, न त्वं, नेमे जनाधिपाः। न चैव सर्वे वयमतः परं न भविष्यामः॥१२॥ देहिनः, यथास्मिन्देहे कौमारं यौवनं जरा [च], तथा देहान्तरप्राप्तिः। तत्र धीरो न मुह्यति॥१३॥ कौन्तेय, मात्रास्पर्शाः (=इन्द्रियस्पर्शा मात्रस्पर्शविषया वा) तु शीतोष्णसुखदुःखदा आगमापायिनोऽनित्याः। तांस्तितिक्षस्व, भारत॥१४॥ पुरुषर्षभ, यं हि पुरुषमेते [स्पर्शा विषया वा] न व्यथयन्ति, समदुःखसुखं धीरं [च], सोऽमृतत्वाय कल्पते॥१५॥

असतः (=सतोऽन्यस्य) भावो न विद्यते, सतोऽभावो न विद्यते। तत्त्वदर्शिभिरुभयोरप्यनयोरन्तस्तु दृष्टः॥१६॥ येन त्विदं सर्वं ततं, तद् [सत्] अविनाशि विद्धि। न कश्चिदस्याव्ययस्य विनाशं कर्तुमर्हति॥१७॥ नित्यस्य (=अकालस्य) अनाशिनोऽप्रमेयस्य (=मनोविषयत्वमयोग्यस्य) शरीरिण इमे देहा अन्तवन्त उक्ताः। तस्माद्युध्यस्व, भारत॥१८॥ य एनं [देहिनम्/सत्] हन्तारं वेत्ति, यश्चैनं हतं मन्यते, उभौ तौ न विजानीतः। अयं न हन्ति, न हन्यते॥१९॥ अयं न कदाचिज्जायते, म्रियते वा। न [अस्ति] — भूत्वा भूयोऽभविता, न वा [—अभूत्वा भूयर्भविता इत्यर्थः]। अयमजो नित्यः शाश्वतः पुराणः शरीरे हन्यमाने न हन्यते॥२०॥ पार्थ, य एनम् [देहिनम्/सत्] अविनाशिनं नित्यमजमव्ययं [च] वेद, कथं स पुरुषः कं घातयति, कं [च] हन्ति॥२१॥ यथा नरो जीर्णानि वासांसि विहायापराणि नवानि गृह्णाति, तथा देही जीर्णानि शरीराणि विहायान्यानि नवानि संयाति॥२२॥ [भूमिमयानि] शस्त्राण्येनं न च्छिन्दन्ति, पावक एनं न दहति, आप एनं न क्लेदयन्ति, मारुतो न च शोषयति॥२३॥ अयमच्छेद्यः, अयमदाह्यः, अक्लेद्योऽशोष्य एव च। अयं नित्यः सर्वगतः (=अदेशः) स्थाणुरचलः सनातनः [च]॥२४॥ अयमव्यक्तः, अयमचिन्त्यः (=मनोविषयत्वमयोग्यः), अयमविकार्य उच्यते। तस्मादेवमेनं विदित्वानुशोचितुं नार्हसि॥२५॥

महाबाहो, अथ चैनं नित्यजातं नित्यं मृतं वा मन्यसे, तथाप्येवं त्वं शोचितुं नार्हसि॥२६॥ जातस्य हि (=यस्मात्) मृत्युर्ध्रुवः, मृतस्य च जन्म ध्रुवं, तस्मादपरिहार्येऽर्थे त्वं शोचितुं नार्हसि॥२७॥ भारत, भूतान्यव्यक्तादीनि व्यक्तमध्यान्यव्यक्तनिधनान्येव [च]। तत्र का परिदेवना॥२८॥

कश्चिदेनम् [देहिनम्/सत्] आश्चर्यवत्पश्यति। तथैव चान्य आश्चर्यवद्वदति, अन्यश्चैनमाश्चर्यवच्छृणोति। कश्चिच्च श्रुत्वाप्येनं नैव वेद॥२९॥ भारत, सर्वस्य देहेऽयं देही नित्यमवध्यः, तस्मात्त्वं सर्वाणि भूतानि शोचितुं नार्हसि॥३०॥

स्वधर्ममपि चावेक्ष्य विकम्पितुं नार्हसि, क्षत्रियस्य हि (=यस्मात्) धर्म्याद्युद्धादन्यच्छ्रेयो न विद्यते॥३१॥ यदृच्छया चापावृतं स्वर्गद्वारमुपपन्नम्। पार्थ, सुखिनः क्षत्रिया ईदृशं युद्धं लभन्ते॥३२॥ अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि, ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥३३॥ भूतानि चापि ते (=तव) अव्ययामकीर्तिं कथयिष्यन्ति। सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते॥३४॥ महारथास्त्वां भयाद्रणादुपरतं मंस्यन्ते। येषां च बहुमतो भूत्वा त्वं लाघवं यास्यसि॥३५॥ तव चाहितास्तव सामर्थ्यं निन्दन्तो बहूनवाच्यवादान्वदिष्यन्ति। किं नु ततो दुःखतरम्॥३६॥ हतो वा स्वर्गं प्राप्स्यसि, जित्वा वा महीं भोक्ष्यसे। कौन्तेय, तस्माद्युद्धाय कृतनिश्चय उत्तिष्ठ॥३७॥ सुखदुःखे लाभालाभौ जयाजयौ [च] समे कृत्वा, ततो युद्धाय युज्यस्व। एवं पापं नावाप्स्यसि॥३८॥

साङ्ख्ये (=परमार्थवस्तुविवेकविषये श्रेयोविषये) एषा बुद्धिस्ते (=तुभ्यम्) अभिहिता। पार्थ, योगे त्विमां [बुद्धिं] श्रुणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि॥३९॥ इह [कर्मयोगे श्रेयोमार्गे] अभिक्रमनाशो नास्ति, प्रत्यवायो न विद्यते। अस्य [कर्मयोगस्य] धर्मस्य स्वल्पमपि महतो भयात्त्रायते॥४०॥

इह व्यवसायात्मिका बुद्धिरेका, कुरुनन्दन। अव्यवसायिनां [श्रेयोमार्गे] बुद्धयो बहुशाखा ह्यनन्ताश्च॥४१॥ पार्थ, अविपश्चितो वेदवादरताः "न अन्यदस्ति" इति वादिनः कामात्मानः स्वर्गपरा यामिमां भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां जन्मकर्मफलप्रदां पुष्पितां वाचं प्रवदन्ति॥४२–४३॥ तया [पुष्पितया वाचा] अपहृतचेतसां भोगैश्वर्यप्रसक्तानां व्यवसायात्मिका बुद्धिः समाधौ (=अन्तःकरणे) न विधीयते॥४४॥ वेदास्त्रैगुण्यविषयाः। अर्जुन, निस्त्रैगुण्यो निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्भव॥४५॥ यावान्सर्वतः सम्प्लुतोदक उदपानेऽर्थः (=प्रयोजनं), तावान् [सर्वगतं सद्वस्तु] विजानतो ब्राह्मणस्य सर्वेषु वेदेषु [अर्थः]॥४६॥

कर्मण्येव ते (=तव) अधिकारः (=प्रभुत्वम्), फलेषु मा कदाचन। कर्मफलहेतुर्मा भूः [मा मन्यस्व इत्यर्थः]। अकर्मणि ते (=तव) सङ्गो मास्तु॥४७॥ धनञ्जय, [कर्मफले] सङ्गं त्यक्त्वा, सिद्ध्यसिद्ध्योः समो भूत्वा, [एवं] योगस्थः [सन्],

कर्माणि कुरु। [कर्मफले बुद्धेः] समत्वं योग उच्यते॥४८॥ कर्म बुद्धियोगाद्दूरेण ह्यवरं, धनञ्जय। बुद्धौ शरणमन्विच्छ। कृपणाः फलहेतवः॥४९॥ बुद्धियुक्त इहोभे सुकृतदुष्कृते जहाति। तस्माद्योगाय युज्यस्व। कर्मसु कौशलं (=यथार्थता) योगः॥५०॥ बुद्धियुक्ता हि (=यस्मात्) मनीषिणः कर्मजं फलं त्यक्त्वा, जन्मबन्धविनिर्मुक्ताः [सन्तः], अनामयं पदं गच्छन्ति॥५१॥ यदा ते बुद्धिर्मोहकलिलं व्यतितरिष्यति, तदा श्रुतस्य श्रोतव्यस्य च निर्वेदं गन्तासि॥५२॥ यदा श्रुतिविप्रतिपन्ना ते बुद्धिर्निश्चला स्थास्यति, समाधौ (=आत्मनि) अचला, तदा योगमवाप्स्यसि॥५३॥

अर्जुन उवाच।

स्थितप्रज्ञस्य समाधिस्थस्य का भाषा, केशव। स्थितधीः किं प्रभाषेत। किमासीत। किं व्रजेत॥५४॥

श्रीभगवानुवाच।

पार्थ, यदा सर्वान्कामान्मनोगतान्प्रजहाति, आत्मन्येवात्मना (=बुद्ध्या) तुष्टः, तदा [सः] स्थितप्रज्ञ उच्यते॥५५॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहो वीतरागभयक्रोधो मुनिः स्थितधीरुच्यते॥५६॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं प्राप्य नाभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता॥५७॥ यदा चायं, कूर्मोऽङ्गानीव, इन्द्रियार्थेभ्य इन्द्रियाणि सर्वशः संहरते [संहर्तुमर्हति इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता॥५८॥ निराहारस्य देहिनो विषया रसवर्जं विनिवर्तन्ते। परं (=ब्रह्मन्) दृष्ट्वास्य रसोऽपि निवर्तते॥५९॥ कौन्तेय, विपश्चितो हि (=यस्मात्) पुरुषस्य यततोऽपि, प्रमाथीनीन्द्रियाणि मनः प्रसभं हरन्ति॥६०॥ [यतस्तस्मात्] तानि सर्वाणि [इन्द्रियाणि] संयम्य युक्तो मत्पर आसीत। यस्य हीन्द्रियाणि [संस्कृतबुद्धेः] वशे, तस्य प्रज्ञा प्रतिष्ठिता॥६१॥ विषयान्ध्यायतः पुंसस्तेषु सङ्ग उपजायते, सङ्गात्कामः सञ्जायते, कामात्क्रोधोऽभिजायते, क्रोधात्सम्मोहो भवति, सम्मोहात्स्मृतिविभ्रमः [भवति], स्मृतिभ्रंशाद्बुद्धिनाशः [भवति], बुद्धिनाशात् [पुमान्] प्रणश्यति॥६२–६३॥ रागद्वेषवियुक्तैस्त्वात्मवश्यैरिन्द्रियैर्विषयांश्चरन्, विधेयात्मा (=वश्यान्तःकरणः) प्रसादम् (=शान्तिम्) अधिगच्छति॥६४॥ प्रसादे [सति] अस्य सर्वदुःखानां हानिरुपजायते, प्रसन्नचेतसो हि (=यस्मात्) बुद्धिराशु पर्यवतिष्ठते॥६५॥ अयुक्तस्य बुद्धिर्नास्ति, न चायुक्तस्य भावना (=धारणम्)। न चाभावयतः शान्तिः। अशान्तस्य कुतः सुखम्॥६६॥ यन्मनो हि (=यस्मात्) चरतामिन्द्रियाणामनुविधीयते, तद् [मनः] अस्य प्रज्ञां हरति, वायुरम्भसि नावमिव [हरति]॥६७॥ महाबाहो, तस्माद्यस्येन्द्रियाणीन्द्रियार्थेभ्यः सर्वशो निगृहीतानि [निगृहीतुमर्हन्ति इत्यर्थः], तस्य प्रज्ञा प्रतिष्ठिता॥६८॥

या सर्वभूतानां निशा [इव], तस्यां संयमी [मुनिः] जागर्ति। यस्यां भूतानि जाग्रति, सा [सद्वस्तु] पश्यतो मुनेर्निशा [इव]।।६९।। यद्वदाप आपूर्यमाणं [स्वरूपतः] अचलप्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत्सर्वे कामा यं प्रविशन्ति — स शान्तिमाप्नोति, न कामकामी।।७०।। सर्वान्कामान्विहाय, यः पुमान्निःस्पृहो निर्ममो निरहङ्कारश्चरति, स शान्तिमधिगच्छति।।७१।। एषा ब्राह्मी (=ब्रह्मण्यधिष्ठिता) स्थितिः, पार्थ। प्राप्य एनां, न विमुह्यति। अन्तकालेऽप्यस्यां स्थित्वा ब्रह्मनिर्वाणमृच्छति।।७२।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः।।२।।

# अथ तृतीयोऽध्यायः

अर्जुन उवाच।

जनार्दन, कर्मणश्चेज्ज्यायसी बुद्धिस्ते (=तव) मता, तत्किं घोरे कर्मणि मां नियोजयसि, केशव।।१।। व्यामिश्रेणेव वाक्येन मे बुद्धिं मोहयसीव। तदेकं निश्चित्य वद, येनाहं श्रेय आप्नुयाम्।।२।।

श्रीभगवानुवाच।

अनघ, अस्मिँल्लोके पुरा मया द्विविधा निष्ठा प्रोक्ता, ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्।।३।। पुरुषः कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते, सन्न्यसनादेव च सिद्धिं न समधिगच्छति।।४।। न हि (=यस्मात्) कश्चित्क्षणमपि जात्वकर्मकृत्तिष्ठति। सर्वो हि (=यस्मात्) अवशः प्रकृतिजैर्गुणैः कर्म कार्यते।।५।। यः कर्मेन्द्रियाणि संयम्य मनसेन्द्रियार्थान्स्मरनास्ते, स विमूढात्मा मिथ्याचार उच्यते।।६।। अर्जुन, यस्त्विन्द्रियाणि मनसा नियम्यासक्तः कर्मेन्द्रियैः कर्मयोगमारभते, स विशिष्यते।।७।।

त्वं नियतं कर्म कुरु, कर्म ह्यकर्मणो ज्यायः, अकर्मणश्च ते शरीरयात्रापि न प्रसिद्ध्येत्।।८।।

यज्ञार्थात्कर्मणोऽन्यत्रायं लोकः कर्मबन्धनः। कौन्तेय, मुक्तसङ्गस्तदर्थं कर्म समाचर।।९।। पुरा प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वोवाच — अनेन प्रसविष्यध्वम्, एष व इष्टकामधुकस्तु।।१०।। देवाननेन भावयत, ते देवा वो भावयन्तु, परस्परं भावयन्तः परं श्रेयोऽवाप्स्यथ।।११।। यज्ञभाविता देवा व इष्टान्भोगान्हि दास्यन्ते। यस्तैर्दत्तानेभ्योऽप्रदाय भुङ्क्ते, स स्तेन

एव॥१२॥ यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैर्मुच्यन्ते। ये त्वात्मकारणात्पचन्ति, ते पापा अघं भुञ्जते॥१३॥ अन्नाद्भूतानि भवन्ति। पर्जन्यादन्नसम्भवः। यज्ञात्पर्जन्यो भवति। कर्मसमुद्भवो यज्ञः॥१४॥ कर्म ब्रह्मोद्भवं विद्धि, ब्रह्म (=वेदशास्त्रम्) अक्षरसमुद्भवं [विद्धि]। तस्मात्सर्वगतं ब्रह्म, नित्यं यज्ञे प्रतिष्ठितम्॥१५॥ पार्थ, य एवं प्रवर्तितं चक्रमिह नानुवर्तयति, अघायुरिन्द्रियारामः [च], स मोघं जीवति॥१६॥ यस्तु मानव आत्मरतिरेव, आत्मतृप्तश्च, आत्मन्येव च सन्तुष्टः स्यात्, तस्य कार्यं न विद्यते॥१७॥ तस्येह नैव कश्चनार्थः कृतेन, नाकृतेन [वा]। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥१८॥ तस्मादसक्तः कार्यं कर्म सततं समाचर, असक्तो हि (=यस्मात्) पूरुषः कर्माचरन्परमाप्नोति॥१९॥

कर्मणा [सह] एव हि जनकादयः संसिद्धिमास्थिताः। लोकसङ्ग्रहमेव सम्पश्यन्नपि कर्तुमर्हसि॥२०॥ यद्यच्छ्रेष्ठ आचरति तत्तदेवेतरो जनः [आचरति]। यत्प्रमाणं स कुरुते, तल्लँोकोऽनुवर्तते॥२१॥ पार्थ, मे त्रिषु लोकेषु न किञ्चन कर्तव्यमस्ति, न [किञ्चन] अवाप्तव्यमनवाप्तम्, कर्मण्येव च वर्ते॥२२॥ पार्थ, यदि ह्यहमतन्द्रितः कर्मणि जातु न वर्तेयं, मनुष्या मम वर्त्म सर्वशोऽनुवर्तन्ते॥२३॥ अहं चेत्कर्म न कुर्यामिमे लोका उत्सीदेयुः। सङ्करस्य कर्ता स्याम्, इमाः प्रजाश्चोपहन्याम्॥२४॥ भारत, कर्मणि सक्ता अविद्वांसो यथा कुर्वन्ति, लोकसङ्ग्रहं चिकीर्षुरसक्तो विद्वांस्तथा कुर्यात्॥२५॥ अज्ञानां कर्मसङ्गिनां बुद्धिभेदं न जनयेत्, विद्वान्युक्तः सर्वकर्माणि समाचरन् [तानविदुषः] जोषयेत्॥२६॥

प्रकृतेर्गुणैः कर्माणि सर्वशः क्रियमाणानि। अहङ्कारविमूढात्मा "अहं कर्ता" इति मन्यते॥२७॥ महाबाहो, गुणकर्मविभागयोस्तत्त्ववित्तु "गुणा गुणेषु वर्तन्ते" इति मत्वा न सज्जते॥२८॥ प्रकृतेर्गुणसम्मूढा गुणकर्मसु सज्जन्ते। तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत्॥२९॥ अध्यात्मचेतसा सर्वाणि कर्माणि मयि सन्न्यस्य निराशीर्निर्ममो भूत्वा विगतज्वरो युध्यस्व॥३०॥ ये मानवाः श्रद्धावन्तोऽनसूयन्तो म इदं मतं नित्यमनुतिष्ठन्ति, तेऽपि कर्मभिर्मुच्यन्ते॥३१॥ ये त्वभ्यसूयन्तः, म एतन्मतं नानुतिष्ठन्ति, तान्सर्वज्ञानविमूढानचेतसः [च] नष्टान्विद्धि॥३२॥

ज्ञानवानपि स्वस्याः प्रकृतेः सदृशं चेष्टते। भूतानि प्रकृतिं यान्ति — निग्रहः किं करिष्यति॥३३॥ इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ, तयोर्वशं नागच्छेत्, तौ हि (=यस्मात्) अस्य परिपन्थिनौ॥३४॥ स्वनुष्ठितात्परधर्मात्स्वधर्मो विगुणः [अपि] श्रेयान्। स्वधर्मे निधनं श्रेयः, [यस्मात्] भयावहः परधर्मः॥३५॥

अर्जुन उवाच।

वार्ष्णेय, अथ केन प्रयुक्तोऽयं पूरुषोऽनिच्छन्नपि पापं चरति, बलादिव नियोजितः॥३६॥

श्रीभवानुवाच।

एष काम एष क्रोधः [च]। [एषः] रजोगुणसमुद्भवो महाशनो महापाप्मा। इहैनं वैरिणं विद्धि॥३७॥ यथा धूमेन वह्निराव्रियते, यथा मलेनादर्शः [आव्रियते], यथा चोल्बेन गर्भ आवृतः, तथा तेनेदम् [ज्ञानम्] आवृतम्॥३८॥ कौन्तेय, एतेन नित्यवैरिणा कामरूपेण दुष्पूरेणानलेन च ज्ञानिनो ज्ञानमावृतम्॥३९॥ अस्याधिष्ठानमिन्द्रियाणि मनो बुद्धिः [च] उच्यते। एषः [कामः] एतैर्ज्ञानमावृत्य देहिनं विमोहयति॥४०॥ भरतर्षभ, तस्मात्त्वमादाविन्द्रियाणि नियम्य, प्रजहि ह्येनं पाप्मानं ज्ञानविज्ञाननाशनम्॥४१॥

[अर्थेभ्यः] पराणीन्द्रियाणि, इन्द्रियेभ्यः परं मनः, मनसस्तु परा बुद्धिः, यस्तु बुद्धेः परतः सः [पर आत्मा] [इति] आहुः॥४२॥ महाबाहो, एवं बुद्धेः परं [आत्मानं] बुद्ध्वा, आत्मानमात्मना संस्तभ्य, कामरूपं दुरासदं शत्रुं जहि॥४३॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः॥३॥

# अथ चतुर्थोऽध्यायः

श्रीभगवानुवाच।

अहं विवस्वत इममव्ययं योगं प्रोक्तवान्। विवस्वान्मनवे प्राह। मनुरिक्ष्वाकवेऽब्रवीत्॥१॥ एवं राजर्षयः परम्पराप्राप्तमिमं [योगम्] विदुः। इह स योगो महता कालेन नष्टः, परन्तप॥२॥ मया स एवायं पुरातनो योगस्तेऽद्य प्रोक्तः, मे भक्तः सखा चासीति (=यस्मात्)। उत्तमं ह्येतद्रहस्यम् [योगज्ञानम्]॥३॥

अर्जुन उवाच।

भवतो जन्मापरं, विवस्वतो जन्म परम्। त्वमादौ प्रोक्तवानिति — एतत्कथं विजानीयाम्॥४॥

श्रीभगवानुवाच।

मे तव च बहूनि जन्मानि व्यतीतानि, अर्जुन। अहं तानि सर्वाणि वेद, त्वं न वेत्थ, परन्तप॥५॥ अजोऽपि सनव्ययात्मा [सन्] भूतानामीश्वरोऽपि सन्स्वां प्रकृतिमधिष्ठायात्ममायया सम्भवामि॥६॥ भारत, यदा यदा हि धर्मस्य

ग्लानिरधर्मस्य [च] अभ्युत्थानं भवति, तदाहमात्मानं सृजामि॥७॥ साधूनां परित्राणाय, दुष्कृतां विनाशाय, धर्मसंस्थापनार्थाय च युगे युगे सम्भवामि॥८॥ यो मे दिव्यं जन्म कर्म चैवं तत्त्वतो वेत्ति, स देहं त्यक्त्वा पुनर्जन्म नैति। मामेति, अर्जुन॥९॥

वीतरागभयक्रोधाः, मन्मया मामुपाश्रिताः, ज्ञानतपसा पूताः — बहवो मद्भावमागताः॥१०॥ यथा ये मां प्रपद्यन्ते, तथैवाहं तान्भजामि। पार्थ, मनुष्या मम वर्त्म सर्वशोऽनुवर्तन्ते॥११॥ कर्मणां सिद्धिं काङ्क्षन्त इह [बहवो मनुष्याः] देवताः [प्रति] यजन्ते, मानुषे लोके हि (=यस्मात्) कर्मजा सिद्धिः क्षिप्रं भवति॥१२॥

मया गुणकर्मविभागशश्चातुर्वर्ण्यं सृष्टम्। तस्य कर्तारमपि, मामव्ययमकर्तारं विद्धि॥१३॥ कर्माणि मां न लिम्पन्ति, मे न कर्मफले स्पृहा। इति यो मामभिजानाति, स कर्मभिर्न बध्यते॥१४॥ एवं ज्ञात्वा पूर्वैर्मुमुक्षुभिरपि कर्म कृतम्। तस्मात्त्वं पूर्वैः पूर्वतरं कृतं [एवं] कर्मैव कुरु॥१५॥

किं कर्म किमकर्मेत्यत्र कवयोऽपि मोहिताः। यज्ज्ञात्वाशुभान्मोक्ष्यते, तत्कर्म ते प्रवक्ष्यामि॥१६॥ कर्मणो हि (=यस्मात्) अपि बोद्धव्यं, विकर्मणश्च बोद्धव्यम्, अकर्मणश्च बोद्धव्यं। गहना कर्मणो गतिः॥१७॥ यः कर्मण्यकर्म पश्येत्, यश्चाकर्मणि कर्म [पश्येत्], स मनुष्येषु बुद्धिमान्। स युक्तः कृत्स्नकर्मकृत् [च]॥१८॥ यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः, तं ज्ञानाग्निदग्धकर्माणं बुधाः पण्डितमाहुः॥१९॥ कर्मफलासङ्गं त्यक्त्वा, नित्यतृप्तः, निराश्रयः, स कर्मण्यभिप्रवृत्तोऽपि किञ्चिदेव न करोति॥२०॥ निराशीः, यतचितात्मा, त्यक्तसर्वपरिग्रहः, केवलं शारीरं कर्म कुर्वन्, [सः] किल्बिषं नाप्नोति॥२१॥ यदृच्छालाभसन्तुष्टः, द्वन्द्वातीतः, विमत्सरः, सिद्धावसिद्धौ च समः, [सः] कृत्वापि न निबध्यते॥२२॥ गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसो यज्ञायाचरतः समग्रं कर्म प्रविलीयते॥२३॥ ब्रह्मार्पणं। ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं। तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्॥२४॥

अपरे योगिनो दैवमेव यज्ञं पर्युपासते। अपरे ब्रह्माग्नौ यज्ञं (=ब्रह्मात्मानं) यज्ञेन (=ब्रह्मात्मना) एवोपजुह्वति॥२५॥ अन्ये संयमाग्निषु श्रोत्रादीनीन्द्रियाणि जुह्वति। अन्य इन्द्रियाग्निषु शब्दादीन्विषयाञ्जुह्वति॥२६॥ अपरे सर्वाणीन्द्रियकर्माणि प्राणकर्माणि च ज्ञानदीपित आत्मसंयमयोगाग्नौ जुह्वति॥२७॥ तथापरे द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, स्वाध्यायज्ञानयज्ञाश्च संशितव्रता यतयः॥२८॥ तथापरे प्राणायामपरायणाः प्राणापानगती रुद्ध्वापाने प्राणं प्राणेऽपानं [च] जुह्वति॥२९॥ अपरे नियताहाराः प्राणेषु प्राणाञ्जुह्वति। सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः [सन्ति]॥३०॥

यज्ञशिष्टामृतभुजः सनातनं ब्रह्म यान्ति। अयज्ञस्यायं लोको नास्ति, अन्यः कुतः, कुरुसत्तम॥३१॥ एवं ब्रह्मणो मुखे (=वेदशब्दे) बहुविधा यज्ञा वितताः। तान्सर्वान्कर्मजान्विद्धि। एवं ज्ञात्वा विमोक्ष्यसे॥३२॥

द्रव्यमयाद्यज्ञाच्छ्रेयाञ्ज्ञानयज्ञः, परन्तप। पार्थ, सर्वमखिलं कर्म ज्ञाने परिसमाप्यते॥३३॥ प्रणिपातेन परिप्रश्नेन सेवया तद् [ज्ञानं] विद्धि। ज्ञानिनस्तत्त्वदर्शिनस्ते ज्ञानमुपदेक्ष्यन्ति॥३४॥ यज्ज्ञात्वा न पुनरेवं मोहं यास्यसि, पाण्डव। येनाशेषेण भूतान्यात्मन्यथो मयि द्रक्ष्यसि॥३५॥ अपि चेत्सर्वेभ्यः पापेभ्यः पापकृत्तमोऽसि, ज्ञानप्लवेनैव सर्वं वृजिनं (=पापं) सन्तरिष्यसि॥३६॥ अर्जुन, यथा समिद्धोऽग्निरेधांसि भस्मसात्कुरुते, तथा ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते॥३७॥ इह हि ज्ञानेन सदृशं पवित्रं न विद्यते। कालेन योगसंसिद्ध आत्मनि स्वयं तद् [ज्ञानं] विन्दति॥३८॥ श्रद्धावांस्तत्परः संयतेन्द्रियो ज्ञानं लभते। ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥३९॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा [च] विनश्यति। संशयात्मनोऽयं लोको नास्ति, न परः, न सुखम्॥४०॥ कर्माणि योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयमात्मवन्तं न निबध्नन्ति, धनञ्जय॥४१॥ तस्माज्ज्ञानासिनैनमज्ञानसम्भूतं हृत्स्थमात्मनः संशयं छित्त्वा, योगमातिष्ठ, उत्तिष्ठ [च], भारत॥४२॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥४॥

# अथ पञ्चमोऽध्यायः

अर्जुन उवाच।

कृष्ण, कर्मणां सन्न्यासं पुनर्योगं च शंससि। एतयोर्यच्छ्रेयस्तदेकं मे सुनिश्चितं ब्रूहि॥१॥

श्रीभगवानुवाच।

सन्न्यासः कर्मयोगश्चोभौ निःश्रेयसकरौ। तयोस्तु कर्मसन्न्यासात्कर्मयोगो विशिष्यते॥२॥ यो न द्वेष्टि न काङ्क्षति, स नित्यसन्न्यासी ज्ञेयः। महाबाहो, निर्द्वन्द्वो हि (=यस्मात्) बन्धात्सुखं प्रमुच्यते॥३॥ बालाः साङ्ख्ययोगौ पृथक्प्रवदन्ति, न पण्डिताः। एकमपि सम्यगास्थित उभयोः फलं विन्दते॥४॥ साङ्ख्यैर्यत्स्थानं प्राप्यते, योगैरपि तद्गम्यते। यः साङ्ख्यं च योगं चैकं पश्यति, स पश्यति॥५॥ महाबाहो, अयोगतस्तु सन्न्यासो दुःखमाप्तुम्। योगयुक्तो मुनिर्नचिरेण

ब्रह्माधिगच्छति॥६॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥७॥ इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्युक्तस्तत्त्वविद् — पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि — नैव किञ्चित्करोमीति मन्येत॥८–९॥ यः सङ्गं त्यक्त्वा कर्माणि ब्रह्मण्याधाय करोति, स पद्मपत्रमम्भसेव पापेन न लिप्यते॥१०॥ योगिनः सङ्गं त्यक्त्वात्मशुद्धये केवलैः कायेन मनसा बुद्ध्येन्द्रियैरपि कर्म कुर्वन्ति॥११॥ युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीं शान्तिमाप्नोति। अयुक्तः कामकारेण फले सक्तो निबध्यते॥१२॥ वशी देही मनसा सर्वकर्माणि सन्न्यस्य नैव कुर्वन्न कारयन्नवद्वारे पुरे सुखमास्ते॥१३॥ प्रभुर्लोकस्य न कर्तृत्वं न कर्माणि न कर्मफलसंयोगं सृजति स्वभावस्तु प्रवर्तते॥१४॥ विभुः कस्यचिन्न पापं न चैव सुकृतमादत्ते। अज्ञानेन ज्ञानमावृतं, तेन जन्तवो मुह्यन्ति॥१५॥ येषां त्वात्मनो ज्ञानेन तदज्ञानं नाशितं, तेषां ज्ञानमादित्यवत्तत्परं प्रकाशयति॥१६॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा ज्ञाननिर्धूतकल्मषा अपुनरावृत्तिं गच्छन्ति॥१७॥ विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि शुनि च श्वपाके चैव समदर्शिनः पण्डिताः॥१८॥ येषां मनः साम्ये स्थितम्, इहैव तैः सर्गो जितः। निर्दोषं हि (=यस्मात्) ब्रह्म समं, तस्मात्ते ब्रह्मणि स्थिताः॥१९॥ ब्रह्मविद् ब्रह्मणि स्थितः स्थिरबुद्धिरसम्मूढः [च] प्रियं प्राप्य न प्रहृष्येदप्रियं च प्राप्य नोद्विजेत्॥२०॥ बाह्यस्पर्शेष्वसक्तात्मात्मनि यत्सुखं विन्दति। स ब्रह्मयोगयुक्तात्माक्षयं सुखमश्नुते॥२१॥ कौन्तेय, ये हि (=यस्मात्) संस्पर्शजा भोगाः, ते दुःखयोनय एवाद्यन्तवन्तः, [तस्मात्] बुधस्तेषु न रमते॥२२॥ यः प्राक्शरीरविमोक्षणात्कामक्रोधोद्भवं वेगमेहैव सोढुं शक्नोति, स युक्तः [कर्मयोगिनित्यर्थः]। स सुखी नरः॥२३॥ योऽन्तःसुखोऽन्तरारामस्तथा योऽन्तर्ज्योतिः, स एव योगी ब्रह्मभूतो ब्रह्मनिर्वाणमधिगच्छति॥२४॥ क्षीणकल्मषाश्छिन्नद्वैधा यतात्मानः सर्वभूतहिते रता ऋषयो ब्रह्मनिर्वाणं लभन्ते॥२५॥ कामक्रोधवियुक्तानां यतचेतसां विदितात्मनां यतीनामभितो ब्रह्मनिर्वाणं वर्तते॥२६॥

बाह्यान्स्पर्शान्बहिः कृत्वा, चक्षुश्च भ्रुवोरन्तर एव [कृत्वा], नासाभ्यन्तरचारिणौ प्राणापानौ समौ कृत्वा, यो मुनिर्यतेन्द्रियमनोबुद्धिर्मोक्षपरायणो विगतेच्छाभयक्रोधः, स सदा मुक्त एव॥२७–२८॥ यज्ञतपसां भोक्तारं सर्वलोकमहेश्वरं सर्वभूतानां सुहृदं मां ज्ञात्वा शान्तिमृच्छति॥२९॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः॥५॥

# अथ षष्ठोऽध्यायः

श्रीभगवानुवाच।

यः कर्मफलमनाश्रितः कार्यं कर्म करोति, स सन्न्यासी च योगी च — न निरग्निर्न चाक्रियः॥१॥ यं सन्न्यासमिति प्राहुस्तं योगं विद्धि, पाण्डव। कश्चन हि (=यस्मात्) असन्न्यस्तसङ्कल्पो योगी न भवति॥२॥ योगमारुरुक्षोर्मुनेः कर्म कारणमुच्यते। तस्य योगारूढस्यैव शमः कारणमुच्यते॥३॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते, तदा सर्वसङ्कल्पसन्न्यासी योगारूढ उच्यते॥४॥

आत्मनात्मानमुद्धरेत्। आत्मानं नावसादयेत्, आत्मैव हि (=यस्मात्) आत्मनो बन्धुः, आत्मैवात्मनो रिपुः॥५॥ येनात्मनैवात्मा जितः, तस्यात्मात्मनो बन्धुः। अनात्मनस्त्वात्मैव शत्रुवच्छत्रुत्वे वर्तेत॥६॥

शीतोष्णसुखदुःखेषु तथा मानापमानयोर्जितात्मनः प्रशान्तस्यात्मा परं (=अधिकं) समाहितः॥७॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः समलोष्टाश्मकाञ्चनो योगी युक्त इत्युच्यते॥८॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुषु पापेष्वपि च समबुद्धिर्विशिष्यते॥९॥

रहसि स्थित एकाकी यतचित्तात्मा निराशीरपरिग्रहो योग्यात्मानं (=बुद्धिं) सततं युञ्जीत॥१०॥ शुचौ देशे स्थिरं नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरमात्मन आसनं प्रतिष्ठाप्य, तत्रासन उपविश्य, मन एकाग्रं कृत्वा, यतचित्तेन्द्रियक्रिय आत्मविशुद्धये योगं युञ्ज्यात्॥११–१२॥ कायशिरोग्रीवं सममचलं धारयन्, स्थिरः [सन्], स्वं नासिकाग्रं सम्प्रेक्ष्य, दिशश्चानवलोकयन्, प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः [सन्], मनः संयम्य, मच्चित्तो मत्परो युक्तः [योगीत्यर्थः] आसीत॥१३–१४॥ एवं सदात्मानं (=बुद्धिं) युञ्जन्, नियतमानसो योगी निर्वाणपरमां मत्संस्थां शान्तिमधिगच्छति॥१५॥ अत्यश्नतस्तु योगो नास्ति, न चैकान्तमनश्नतः, न चातिस्वप्नशीलस्य, नैव च जाग्रतः, अर्जुन॥१६॥ युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य योगो दुःखहा भवति॥१७॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते, तदा सर्वकामेभ्यो निःस्पृहो युक्त इत्युच्यते॥१८॥ यथा निवातस्थो दीपो नेङ्गते — आत्मनो योगं युञ्जतो योगिनो यतचित्तस्य सोपमा स्मृता॥१९॥ यत्र (=यस्मिन्काले) योगसेवया निरुद्धं चित्तमुपरमते, यत्र चात्मना (=मनसा) आत्मानं पश्यन्, आत्मनि (=स्वे) एव तुष्यति॥२०॥ यत्र (=यस्मिन्काले) अयं यत्तदात्यन्तिकं बुद्धिग्राह्यमतीन्द्रियं सुखं वेत्ति, स्थितश्च तत्त्वतो नैव चलति, यम् [आत्मलाभम्] च लब्ध्वा ततोऽधिकमपरं लाभं न

मन्यते, यस्मिन् [आत्मतत्त्वे] स्थितो गुरुणा दुःखेनापि न विचाल्यते, तं दुःखसंयोगवियोगं योगसञ्ज्ञितं विद्यात्। स योगोऽनिर्विण्णचेतसा निश्चयेन योक्तव्यः॥२१—२३॥ सर्वान्सङ्कल्पप्रभवान्कामानशेषतस्त्यक्त्वा, मनसैवेन्द्रियग्रामं समन्ततो विनियम्य, धृतिगृहीतया बुद्ध्या शनैः शनैरुपरमेत्। आत्मसंस्थं मनः कृत्वा, न किञ्चिदपि चिन्तयेत्॥२४—२५॥ यतो यतश्चञ्चलमस्थिरं मनो निश्चरति, ततस्तत एतद् [मनः] आत्मन्येव नियम्य, वशं नयेत्॥२६॥ उत्तमं सुखमुपैति [इव] एनं हि प्रशान्तमनसं शान्तरजसमकल्मषं ब्रह्मभूतं योगिनम्॥२७॥ एवं सदात्मानं (=बुद्धिं) युञ्जन्, विगतकल्मषो योगी सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते॥२८॥ योगयुक्तात्मा सर्वत्र समदर्शन आत्मानं सर्वभूतस्थं [ईक्षते], सर्वभूतानि चात्मनीक्षते॥२९॥ यो मां सर्वत्र पश्यति, मयि च सर्वं पश्यति, तस्याहं न प्रणश्यामि, स च मे न प्रणश्यति॥३०॥ य एकत्वमास्थितः [सन्] सर्वभूतस्थितं मां भजति, स योगी सर्वथा वर्तमानोऽपि मयि वर्तते॥३१॥ अर्जुन, यः सर्वत्र यदि सुखं वा दुःखं वात्मौपम्येन समं पश्यति, स योगी परमो मतः॥३२॥

अर्जुन उवाच।

मधुसूदन, त्वयायं योगो यः साम्येन प्रोक्तः, एतस्य [योगस्य] स्थिरां स्थितिं चञ्चलत्वादहं न पश्यामि॥३३॥ कृष्ण, चञ्चलं हि (=यस्मात्) प्रमाथि बलवद्दृढम् [च] मनः, अहं तस्य निग्रहं वायोरिव सुदुष्करं मन्ये॥३४॥

श्रीभगवानुवाच।

महाबाहो, असंशयं मनश्चलं दुर्निग्रहम्। कौन्तेय, अभ्यासेन तु वैराग्येण च गृह्यते॥३५॥ असंयतात्मना योगो दुष्प्रापः। वश्यात्मना त्वुपायतो यतता [च] अवाप्तुं शक्यः — इति मे मतिः॥३६॥

अर्जुन उवाच।

कृष्ण, श्रद्धयोपेतोऽयतिर्योगाच्चलितमानसो योगसंसिद्धिमप्राप्य कां गतिं गच्छति॥३७॥ महाबाहो, ब्रह्मणः पथि विमूढ उभयविभ्रष्टोऽप्रतिष्ठश्छिन्नाभ्रमिव कच्चिन्न नश्यति॥३८॥ कृष्ण, एतन्मे संशयमशेषतश्छेत्तुमर्हसि, त्वदन्यो हि (=यस्मात्) अस्य संशयस्य च्छेत्ता नोपपद्यते॥३९॥

श्रीभगवानुवाच।

पार्थ, नैवेह नामुत्र तस्य विनाशो विद्यते। तात, कश्चिद्धि (=यस्मात्) कल्याणकृद्दुर्गतिं न गच्छति॥४०॥ योगभ्रष्टः पुण्यकृतां लोकान्प्राप्य, शाश्वतीः समा उषित्वा, शुचीनां श्रीमतां गेहेऽभिजायते॥४१॥ अथवा धीमतां योगिनामेव कुले

भवति। यदेतदीदृशं जन्म हि लोके दुर्लभतरम्॥४२॥ तत्र पौर्वदेहिकं तं बुद्धिसंयोगं लभते, ततश्च संसिद्धौ भूयो यतते, कुरुनन्दन॥४३॥ तेन पूर्वाभ्यासेनैवावशोऽपि स ह्रियते हि। योगस्य जिज्ञासुरपि शब्दब्रह्मातिवर्तते॥४४॥ प्रयत्नाद्यतमानस्तु (=एव) योगी संशुद्धकिल्बिषोऽनेकजन्मसंसिद्धस्ततः परां गतिं याति॥४५॥ योगी तपस्विभ्योऽधिको ज्ञानिभ्यः (=पण्डितेभ्यः) अप्यधिको मतः। योगी कर्मिभ्यश्चाधिकः। तस्माद्योगी भव, अर्जुन॥४६॥ यः श्रद्धावान्मद्गतेनान्तरात्मना मां भजते, स सर्वेषां योगिनामपि युक्ततमो मे मतः॥४७॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः॥६॥

# अथ सप्तमोऽध्यायः

श्रीभगवानुवाच।

पार्थ, मय्यासक्तमना मदाश्रयो योगं युञ्जन्, यथा समग्रं मामसंशयं ज्ञास्यसि, तच्छृणु॥१॥ अहं ते (=तुभ्यं) इदं ज्ञानं सविज्ञानं वक्षाम्यशेषतः, यज्ज्ञात्वेह नान्यद्भूयो ज्ञातव्यमवशिष्यते॥२॥ मनुष्याणां सहस्रेषु कश्चित्सिद्धये यतति। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥३॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरहङ्कार एव चेतीयं मे प्रकृतिरष्टधा भिन्ना॥४॥ इयमपरा। महाबाहो, इतस्त्वन्यां मे परां प्रकृतिं विद्धि — जीवभूतां यया [च] इदं जगद्धार्यते॥५॥ सर्वाणि भूतान्येतद्योनीनीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः, तथा प्रलयः॥६॥ मत्तः परतरं नान्यत्किञ्चिदस्ति, धनञ्जय। सूत्रे मणिगणा इव मयीदं सर्वं प्रोतम्॥७॥

कौन्तेय, अहमस्मि — अप्सु रसः, शशिसूर्ययोः प्रभा, सर्ववेदेषु प्रणवः, खे शब्दः, नृषु पौरुषम्॥८॥ पृथिव्यां च पुण्यो गन्धः, विभावसौ च तेजोऽस्मि। सर्वभूतेषु जीवनं, तपस्विषु च तपोऽस्मि॥९॥ पार्थ, सनातनं मां सर्वभूतानां बीजं विद्धि। बुद्धिमतां बुद्धिः, तेजस्विनां तेजोऽहमस्मि॥१०॥ बलवतां च कामरागविवर्जितं बलं, भूतेषु धर्माविरुद्धः कामोऽहमस्मि, भरतर्षभ॥११॥ ये चैव सात्त्विका भावाः, ये च राजसास्तामसाः [च], तान्मत्त एवेति विद्धि। ते मयि, न त्वहं तेषु॥१२॥

एभिस्त्रिभिर्गुणमयैर्भावैः सर्वमिदं जगन्मोहितम्। मामेभ्यः परमव्ययं [च] [लोकः] नाभिजानाति॥१३॥ मम हि (=यस्मात्) एषा माया गुणमयी दैवी दुरत्यया, ये मामेव प्रपद्यन्ते ते एतां मायां तरन्ति॥१४॥ दुष्कृतिनो मूढा नराधमा न मां प्रपद्यन्ते। माययापहृतज्ञाना आसुरं भावमाश्रिताः॥१५॥

चतुर्विधा जनाः सुकृतिनो मां भजन्ते, अर्जुन। आर्तोऽर्थार्थी जिज्ञासुर्ज्ञानी च, भरतर्षभ॥१६॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते, अत्यर्थं हि (=यस्मात्) अहं ज्ञानिनः प्रियः, स च मम प्रियः॥१७॥ सर्व एवैत उदाराः, ज्ञानी त्वात्मैव — [इति] मे मतम्। स हि (=यस्मात्) युक्तात्मा मामेवानुत्तमां गतिमास्थितः॥१८॥ बहूनां जन्मनामन्ते ज्ञानवान् "वासुदेवः सर्वम्" इति मां प्रपद्यते। स महात्मा सुदुर्लभः॥१९॥

तैस्तैः कामैर्हृतज्ञानाः स्वया प्रकृत्या नियतास्तं तं नियममास्थायान्यदेवताः प्रपद्यन्ते॥२०॥ यो यो भक्तो यां यां तनुं श्रद्धयार्चितुमिच्छति, तस्य तस्य तामेव श्रद्धामहमचलां विदधामि॥२१॥ स तया श्रद्धया युक्तस्तस्या राधनमीहते, ततश्च कामाल्ँलभते, तान्हि (=यस्मात्) मयैव विहितान्॥२२॥ तेषां त्वल्पमेधसां तत्फलमन्तवद्भवति। देवयजो देवान्यान्ति, मद्भक्ता अपि मां यान्ति॥२३॥ अबुद्धयोऽव्ययमनुत्तमं मम परं भावमजानन्तो मामव्यक्तं व्यक्तिमापन्नं मन्यन्ते॥२४॥ योगमायासमावृतोऽहं न सर्वस्य प्रकाशः। अयं लोको मूढो मामजमव्ययं नाभिजानाति॥२५॥ अर्जुन, अहं समतीतानि वर्तमानानि च भविष्याणि च भूतानि वेद। न तु कश्चन मां वेद॥२६॥ भारत, परन्तप, सर्गे इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन सर्वभूतानि सम्मोहं यान्ति॥२७॥

येषां तु पुण्यकर्मणां जनानां पापमन्तगतं, ते द्वन्द्वमोहनिर्मुक्ता दृढव्रता मां भजन्ते॥२८॥ ये मामाश्रित्य जरामरणमोक्षाय यतन्ति, ते तद् ब्रह्म कृत्स्नमध्यात्मं [विदुः], कर्म चाखिलं विदुः॥२९॥ ये मां साधिभूताधिदैवं साधियज्ञं च विदुः, युक्तचेतसः प्रयाणकालेऽपि च — ते मां विदुः॥३०॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः॥७॥

# अथाष्टमोऽध्यायः

अर्जुन उवाच।

पुरुषोत्तम, किं तद् ब्रह्म, किमध्यात्मं, किं कर्म, अधिभूतं किं प्रोक्तम्, अधिदैवं च किमुच्यते॥१॥ अत्रास्मिन्देहे कः कथमधियज्ञः, मधुसूदन। प्रयाणकाले च नियतात्मभिः कथं ज्ञेयोऽसि॥२॥

श्रीभगवानुवाच।

अक्षरं परमं ब्रह्म। स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः॥३॥ क्षरो भावोऽधिभूतम्। पुरुषः [हिरण्यगर्भः इत्यर्थः] चाधिदैवतम्। अत्र देहेऽधियज्ञोऽहमेव, देहभृतां वर॥४॥ अन्तकाले च मामेव स्मरन्, कलेवरं मुक्त्वा, यः प्रयाति, स मद्भावं याति। अत्र संशयो नास्ति॥५॥ कौन्तेय, अन्ते कलेवरं त्यजति, यं यं वापि भावं स्मरन्, सदा तद्भावभावितः [सन्] तं तमेवैति॥६॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च। मय्यर्पितमनोबुद्धिः मामेवासंशयमेष्यसि॥७॥ पार्थ, अभ्यासयोगयुक्तेन नान्यगामिना [च] चेतसानुचिन्तयन्, यः कविं, पुराणम्, अनुशासितारम्, अणोरणीयांसं, सर्वस्य धातारम्, अचिन्त्यरूपम्, आदित्यवर्णं, तमसः परस्तादनुस्मरेत् — परमं दिव्यं पुरुषं याति॥८–९॥ प्रयाणकालेऽचलेन मनसा भक्त्या युक्तो योगबलेन चैव, भ्रुवोर्मध्ये प्राणं सम्यगावेश्य स तं परं दिव्यं पुरुषमुपैति॥१०॥

यदक्षरं, वेदविदो वदन्ति, यद्वीतरागा यतयो विशन्ति, यदिच्छन्तो ब्रह्मचर्यं चरन्ति — तत्पदं ते (=तुभ्यं) सङ्ग्रहेण प्रवक्ष्ये॥११॥ सर्वद्वाराणि संयम्य, मनो हृदि निरुध्य च, आत्मनः प्राणं मूर्ध्न्याधाय, योगधारणामास्थितः [सन्], ओमित्येकाक्षरं ब्रह्म व्याहरन्, मामनुस्मरन्, देहं त्यजन्, यः प्रयाति, स परमां गतिं [संसारे] याति॥१२–१३॥ पार्थ, योऽनन्यचेता मां सततं नित्यशः स्मरति, तस्य नित्ययुक्तस्य योगिनोऽहं सुलभः॥१४॥ महात्मानो मामुपेत्य, दुःखालयमशाश्वतं पुनर्जन्म नाप्नुवन्ति। [ते] परमां संसिद्धिं गताः॥१५॥ अर्जुन, आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनः। कौन्तेय, मां त्वुपेत्य पुनर्जन्म न विद्यते॥१६॥ ते जना अहोरात्रविदो यद् ब्रह्मणोऽहः सहस्रयुगपर्यन्तं रात्रिं [च] युगसहस्रान्तां विदुः॥१७॥ अहरागमेऽव्यक्तात्सर्वा व्यक्तयः प्रभवन्ति। रात्र्यागमे तत्रैवाव्यक्तसञ्ज्ञके [ताः] प्रलीयन्ते॥१८॥ पार्थ, स एवायं भूतग्रामोऽवशो भूत्वा भूत्वा रात्र्यागमे प्रलीयतेऽहरागमे प्रभवति॥१९॥ तस्मात्त्वव्यक्तात्परोऽन्योऽव्यक्तः, यो भावः सनातनः। स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥२०॥ अव्यक्तोऽक्षर इत्युक्तः। तं परमां गतिमाहुः। यं प्राप्य न निवर्तन्ते, तन्मम परमं धाम॥२१॥ पार्थ, यस्य भूतान्यन्तःस्थानि येनेदं सर्वं ततं, स पुरुषः परः, अनन्यया तु भक्त्या लभ्यः॥२२॥

यत्र काले [गत्यामित्यर्थः] तु योगिनः प्रयाता अनावृत्तिमावृत्तिं चैव यान्ति, तं कालं [गतिमित्यर्थः] वक्ष्यामि, भरतर्षभ॥२३॥ [यत्र गत्याम्] अग्निः, ज्योतिः, अहः, शुक्लः [पक्षः], षण्मासा उत्तरायणं [देवताः सन्ति], तत्र प्रयाताः ब्रह्मविदः [ब्रह्मोपासका इत्यर्थः] जना ब्रह्म [क्रमेण] गच्छन्ति॥२४॥ [यत्र गत्याम्] धूमः, रात्रिः, तथा कृष्णः [पक्षः], षण्मासा दक्षिणायनं [देवताः सन्ति], तत्र चान्द्रमसं ज्योतिः (=दिवमित्यर्थः) प्राप्य, योगी निवर्तते॥२५॥ जगतो ह्येते

गती शुक्लकृष्णे शाश्वते मते। एकयानावृत्तिं याति, अन्यया पुन आवर्तते॥२६॥ पार्थ, एते सृती जानन्कश्चन योगी न मुह्यति। तस्मात्सर्वेषु कालेषु योगयुक्तो भव, अर्जुन॥२७॥ इदं विदित्वा यत्पुण्यफलं वेदेषु यज्ञेषु तपःसु दानेषु चैव प्रदिष्टं, तत्सर्वं योग्यत्येति, आद्यं च परं स्थानम् [अचिरेण] उपैति॥२८॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥८॥

# अथ नवमोऽध्यायः

श्रीभगवानुवाच।

इदं तु गुह्यतमं ज्ञानं विज्ञानसहितं ते (=तुभ्यम्) अनसूयवे प्रवक्ष्यामि, यज्ज्ञात्वाशुभान्मोक्ष्यसे॥१॥ इदं [ज्ञानं] राजविद्या, राजगुह्यम्, उत्तमं पवित्रं, प्रत्यक्षावगमं, धर्म्यं, सुसुखं कर्तुम्, अव्ययं [च]॥२॥ परन्तप, अस्य धर्मस्याश्रद्दधानाः पुरुषा मामप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते॥३॥ मयाव्यक्तमूर्तिनेदं सर्वं जगत्ततम्। सर्वभूतानि मत्स्थानि, अहं च तेषु नावस्थितः॥४॥ न च भूतानि मत्स्थानि। म ऐश्वरं योगं पश्य। ममात्मा भूतभावनः, भूतभृत्, न च भूतस्थः॥५॥ यथा सर्वत्रगो महान्वायुर्नित्यमाकाशस्थितः, तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥ कौन्तेय, कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति। पुनः कल्पादावहं तानि विसृजामि॥७॥ स्वां प्रकृतिमवष्टभ्य, इमं कृत्स्नं भूतग्राममवशं प्रकृतेर्वशात्पुनः पुनर्विसृजामि॥८॥ धनञ्जय, तानि च कर्माणि मामुदासीनवदासीनं तेषु [च] कर्मस्वसक्तं न निबध्नन्ति॥९॥ मयाध्यक्षेण प्रकृतिः सचराचरं सूयते। कौन्तेय, अनेन हेतुना जगद्विपरिवर्तते॥१०॥

भूतमहेश्वरं मम परं भावमजानन्तः, मूढा मां मानुषीं तनुमाश्रितमवजानन्ति॥११॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसो राक्षसीमासुरीं च (=वा) एव मोहिनीं प्रकृतिं श्रिताः॥१२॥ पार्थ, महात्मानस्तु दैवीं प्रकृतिमाश्रिताः, अनन्यमनसः, मामव्ययं भूतादिं ज्ञात्वा, [मां] भजन्ति॥१३॥ मां सततं कीर्तयन्तो यतन्तश्च दृढव्रता मां च नमस्यन्तो भक्त्या नित्ययुक्ताः [माम्] उपासते॥१४॥ अन्ये चापि ज्ञानयज्ञेन यजन्तः, मां विश्वतोमुखमेकत्वेन पृथक्त्वेन [च] बहुधोपासते॥१५॥

अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहमौषधम्, अहं मन्त्रः, अहमेवाज्यम्, अहमग्निः, अहं [च] हुतम्॥१६॥ अहमस्य जगतः पिता, माता, पितामहः, धाता [च]। [अहं] वेद्यं, पवित्रम्, ओङ्कारः, ऋक्, साम, यजुरेव च॥१७॥ [अहं] गतिः,

भर्ता, प्रभुः, साक्षी, निवासः, शरणं, सुहृद् [च]। [अहं] प्रभवः, प्रलयः, स्थानं, निधानं, अव्ययं [च] बीजम्॥१८॥ अहं तपामि। अहं वर्षं निगृह्णाम्युत्सृजामि च। [अहं] अमृतं चैव मृत्युश्च। अहं सदसच्च, अर्जुन॥१९॥

त्रैविद्याः सोमपाः पूतपापाः, मां यज्ञैरिष्ट्वा, स्वर्गतिं प्रार्थयन्ते। पुण्यं सुरेन्द्रलोकमासाद्य, ते दिवि दिव्यान्देवभोगानश्नन्ति॥२०॥ ते तं विशालं स्वर्गलोकं भुक्त्वा, पुण्ये क्षीणे, मर्त्यलोकं विशन्ति। एवं त्रयीधर्ममनुप्रपन्नाः कामकामा गतागतं लभन्ते॥२१॥ ये जना अनन्या मां चिन्तयन्तः [मां] पर्युपासते, तेषां नित्याभियुक्तानामहं योगक्षेमं वहामि॥२२॥ कौन्तेय, येऽप्यन्यदेवताभक्ताः श्रद्धयान्विता यजन्ते, तेऽपि मामेव यजन्ति [परन्तु] अविधिपूर्वकम्॥२३॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च, मां तु तत्त्वेन नाभिजानन्ति। अतस्ते च्यवन्ति॥२४॥ देवव्रता देवान्यान्ति। पितृव्रताः पितॄन्यान्ति। भूतेज्या भूतानि यान्ति। मद्याजिनोऽपि मां यान्ति॥२५॥ यो मे पत्रं पुष्पं फलं तोयं भक्त्या प्रयच्छति, अहं तत्प्रयतात्मनो भक्त्युपहृतमश्नामि॥२६॥ कौन्तेय, यत्करोषि, यदश्नासि, यज्जुहोषि, यद्ददासि, यत्तपस्यसि तन्मदर्पणं कुरुष्व॥२७॥ एवं शुभाशुभफलैः कर्मबन्धनैर्मोक्ष्यसे। सन्न्यासयोगयुक्तात्मा विमुक्तः [सन्] मामुपैष्यसि॥२८॥ अहं सर्वभूतेषु समः [अस्मि]। मे न द्वेष्यो न प्रियः [वा] अस्ति। ये तु मां भक्त्या भजन्ति, ते मयि, अहं चापि तेषु॥२९॥ अपि चेत्सुदुराचरोऽनन्यभाक् [सन्] मां भजते, स साधुरेव मन्तव्यः, स हि (=यस्मात्) सम्यग्व्यवसितः॥३०॥ क्षिप्रं [सः] धर्मात्मा भवति, शश्वच्छान्तिं निगच्छति। कौन्तेय, मे भक्तो न प्रणश्यति [इति] प्रतिजानीहि॥३१॥ पार्थ, येऽपि पापयोनयः स्युः, तथा स्त्रियो वैश्याः शूद्राः, तेऽपि मां हि (=यस्मात्) व्यपाश्रित्य परां गतिं यान्ति॥३२॥ किं पुनः पुण्या भक्ता ब्राह्मणाः, तथा राजर्षयः। इममनित्यमसुखं लोकं प्राप्य, मां भजस्व॥३३॥ मन्मना मद्भक्तो मद्याजी भव। मां नमस्कुरु। एवमात्मानं युक्त्वा, मत्परायणः [सन्] मामेवैष्यसि॥३४॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥९॥

# अथ दशमोऽध्यायः

श्रीभगवानुवाच।

महाबाहो, भूय एव मे परमं वचः शृणु। यद् [परमं] प्रीयमाणाय ते (=तुभ्यम्) अहं हितकाम्यया वक्ष्यामि॥१॥ न सुरगणा न महर्षयो मे प्रभवं विदुः, अहं हि (=यस्मात्) सर्वशो देवानां महर्षीणां चादिः॥२॥ यो मां

लोकमहेश्वरमजमनादिं च वेत्ति, स मर्त्येष्वसम्मूढः सर्वपापैः प्रमुच्यते॥३॥ बुद्धिः, ज्ञानम्, असम्मोहः, क्षमा, सत्यं, दमः, शमः, सुखं, दुःखं, भवः, अभावः, भयं च, अभयमेव च, अहिंसा, समता, तुष्टिः, तपः, दानं, यशः, अयशः — भूतानां पृथग्विधा भावा मत्त एव भवन्ति॥४–५॥ पूर्वे सप्त महार्षयस्तथा चत्वारो मनवो मद्भावा मानसा जाताः। येषां लोक इमाः प्रजाः॥६॥ य एतां विभूतिं मम योगं च तत्त्वतो वेत्ति, सोऽविकम्पेन योगेन युज्यते, अत्र न संशयः॥७॥ योऽहं सर्वस्य प्रभवः, मत्तः सर्वं प्रवर्तत इति मत्वा बुधा भावसमन्विता मां भजन्ते (=प्राप्नुवन्ति)॥८॥ मच्चित्ता मद्गतप्राणाः परस्परं बोधयन्तो मां च नित्यं कथयन्तः — [ते] तुष्यन्ति च रमन्ति च॥९॥ तेषां सततयुक्तानां प्रीतिपूर्वकं भजतां तं बुद्धियोगं ददामि, येन ते मामुपयान्ति॥१०॥ तेषामेवानुकम्पार्थमहमात्मभावस्थोऽज्ञानजं तमो ज्ञानदीपेन भास्वता नाशयामि॥११॥

अर्जुन उवाच।

भवान्परं ब्रह्म, परं धाम, परमं पवित्रम्। शाश्वतं पुरुषं, दिव्यमादिदेवम्, अजं, विभुं [इति] त्वां सर्व ऋषयो देवर्षिर्नारदस्तथासितो देवलो व्यास आहुः। स्वयं चैव मे ब्रवीषि॥१३–१३॥ एतत्सर्वं यन्मां वदस्यृतं मन्ये, केशव। भगवन्, न हि देवा न दानवास्ते व्यक्तिं विदुः॥१४॥ पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते, त्वं स्वयमेवात्मानमात्मना वेत्थ॥१५॥ याभिर्विभूतिभिस्त्वमिमाँल्लोकान्व्याप्य तिष्ठसि, [याः] दिव्या आत्मविभूतयो ह्यशेषेण वक्तुमर्हसि॥१६॥ योगिन्, कथमहं सदा परिचिन्तयंस्त्वां विद्याम्। भगवन्, केषु केषु भावेषु च मया चिन्त्योऽसि॥१७॥ जनार्दन, आत्मनो योगं विभूतिं च विस्तरेण भूयः कथय, मे हि (=यस्मात्) अमृतं शृण्वतस्तृप्तिर्नास्ति॥१८॥

श्रीभगवानुवाच।

हन्त कुरुश्रेष्ठ, [याः] दिव्या आत्मविभूतयस्ते (=तुभ्यं) प्राधान्यतः कथयिष्यामि, मे हि (=यस्मात्) विस्तरस्यान्तो नास्ति॥१९॥ गुडाकेश, अहं सर्वभूताशयस्थित आत्मा। अहं भूतानामादिश्च मध्यं चान्त एव च॥२०॥ अहमादित्यानां विष्णुः, ज्योतिषामंशुमान्रविः, मरुतां मरीचिरस्मि। अहं नक्षत्राणां शशी॥२१॥ वेदानां सामवेदोऽस्मि। देवानां वासवः (=इन्द्रः) अस्मि। इन्द्रियाणां च मनोऽस्मि। भूतानां चेतनास्मि॥२२॥ रुद्राणां च शङ्करोऽस्मि। यक्षरक्षसां वित्तेशः, वसूनां च पावकोऽस्मि। शिखरिणां मेरुरहम्॥२३॥ पार्थ, पुरोधसां च मुख्यं बृहस्पतिं मां विद्धि। अहं सेनानीनां स्कन्दः, सरसां सागरोऽस्मि॥२४॥ अहं महार्षीणां भृगुः, गिरामेकमक्षरमस्मि। यज्ञानां जपयज्ञः, स्थावराणां

हिमालयोऽस्मि॥२५॥ [अहं] सर्ववृक्षाणामश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, सिद्धानां कपिलो मुनिः॥२६॥ अश्वानाममृतोद्भवमुच्चैःश्रवसं, गजेन्द्राणामैरावतं, नराणां च नराधिपं मां विद्धि॥२७॥ अहमायुधानां वज्रं, धेनूनां कामधुगस्मि। प्रजनश्च कन्दर्पोऽस्मि। सर्पाणां वासुकिरस्मि॥२८॥ नागानां चानन्तोऽस्मि। यादसां वरुणोऽहम्। पितॄणां चार्यमास्मि। संयमतां यमोऽहम्॥२९॥ दैत्यानां च प्रह्लादोऽस्मि। कलयतां कालोऽहम्। अहं च मृगाणां मृगेन्द्रः, पक्षिणां च वैनतेयः (=गरुडः)॥३०॥ पवतां पवनोऽस्मि। शस्त्रभृतां रामोऽहम्। झषाणां च मकरोऽस्मि। स्रोतसां जाह्नवी (=गङ्गा) अस्मि॥३१॥ सर्गाणामादिः, मध्यं च, अन्त एव चाहम्, अर्जुन। विद्यानामध्यात्मविद्या, प्रवदतां वादोऽहम्॥३२॥ अक्षराणामकारः, सामासिकस्य च द्वन्द्वोऽस्मि। अहमेवाक्षयः कालः। अहं विश्वतोमुखो धाता॥३३॥ सर्वहरश्च मृत्युः, भविष्यतां चोद्भवोऽहम्। नारीणां कीर्तिः श्रीर्वाक्स्मृतिर्मेधा धृतिः क्षमा च [अहम्]॥३४॥ तथा साम्नां बृहत्साम, छन्दसां गायत्र्यहम्। मासानां मार्गशीर्षः, ऋतूनां कुसुमाकरोऽहम्॥३५॥ छलयतां द्यूतमस्मि। तेजस्विनां तेजोऽहम्। जयोऽस्मि। व्यवसायोऽस्मि। सत्त्ववतां सत्त्वमहम्॥३६॥ वृष्णीनां वासुदेवः, पाण्डवानां धनञ्जयोऽस्मि। अहमपि मुनीनां व्यासः, कवीनामुशना कविः (=शुक्राचार्य)॥३७॥ दमयतां दण्डोऽस्मि। जिगीषतां नीतिरस्मि। गुह्यानां चैव मौनमस्मि। ज्ञानवतां ज्ञानमहम्॥३८॥ यच्च सर्वभूतानां बीजं तदप्यहम्, अर्जुन। यन्मया विना स्यात्, तच्चराचरं भूतं नास्ति॥३९॥ मम दिव्यानां विभूतीनामन्तो नास्ति, परन्तप। मया त्वेष विभूतेर्विस्तर उद्देशतः प्रोक्तः॥४०॥ यद्यद्विभूतिमच्छ्रीमदूर्जितमेव वा सत्त्वं, तत्तदेव मम तेजोंऽशसम्भवं त्वमवगच्छ॥४१॥ अथवैतेन बहुना तव ज्ञातेन किम्, अर्जुन। अहमिदं कृत्स्नं जगदेकांशेन विष्टभ्य स्थितः॥४२॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः॥१०॥

# अथैकादशोऽध्यायः

अर्जुन उवाच।

यत्परमं गुह्यमध्यात्मसञ्ज्ञितं वचस्त्वया मदनुग्रहायोक्तं, तेनायं मम मोहो विगतः॥१॥ कमलपत्राक्ष, मया भूतानां भवाप्ययौ हि त्वत्तो विस्तरशः श्रुतौ, अव्ययमपि च माहात्म्यम् [श्रुतम्]॥२॥ यथा त्वमात्मानमात्थ, परमेश्वर, एवमेतत्त ऐश्वरं रूपं द्रष्टुमिच्छामि, पुरुषोत्तम॥३॥ यदि तन्मया द्रष्टुं शक्यमिति मन्यसे, प्रभो, योगेश्वर, ततस्त्वं मेऽव्ययमात्मानं

दर्शय॥४॥ श्रीभगवानुवाच। पार्थ, पश्य शतशोऽथ सहस्रशो मे रूपाणि दिव्यानि नानाविधानि नानावर्णाकृतीनि च॥५॥ पश्यादित्यान्, वसून्, रुद्रान्, अश्विनौ, तथा मरुतः। पश्य बहून्यदृष्टपूर्वाण्याश्चर्याणि, भारत॥६॥ गुडाकेश, पश्याद्येह मम देह एकस्थं कृत्स्नं सचराचरं जगत्, अन्यच्च यद्द्रष्टुमिच्छसि॥७॥ अनेन तु स्वचक्षुषैव मां द्रष्टुं न शक्यसे। दिव्यं चक्षुस्ते (=तुभ्यं) ददामि। पश्य म ऐश्वरं योगम्॥८॥

सञ्जय उवाच।

राजन् [धृतराष्ट्र], एवमुक्त्वा, ततो महायोगेश्वरो हरिः पार्थाय परममैश्वरं रूपं दर्शयामास॥९॥ [तद्रूपम्] अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम्, अनेकदिव्याभरणं, दिव्यानेकोद्यतायुधम्॥१०॥ [तद्रूपम्] दिव्यमाल्याम्बरधरं, दिव्यगन्धानुलेपनं, सर्वाश्चर्यमयं, देवम्, अनन्तं, विश्वतोमुखम्॥११॥ यदि दिवि सूर्यसहस्रस्य भा युगपदुत्थिता भवेत्, सा तस्य महात्मनो भासः सदृशी स्यात्॥१२॥ तदा पाण्डवस्तत्र देवदेवस्य शरीर एकस्थमनेकधा प्रविभक्तं कृत्स्नं जगदपश्यत्॥१३॥ ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयो देवं शिरसा प्रणम्य कृताञ्जलिरभाषत॥१४॥

अर्जुन उवाच।

देव, पश्यामि तव देहे सर्वान्देवान्, तथा भूतविशेषसङ्घान्, ईशं कमलासनस्थं ब्रह्माणं, सर्वानृषींश्च दिव्यानुरगांश्च॥१५॥ त्वामनेकबाहूदरवक्त्रनेत्रं, सर्वतोऽनन्तरूपं पश्यामि। तव पुनर्नान्तं न मध्यं नादिं पश्यामि, विश्वेश्वर विश्वरूप॥१६॥ त्वां किरीटिनं गदिनं चक्रिणं च, सर्वतोदीप्तिमन्तं तेजोराशिं, दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिम्, अप्रमेयं पश्यामि॥१७॥ त्वमक्षरं परमं वेदितव्यं, त्वमस्य विश्वस्य परं निधानं, त्वमव्ययः शाश्वतधर्मगोप्ता, त्वं सनातनः पुरुषो मे मतः॥१८॥ त्वामनादिमध्यान्तम्, अनन्तवीर्यम्, अनन्तबाहुं, शशिसूर्यनेत्रं, दीप्तहुताशवक्त्रं, स्वतेजसेदं विश्वं तपन्तं पश्यामि॥१९॥ त्वयैकेन हीदं द्यावापृथिव्योरन्तरं सर्वाश्च दिशो व्याप्तम्। इदं तव रूपमद्भुतमुग्रं [च] दृष्ट्वा लोकत्रयं प्रव्यथितं, महात्मन्॥२०॥ अमी सुरसङ्घा हि त्वां विशन्ति। केचिद्भीताः प्राञ्जलयो गृणन्ति। महर्षिसिद्धसङ्घाः "स्वस्ति" इत्युक्त्वा, पुष्कलाभिः स्तुतिभिस्त्वां स्तुवन्ति॥२१॥ रुद्रादित्याः, वसवः, ये च साध्याः, विश्वे, अश्विनौ, मरुतश्च, ऊष्मपाश्च, गन्धर्वयक्षासुरसिद्धसङ्घाः — सर्वे विस्मिता एव, त्वां च वीक्षन्ते॥२२॥ महाबाहो, महत्ते रूपं बहुवक्त्रनेत्रं, बहुबाहूरुपादं, बहूदरं, बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथिताः, तथाहम्॥२३॥ त्वां नभःस्पृशं, दीप्तमनेकवर्णं, व्यात्ताननं, दीप्तविशालनेत्रं दृष्ट्वा हि [अहं] प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि, विष्णो॥२४॥ दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वैव, दिशो न जाने, शर्म न च लभे। प्रसीद, देवेश जगन्निवास॥२५॥ अवनिपालसङ्घैः सहैवामी च सर्वे

धृतराष्ट्रस्य पुत्राः, तथा भीष्मो द्रोणः, असौ सूतपुत्रः, अस्मदीयैरपि योधमुख्यैः सह त्वां [विशन्ति]॥२६॥ त्वरमाणास्ते (=तव) दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति। केचिच्चूर्णितैरुत्तमाङ्गैर्दशनान्तरेषु विलग्नाः सन्दृश्यन्ते॥२७॥ यथा नदीनां बहवोऽभिमुखा अम्बुवेगाः समुद्रमेव द्रवन्ति, तथामी नरलोकवीरास्तवाभिविज्वलन्ति वक्त्राणि विशन्ति॥२८॥ यथा समृद्धवेगाः पतङ्गा नाशाय प्रदीप्तं ज्वलनं विशन्ति, तथैव समृद्धवेगा लोका अपि नाशाय तव वक्त्राणि विशन्ति॥२९॥ ज्वलद्भिर्वदनैः समग्राल्लँलोकान्समन्ताद्ग्रसमानो लेलिह्यसे। तेजोभिः समग्रं जगदापूर्य, तवोग्रा भासः प्रतपन्ति, विष्णो॥३०॥ को भवानुग्ररूपः। मे आख्याहि। नमस्तेऽस्तु, देववर, प्रसीद। भवन्तमाद्यं विज्ञातुमिच्छामि, तव हि (=यस्मात्) प्रवृत्तिं न प्रजानामि॥३१॥

श्रीभगवानुवाच।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धः। इह लोकान्समाहर्तुं प्रवृत्तः। त्वामृतेऽपि, प्रत्यनीकेषु ये योधा अवस्थिताः, सर्वे न भविष्यन्ति॥३२॥ तस्मात्त्वमुत्तिष्ठ, यशो लभस्व। शत्रूञ्जित्वा समृद्धं राज्यं भुङ्क्ष्व। मयैवैते पूर्वमेव निहताः। निमित्तमात्रं भव, सव्यसाचिन्॥३३॥ द्रोणं, भीष्मं च, जयद्रथं च, कर्णं च, तथान्यान्योधवीरानपि मया हतान् — त्वं जहि। मा व्यथिष्ठा। रणे सपत्नाञ्जेतासि। [अर्जुन,] युध्यस्व॥३४॥ सञ्जय उवाच। केशवस्यैतद्वचनं श्रुत्वा वेपमानः किरीटी कृताञ्जलिर्नमस्कृत्वा भीतभीतः प्रणम्य भूय एव कृष्णं सगद्गदमाह॥३५॥

अर्जुन उवाच।

हृषीकेश, स्थाने तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च, भीतानि रक्षांसि दिशो द्रवन्ति, सर्वे च सिद्धसङ्घा नमस्यन्ति॥३६॥ महात्मन्, कस्माच्च ब्रह्मणोऽपि गरीयस आदिकर्त्रे [च] ते (=तुभ्यं) न नमेरन्। अनन्त देवेश जगन्निवास, त्वं तदक्षरं परं, यत्सदसत्॥३७॥ त्वमादिदेवः, पुराणः पुरुषः। त्वमस्य विश्वस्य परं निधानं। वेत्ता, वेद्यं च, परं च धामासि। त्वया विश्वं ततम्, अनन्तरूप॥३८॥ त्वं वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापति प्रपितामहश्च। नमो नमस्तेऽस्तु, सहस्रकृत्वः पुनश्च भूयोऽपि, ते नमो नमः॥३९॥ पुरस्तादथ पृष्ठतस्ते नमः, सर्वत एव नमस्तेऽस्तु, सर्व। त्वमनन्तवीर्यामितविक्रमः सर्वं समाप्नोषि। ततः सर्वोऽसि॥४०॥ अच्युत, यत्तव महिमानमिदम् [रूपं neut., or = इमं महिमानं masc.] अजानता मया प्रमादात्प्रणयेन वापि सखेति मत्वा “हे कृष्ण,” “हे यादव,” “हे सखा [i.e., सखे]” इति प्रसभमुक्तम्, यच्च विहारशय्यासनभोजनेष्वेकोऽथवा तत्समक्षमप्यवहासार्थमसत्कृतोऽसि — तदहं त्वामप्रमेयं क्षामये॥४१–४२॥ त्वं चराचरस्य लोकस्य पिता, पूज्यः, अस्य च गरीयान्गुरुरसि। लोकत्रयेऽपि त्वत्समो नास्ति,

कुतोऽभ्यधिकोऽन्यः, अप्रतिमप्रभाव॥४३॥ तस्मात्प्रणम्य कायं प्रणिधायाहं त्वामीड्यमीशं प्रसादये। पुत्रस्य पितेव, सख्युः सखेव, प्रियायाः प्रियः [इव] सोढुमर्हसि, देव॥४४॥ अदृष्टपूर्वं दृष्ट्वा हृषितोऽस्मि, भयेन च मे मनः प्रव्यथितम्। देव, तद्रूपमेव मे दर्शय। प्रसीद, देवेश जगन्निवास॥४५॥ तथैवाहं त्वां किरीटिनं गदिनं चक्रहस्तं द्रष्टुमिच्छामि। तेनैव चतुर्भुजेन रूपेन भव, सहस्रबाहो विश्वमूर्ते॥४६॥

श्रीभगवानुवाच।

अर्जुन, प्रसन्नेन मयात्मयोगादिदं परं रूपं तव [तुभ्यमित्यर्थः] दर्शितं, यन्मे तेजोमयं विश्वमनन्तमाद्यं [रूपं] त्वदन्येन न दृष्टपूर्वम्॥४७॥ न वेदयज्ञाध्ययनैः, न दानैः, न क्रियाभिः, न चोग्रैस्तपोभिरहमेवंरूपो नृलोके त्वदन्येन द्रष्टुं शक्यः, कुरुप्रवीर॥४८॥ इदं ममेदृग्घोरं रूपं दृष्ट्वा, ते व्यथा मा [अस्तु], विमूढभावश्च मा [अस्तु]। त्वं व्यपेतभीः प्रीतमनाः पुनस्तदेव मे रूपमिदं प्रपश्य॥४९॥

सञ्जय उवाच।

इति तथा वासुदेवोऽर्जुनमुक्त्वा, स्वकं रूपं भूयो दर्शयामास। महात्मा च सौम्यवपुः पुनर्भूत्वा, एनं भीतमाश्वासयामास॥५०॥

अर्जुन उवाच।

जनार्दन, इदं तव सौम्यं मानुषं रूपं दृष्ट्वा, इदानीं सचेताः संवृत्तः प्रकृतिं [च] गतोऽस्मि॥५१॥

श्रीभगवानुवाच।

यदिदं मम सुदुर्दर्शं रूपं दृष्टवानसि, देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः॥५२॥ यथा मां दृष्टवानसि, एवंविधोऽहं न वेदैः, न तपसा, न दानेन, न चेज्यया दृष्टुं शक्यः॥५३॥ अर्जुन परन्तप, अनन्यया तु भक्त्यैवंविधोऽहं तत्त्वेन ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः ॥५४॥ यो मत्कर्मकृत्, मत्परमः, मद्भक्तः, सङ्गवर्जितः, सर्वभूतेषु निर्वैरः [च], स मामेति, पाण्डव॥५५॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नामैकादशोऽध्यायः॥११॥

# अथ द्वादशोऽध्यायः

अर्जुन उवाच।

य एवं सततयुक्ता भक्तास्त्वां पर्युपासते, ये चाप्यव्यक्तमक्षरम् [त्वां पर्युपासते], तेषां के योगवित्तमाः॥१॥

श्रीभगवानुवाच।

ये मयि मन आवेश्य, नित्ययुक्ताः, परया श्रद्धयोपेता मामुपासते, ते युक्ततमा मे मताः॥२॥ ये त्वनिर्देश्यमव्यक्तं सर्वत्रगमचिन्त्यं कूटस्थमचलं ध्रुवं चाक्षरं पर्युपासते, [ये] इन्द्रियग्रामं सन्नियम्य, सर्वत्र समबुद्धयः, सर्वभूतहिते रताः — ते मामेव प्राप्नुवन्ति॥३–४॥ तेषामव्यक्तासक्तचेतसां क्लेशोऽधिकतरः [स्यात्], देहवद्भिर्हि (=यस्मात्) अव्यक्ता गतिर्दुःखमवाप्यते॥५॥ पार्थ, ये तु सर्वाणि कर्माणि मयि सन्न्यस्य, मत्पराः, अनन्येनैव योगेन मां ध्यायन्त उपासते, तेषां मय्यावेशितचेतसामहं मृत्युसंसारसागरात्समुद्धर्ता नचिराद्भवामि॥६–७॥

मय्येव मन आधत्स्व। मयि बुद्धिं निवेशय। अत ऊर्ध्वं मय्येव निवसिष्यसि, न संशयः॥८॥ अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततोऽभ्यासयोगेन मामाप्तुमिच्छ, धनञ्जय॥९॥ [अथ] अभ्यासेऽप्यासमर्थोऽसि, मत्कर्मपरमो भव। कर्माणि मदर्थं कुर्वन्नपि सिद्धिमवाप्स्यसि॥१०॥ अथ मद्योगमाश्रित एतदपि कर्तुमशक्तोऽसि, ततो यतात्मवान् [सन्] सर्वकर्मफलत्यागं कुरु॥११॥ अभ्यासाज्ज्ञानं श्रेयो हि, ज्ञानाद्ध्यानं विशिष्यते, ध्यानात्कर्मफलत्यागः [विशिष्यते]। त्यागाच्छान्तिरनन्तरम् [स्यात्]॥१२॥

सर्वभूतानामद्वेष्टा, मैत्रः, करुण एव च, निर्ममः, निरहङ्कारः, समदुखसुखः, क्षमी, सन्तुष्टः सततं योगी, यतात्मा, दृढनिश्चयः, मय्यर्पितमनोबुद्धिः, यः [ईदृक्] मद्भक्तः, स मे प्रियः॥१३–१४॥ यस्माल्लँोकः नोद्विजते, यश्च लोकान्नोद्विजते, यश्च हर्षामर्षभयोद्वेगैर्मुक्तः, स मे प्रियः॥१५॥ अनपेक्षः, शुचिः, दक्षः, उदासीनः, गतव्यथः, सर्वारम्भपरित्यागी, यः [ईदृक्] मद्भक्तः, स मे प्रियः॥१६॥ यो न हृष्यति, न द्वेष्टि, न शोचति, न काङ्क्षति, शुभाशुभपरित्यागी, यः [ईदृक्] भक्तिमान्, स मे प्रियः॥१७॥ [यः] शत्रौ च मित्रे च तथा मानापमानयोः समः, शीतोष्णसुखदुःखेषु समः, सङ्गविवर्जितः, तुल्यनिन्दास्तुतिः, मौनी, येन केनचित्सन्तुष्टः, अनिकेतः, स्थिरमतिः, [ईदृक्] भक्तिमान्, [सः] नरो मे प्रियः॥१८–१९॥ ये तु यथोक्तमिदं धर्म्यामृतं पर्युपासते, श्रद्दधानाः, मत्परमाः, [ईदृशः] भक्तास्ते मेऽतीव प्रियाः॥२०॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः॥१२॥

# ओम् अथ त्रयोदशोऽध्यायः

अर्जुन उवाच।

प्रकृतिं पुरुषमेव च, क्षेत्रं क्षेत्रज्ञमेव च, ज्ञानं ज्ञेयं च, एतद्वेदितुमिच्छामि, केशव॥

श्रीभगवानुवाच।

कौन्तेय, इदं शरीरं क्षेत्रमित्यभिधीयते। य एतद्वेत्ति, तं तद्विदः क्षेत्रज्ञ इति प्राहुः॥१॥ सर्वक्षेत्रेष्वपि च मां क्षेत्रज्ञं विद्धि, भारत। क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं, तज्ज्ञानं मम मतम्॥२॥

यत्तत्क्षेत्रं, यादृक्च, यद्विकारि च, यतश्च यद्, यश्च सः, यत्प्रभावश्च — तत्समासेन मे शृणु॥३॥ ऋषिभिर्विविधैश्छन्दोभिः, विनिश्चितैर्हेतुमद्भिर्ब्रह्मसूत्रपदैरेव च बहुधा पृथग्गीतम्॥४॥ महाभूतानि, अहङ्कारः, बुद्धिः, अव्यक्तमेव च, दशेन्द्रियाणि, एकं च [मनः], पञ्च चेन्द्रियगोचराः, इच्छा, द्वेषः, सुखं, दुःखं, सङ्घातः, चेतना, धृतिः — एतत्क्षेत्रं सविकारं समासेनोदाहृतम्॥५–६॥

[यज्ज्ञानमिति—] अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनं, शौचं, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहङ्कार एव च, जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥७–८॥ [किं च] असक्तिः, पुत्रदारगृहादिष्वनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु च नित्यं समचित्तत्वं, मय्यनन्ययोगेन चाव्यभिचारिणी भक्तिः, विविक्तदेशसेवित्वं, जनसंसद्यरतिः, अध्यात्मज्ञाननित्यत्वं, तत्त्वज्ञानार्थदर्शनम् — एतज्ज्ञानमिति प्रोक्तं, यदतोऽन्यथाज्ञानम्॥९–११॥

यज्ज्ञेयं तत्प्रवक्ष्यामि। यज्ज्ञात्वामृतमश्नुते, तदनादिमत्परं ब्रह्म, न सन्नासदुच्यते॥१२॥ सर्वमावृत्य तल्लोके सर्वतःपाणिपादं सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमंस्तिष्ठति॥१३॥ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्, असक्तं सर्वभृदेव च, निर्गुणं गुणभोक्तृ च॥१४॥ भूतानां बहिरन्तश्च, चरमचरमेव च। सूक्ष्मत्वात्तदविज्ञेयं। तद्दूरस्थं चान्तिके च॥१५॥

भूतेषु चाविभक्तं विभक्तमिव च स्थितं, भूतभर्तृ ग्रसिष्णु च प्रभविष्णु च तज्ज्ञेयम्॥१६॥ तज्ज्योतिषामपि ज्योतिः, तमसः परमुच्यते। [तद्] ज्ञानं ज्ञेयं ज्ञानगम्यम्। [तद्] सर्वस्य हृदि विष्ठितम्॥१७॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं च समासत उक्तम्। एतद्विज्ञाय, मद्भक्तो मद्भावायोपपद्यते॥१८॥

प्रकृतिं पुरुषमेव चोभौ अप्यनादी विद्धि। गुणांश्च विकारानेव च प्रकृतिसम्भवान्विद्धि॥१९॥ प्रकृतिः कार्यकरणकर्तृत्वे हेतुरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥२०॥ प्रकृतिस्थो हि (=यस्मात्) पुरुषः प्रकृतिजान्गुणान्भुङ्क्ते। सदसद्योनिजन्मसु कारणमस्य गुणसङ्गः॥२१॥ अस्मिन्देहे पुरुषः परः, उपद्रष्टा, अनुमन्ता च, भर्ता, भोक्ता, महेश्वरः, परमात्मा चेत्यप्युक्तः॥२२॥ य एवं पुरुषं गुणैः सह प्रकृतिं च वेत्ति, स सर्वथा वर्तमानोऽपि भूयो नाभिजायते॥२३॥

केचिद्ध्यानेन (=श्रवणमनननिदिध्यासनेन) आत्मन्यात्मनात्मानं पश्यन्ति, अन्ये साङ्ख्येन योगेन (=श्रवणेनैव), अपरे (=कर्मयोगिनः) च कर्मयोगेन॥२४॥ अन्ये त्वेवमजानन्तोऽन्येभ्यः श्रुत्वोपासते। तेऽपि च श्रुतिपरायणा मृत्युमतितरन्त्येव॥२५॥

यावत्किञ्चित्सत्त्वं स्थावरजङ्गमं सञ्जायते, तत्क्षेत्रक्षेत्रज्ञसंयोगाद्विद्धि, भरतर्षभ॥२६॥ यः परमेश्वरं सर्वेषु भूतेषु समं तिष्ठन्तं, विनश्यत्सु [च] अविनश्यन्तं पश्यति, स पश्यति॥२७॥ ईश्वरं हि (=यस्मात्) सर्वत्र समं समवस्थितं पश्यन्, आत्मनात्मानं न हिनस्ति, ततः परां गतिं याति॥२८॥ यश्च कर्माणि प्रकृत्यैव सर्वशः क्रियमाणानि, तथात्मानमकर्तारं पश्यति, स पश्यति॥२९॥ यदा भूतपृथग्भावमेकस्थं, तत एव च विस्तारमनुपश्यति, तदा ब्रह्म सम्पद्यते॥३०॥ कौन्तेय, अनादित्वान्निर्गुणत्वादयमव्ययः परमात्मा शरीरस्थोऽपि न करोति, न लिप्यते॥३१॥ यथा सर्वगतमाकाशं सौक्ष्म्यान्नोपलिप्यते, तथा सर्वत्र देहेऽवस्थित आत्मा नोपलिप्यते॥३२॥ यथैको रविरिमं कृत्स्नं लोकं प्रकाशयति, तथा क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति, भारत॥३३॥ य एवं क्षेत्रक्षेत्रज्ञयोरन्तरं, भूतप्रकृतिमोक्षं च ज्ञानचक्षुषा विदुः, ते परं यान्ति॥३४॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः॥१३॥

# अथ चतुर्दशोऽध्यायः

श्रीभगवानुवाच।

ज्ञानानामुत्तमं परं ज्ञानं भूयः प्रवक्ष्यामि, यज्ज्ञात्वा सर्वे मुनय इतः परां सिद्धिं गताः॥१॥ इदं ज्ञानमुपाश्रित्य, मम साधर्म्यमागताः सर्गेऽपि नोपजायन्ते, प्रलये न च व्यथन्ति॥२॥ मम योनिर्महद् ब्रह्म। तस्मिन्नहं गर्भं दधामि। ततः सर्वभूतानां सम्भवो भवति, भारत॥३॥ कौन्तेय, सर्वयोनिषु या मूर्तयः सम्भवन्ति, तासां योनिर्महद् ब्रह्म, अहं बीजप्रदः पिता॥४॥

महाबाहो, सत्त्वं रजस्तम इति प्रकृतिसम्भवा गुणा देहेऽव्ययं देहिनं निबध्नन्ति॥५॥ तत्र निर्मलत्वात्प्रकाशकमनामयं सत्त्वं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति, अनघ॥६॥ रागात्मकं रजः तृष्णासङ्गसमुद्भवं विद्धि। कौन्तेय, तत्कर्मसङ्गेन देहिनं निबध्नाति॥७॥ तमस्त्वज्ञानजं सर्वदेहिनां मोहनं विद्धि। तत्प्रमादालस्यनिद्राभिर्निबध्नाति, भारत॥८॥ भारत, सत्त्वं सुखे सञ्जयति, रजः कर्मणि, तमस्तु ज्ञानमावृत्य प्रमादे सञ्जयत्युत॥९॥ भारत, रजस्तमश्चाभिभूय सत्त्वं भवति, सत्त्वं तमश्चैव रजः, तथा सत्त्वं रजः [च] तमः॥१०॥ यदास्मिन्देहे सर्वद्वारेषु ज्ञानं प्रकाश उपजायते, तदा सत्त्वं विवृद्धमिति विद्यादुत॥११॥ लोभः, प्रवृत्तिः, कर्मणामारम्भः, अशमः, स्पृहा — एतानि रजसि विवृद्धे जायन्ते, भरतर्षभ॥१२॥ अप्रकाशोऽप्रवृत्तिश्च, प्रमादो मोह एव च — एतानि तमसि विवृद्धे जायन्ते, कुरुनन्दन॥१३॥ यदा तु सत्त्वे प्रवृद्धे देहभृत्प्रलयं याति, तदोत्तमविदाममलाँल्लोकान्प्रतिपद्यते॥१४॥ रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा तमसि प्रलीनो मूढयोनिषु जायते॥१५॥ सुकृतस्य कर्मणो निर्मलं सात्त्विकं फलम् [इति] आहुः, रजसस्तु दुःखं फलं, तमसोऽज्ञानं फलम्॥१६॥ सत्त्वाज्ज्ञानं सञ्जायते, रजसो लोभ एव च। तमसः प्रमादमोहौ भवतोऽज्ञानमेव च॥१७॥ सत्त्वस्था ऊर्ध्वं गच्छन्ति। राजसा मध्ये तिष्ठन्ति। जघन्यगुणवृत्तस्थास्तामसा अधो गच्छन्ति॥१८॥ यदा द्रष्टा न गुणेभ्योऽन्यं कर्तारमनुपश्यति, गुणेभ्यश्च परं वेत्ति, [तदा] स मद्भावमधिगच्छति॥१९॥ एतान्देहसमुद्भवांस्त्रीन्गुणानतीत्य, जन्ममृत्युजरादुःखैर्विमुक्तो देह्यमृतमश्नुते॥२०॥

अर्जुन उवाच।

कैर्लिङ्गैरेतांस्त्रीन्गुणानतीतो भवति, प्रभो। किमाचारः। कथं चैतांस्त्रीन्गुणानतिवर्तते॥२१॥

श्रीभगवानुवाच।

पाण्डव, [यः] प्रकाशं च प्रवृत्तिं च मोहमेव च सम्प्रवृत्तानि न द्वेष्टि, निवृत्तानि न काङ्क्षति, य उदासीनवदासीनो गुणैर्न विचाल्यते, यः "गुणा वर्तन्ते" इत्येवावतिष्ठति, नेङ्गते, समदुःखसुखः, स्वस्थः, समलोष्टाश्मकाञ्चनः, तुल्यप्रियाप्रियः, धीरः, तुल्यनिन्दात्मसंस्तुतिः, मानापमानयोस्तुल्यः, मित्रारिपक्षयोस्तुल्यः, सर्वारम्भपरित्यागी — स गुणातीत उच्यते॥२२–२५॥ यश्च मामव्यभिचारेण भक्तियोगेन सेवते, स एतान्गुणान्समतीत्य ब्रह्मभूयाय कल्पते॥२६॥ अमृतस्य हि (=यस्मात्), अव्ययस्य च, शाश्वतस्य, धर्मस्य च, सुखस्य, ऐकान्तिकस्य च ब्रह्मणः प्रतिष्ठाहम्॥२७॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः॥१४॥

# अथ पञ्चदशोऽध्यायः

श्रीभगवानुवाच।

ऊर्ध्वमूलम् [उत्कृष्टमूलमित्यर्थः], अधःशाखम् [निकृष्टशाखमित्यर्थः], अव्ययमश्वत्थं प्राहुः, छन्दांसि यस्य पर्णानि। यस्तं वेद, स वेदविद्॥१॥ तस्य शाखा अध ऊर्ध्वं च प्रसृताः, गुणप्रवृद्धाः, विषयप्रवालाः। अधश्चानुसन्ततानि मूलानि मनुष्यलोके कर्मानुबन्धीनि॥२॥ इह तथास्य रूपं नोपलभ्यते, नान्तः, न चादिः, न च सम्प्रतिष्ठा। सुविरूढमूलमेनमश्वत्थं दृढेनासङ्गशस्त्रेण च्छित्त्वा, ततो यस्मिन्गता भूयो न निवर्तन्ति, तत्पदं परिमार्गितव्यम्। "यतः पुराणी प्रवृत्तिः प्रसृता, तमेव चाद्यं पुरुषं प्रपद्ये" [इति]॥३–४॥ निर्मानमोहाः, जितसङ्गदोषाः, अध्यात्मनित्याः, विनिवृत्तकामाः, सुखदुःखसञ्ज्ञैर्द्वन्द्वैर्विमुक्ताः, अमूढास्तदव्ययं पदं गच्छन्ति॥५॥ न सूर्यो न शशाङ्को न पावकस्तद्भासयते, यद्गत्वा न निवर्तन्ते। तन्मम परमं धाम॥६॥

ममैवांशः सनातनो जीवलोके जीवभूतः प्रकृतिस्थानि मनःषष्ठानीन्द्रियाणि कर्षति॥७॥ यदीश्वरः शरीरमवाप्नोति, यच्चाप्युत्क्रामति, एतानि गृहीत्वा संयाति, वायुराशयात्गन्धानिव॥८॥ श्रोत्रं, चक्षुः, स्पर्शनं, रसनं च, घ्राणमेव च, मनश्चाधिष्ठाय, अयं [ईश्वरो जीवभूतः] विषयानुपसेवते॥९॥ विमूढा उत्क्रामन्तं स्थितं वापि, भुञ्जानं गुणान्वितं वा नानुपश्यन्ति। ज्ञानचक्षुषः पश्यन्ति॥१०॥ यतन्तो योगिनश्चैनमात्मन्यवस्थितं पश्यन्ति। यतन्तोऽप्यकृतात्मानोऽचेतसः [च] एनं न पश्यन्ति॥११॥

यदादित्यगतं तेजोऽखिलं जगद्भासयते, यच्चन्द्रमसि, यच्चाग्नौ — तत्तेजो मामकं विद्धि॥१२॥ अहं च गामाविश्य भूतान्योजसा धारयामि। रसात्मकश्च सोमो भूत्वा सर्वा ओषधीः पुष्णामि॥१३॥ अहं प्राणिनां देहमाश्रितः प्राणापानसमायुक्तो वैश्वानरो भूत्वा चतुर्विधमन्नं पचामि॥१४॥ अहं च सर्वस्य हृदि सन्निविष्टः। मत्तः स्मृतिर्ज्ञानमपोहनं च। सर्वैर्वेदैश्चाहमेव वेद्यः। अहमेव वेदान्तकृद्वेदविच्च॥१५॥

लोक इमौ द्वौ पुरुषौ — क्षरश्चाक्षर एव च। सर्वाणि भूतानि क्षरः, कूटस्थोऽक्षर उच्यते॥१६॥ अन्यस्त्वुत्तमः पुरुषः परमात्मेत्युदाहृतः, योऽव्यय ईश्वरो लोकत्रयमाविश्य बिभर्ति॥१७॥ यस्मादहं क्षरमतीतः, अक्षरादपि चोत्तमः, अतो लोके वेदे च पुरुषोत्तमः [इति] प्रथितोऽस्मि॥१८॥ य एवमसम्मूढो मां पुरुषोत्तमं जानाति, स सर्ववित्सर्वभावेन मां भजति, भारत॥१९॥ इति मयेदं गुह्यतमं शास्त्रमुक्तम्, अनघ। एतद्बुद्ध्वा बुद्धिमान्कृतकृत्यश्च स्यात्, भारत॥२०॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥१५॥

# अथ षोडशोऽध्यायः

श्रीभगवानुवाच।

अभयं, सत्त्वसंशुद्धिः, ज्ञानयोगव्यवस्थितिः, दानं, दमश्च, यज्ञश्च, स्वाध्यायः, तपः, आर्जवम्, अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, अपैशुनं, भूतेषु दया, अलोलुप्त्वं, मार्दवं, ह्रीः, अचापलं, तेजः, क्षमा, धृतिः, शौचम्, अद्रोहः, नातिमानिता — दैवीं सम्पदमभिजातस्य भवन्ति, भारत॥१–३॥ पार्थ, दम्भो दर्पोऽभिमानश्च, क्रोधः पारुष्यमेव च, अज्ञानं च — आसुरीं सम्पदमभिजातस्य॥४॥ दैवी सम्पद्विमोक्षाय, आसुरी निबन्धाय मता। मा शुचः, दैवीं सम्पदमभिजातोऽसि, पाण्डव॥५॥ अस्मिँल्लोके द्वौ भूतसर्गौ दैव आसुर एव च। पार्थ, दैवो विस्तरशः प्रोक्तः, आसुरं मे शृणु॥६॥

आसुरा जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। तेषु न शौचं, नाप्याचारः, न च सत्यं विद्यते॥७॥ जगदसत्यम्, अप्रतिष्ठम्, अनीश्वरम्, कामहैतुकमपरस्परसम्भूतं किमन्यद् [इति] त आहुः॥८॥ एतां दृष्टिमवष्टभ्य, नष्टात्मानः, अल्पबुद्धयः, उग्रकर्माणः, अहिता जगतः क्षयाय प्रभवन्ति॥९॥ दुष्पूरं काममाश्रित्य, दम्भमानमदान्विताः, मोहादसद्ग्राहान्गृहीत्वा, अशुचिव्रताः प्रवर्तन्ते॥१०॥ प्रलयान्तां चापरिमेयां चिन्तामुपाश्रिताः, कामोपभोगपरमाः, “एतावत्”

इति निश्चिताः, आशापाशशतैर्बद्धाः, कामक्रोधपरायणाः, कामभोगार्थमन्यायेनार्थसञ्चयानीहन्ते॥११–१२॥ “अद्य मयेदं लब्धम्, इदं मनोरथं प्राप्स्ये। इदमस्ति, पुनर्म इदमपि धनं भविष्यति॥१३॥ मयासौ शत्रुर्हतः, अपरांश्चापि हनिष्ये। अहमीश्वरः। अहं भोगी। अहं सिद्धो बलवान्सुखी॥१४॥ आढ्योऽभिजनवान् [च] अस्मि। कोऽन्यो मया सदृशोऽस्ति। यक्ष्ये दास्यामि मोदिष्ये।” इत्यज्ञानविमोहिताः॥१५॥ अनेकचित्तविभ्रान्ताः, मोहजालसमावृताः, कामभोगेषु प्रसक्ता अशुचौ नरके पतन्ति॥१६॥ आत्मसम्भाविताः, स्तब्धाः, धनमानमदान्वितास्ते दम्भेनाविधिपूर्वकं नामयज्ञैर्यजन्ते॥१७॥ [ये] अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः, आत्मपरदेहेषु मां प्रद्विषन्तः, अभ्यसूयकाः — तान्द्विषतः क्रूरान्नराधमानशुभानहं संसारेष्वासुरीष्वेव योनिष्वजस्रं क्षिपामि॥१८–१९॥ कौन्तेय, मूढा जन्मनि जन्मन्यासुरीं योनिष्वापन्ना मामप्राप्यैव, ततोऽधमां गतिं यान्ति॥२०॥

कामः क्रोधस्तथा लोभ इदं त्रिविधं नरकस्य द्वारमात्मनो नाशनम्। तस्मादेतत्त्रयं त्यजेत्॥२१॥ कौन्तेय, एतैस्त्रिभिस्तमोद्वारैर्विमुक्तो नर आत्मनः श्रेय आचरति, ततः परां गतिं याति॥२२॥ यः शास्त्रविधिमुत्सृज्य कामकारतो वर्तते, स सिद्धिं नावाप्नोति, न सुखं, न परां गतिम्॥२३॥ तस्मात्कार्याकार्यव्यवस्थितौ शास्त्रं ते प्रमाणम्। शास्त्रविधानेक्तं ज्ञात्वा, इह कर्म कर्तुमर्हसि॥२४॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः॥१६॥

# अथ सप्तदशोऽध्यायः

अर्जुन उवाच।

कृष्ण, ये शास्त्रविधिमुत्सृज्य श्रद्धया त्वन्विता यजन्ते, तेषां का निष्ठा — सत्त्वं रज आहो तमः॥१॥

श्रीभगवानुवाच।

देहिनां सा स्वभावजा श्रद्धा सात्त्विकी राजसी च तामसी चेति त्रिविधैव भवति। तां शृणु॥२॥ सर्वस्य श्रद्धा सत्त्वानुरूपा भवति, भारत। अयं पुरुषः श्रद्धामयः। यो यच्छ्रद्धः, स एव सः॥३॥

सात्त्विका देवान्यजन्ते, राजसा यक्षरक्षांसि, अन्ये तामसा जनाः प्रेतान्भूतगणांश्च यजन्ते॥४॥ ये दम्भाहङ्कारसंयुक्ताः कामरागबलान्विता अचेतसो जनाः शरीरस्थं भूतग्राममन्तःशरीरस्थं मां चैव कर्शयन्तोऽशास्त्रविहितं घोरं तपस्तप्यन्ते, तानासुरनिश्चयान्विद्धि॥५–६॥

अपि तु सर्वस्याहारस्त्रिविधः प्रियो भवति, तथा यज्ञस्तपो दानं [च]। तेषामिमं भेदं शृणु॥७॥

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः, रस्याः, स्निग्धाः, स्थिराः, हृद्या आहाराः सात्त्विकप्रियाः॥८॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः, दुःखशोकामयप्रदा आहारा राजसस्येष्टाः॥९॥ यच्च यातयामं, गतरसं, पूति, पर्युषितं, उच्छिष्टम्, अमेध्यमपि च भोजनं तामसप्रियम्॥१०॥

"यष्टव्यमेव" इति मनः समाधायाफलाकाङ्क्षिभिर्यो विधिदृष्टो यज्ञ इज्यते, स सात्त्विकः॥११॥ भरतश्रेष्ठ, फलं त्वभिसन्धाय दम्भार्थमप्येव च यदिज्यते, तं यज्ञं राजसं विद्धि॥१२॥ विधिहीनम्, असृष्टान्नं, मन्त्रहीनम्, अदक्षिणं, श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥१३॥

देवद्विजगुरुप्राज्ञपूजनं, शौचम्, आर्जवं, ब्रह्मचर्यम्, अहिंसा च शारीरं तप उच्यते॥१४॥ यदनुद्वेगकरं सत्यं प्रियहितं च वाक्यं, स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥१५॥ मनःप्रसादः, सौम्यत्वं, मौनं, आत्मविनिग्रहः, भावसंशुद्धिरित्येतन्मानसं तप उच्यते॥१६॥ अफलाकाङ्क्षिभिर्युक्तैर्नरैः परया श्रद्धया तप्तं तत्त्रिविधं तपः सात्त्विकं परिचक्षते॥१७॥ सत्कारमानपूजार्थं दम्भेन चैव यत्तपः क्रियते, तदिह चलमध्रुवं राजसं प्रोक्तम्॥१८॥ मूढग्राहेणात्मनः पीडया परस्योत्सादनार्थं वा यत्तपः क्रियते, तत्तामसमुदाहृतम्॥१९॥

दातव्यमित्यनुपकारिणे देशे काले च पात्रे च यद्दानं दीयते, तद्दानं सात्त्विकं स्मृतम्॥२०॥ प्रत्युपकारार्थं तु फलमुद्दिश्य वा पुनः, परिक्लिष्टं च यद्दीयते, तद्दानं राजसं स्मृतम्॥२१॥ अदेशकालेऽपात्रेभ्यश्च, असत्कृतमवज्ञातं यद्दानं दीयते, तत्तामसमुदाहृतम्॥२२॥

"ओं तत्सत्" इति ब्रह्मणस्त्रिविधो निर्देशः स्मृतः। तेन ब्राह्मणा वेदाश्च यज्ञाश्च पुरा विहिताः॥२३॥ तस्मात् "ओम्" इत्युदाहृत्य ब्रह्मवादिनां विधानोक्ता यज्ञदानतपःक्रियाः सततं प्रवर्तन्ते॥२४॥ "तद्" इति फलमनभिसन्धाय मोक्षकाङ्क्षिभिर्विविधा यज्ञतपःक्रिया दानक्रियाश्च क्रियन्ते॥२५॥ पार्थ, "सत्" इत्येतत्सद्भावे साधुभावे च प्रयुज्यते, तथा सच्छब्दः प्रशस्ते कर्मणि युज्यते॥२६॥ यज्ञे तपसि दाने च स्थितिः "सत्" इत्युच्यते च, तदर्थीयं च कर्मैव "सत्"

इत्येवाभिधीयते॥२७॥ पार्थ, अश्रद्धया हुतं दत्तं तपस्तप्तं च यत्कृतम् "असत्" इत्युच्यते, तन्न [अस्ति] च प्रेत्य नो इह॥२८॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः॥१७॥

# अथाष्टादशोऽध्यायः

अर्जुन उवाच।

हृषीकेश महाबाहो केशिनिषूदन, सन्न्यासस्य त्यागस्य च पृथक्तत्त्वं वेदितुमिच्छामि॥१॥

श्रीभगवानुवाच।

कवयः काम्यानां कर्मणां न्यासं सन्न्यासं विदुः। विचक्षणाः सर्वकर्मफलत्यागं त्यागं प्राहुः॥२॥ एके मनीषिणः "कर्म दोषवत्त्याज्यम्" इति प्राहुः। अपरे च "यज्ञदानतपःकर्म न त्याज्यम्" इति॥३॥ तत्र त्यागे मे निश्चयं शृणु, भरतसत्तम। पुरुषव्याघ्र, त्यागो हि त्रिविधः सम्प्रकीर्तितः॥४॥ यज्ञदानतपःकर्म न त्याज्यं, तत्कार्यमेव। यज्ञो दानं तपश्चैव मनीषिणां पावनानि॥५॥ पार्थ, एतानि कर्माण्यपि तु सङ्गं फलानि च त्यक्त्वा कर्तव्यानीति मे निश्चितमुत्तमं मतम्॥६॥ नियतस्य कर्मणस्तु सन्न्यासो नोपपद्यते, मोहात्तस्य परित्यागस्तामसः परिकीर्तितः॥७॥ यद्दुःखमित्येव कायक्लेशभयात्कर्म त्यजेत्, स राजसं त्यागं कृत्वा त्यागफलं नैव लभेत्॥८॥ अर्जुन, यत्सङ्गं फलं चैव त्यक्त्वा नियतं कर्म "कार्यम्" इत्येव क्रियते, स त्यागः सात्त्विको मतः॥९॥ सत्त्वसमाविष्टो मेधावी छिन्नसंशयस्त्याग्यकुशलं कर्म न द्वेष्टि, कुशले नानुषज्जते॥१०॥ देहभृता हि (=यस्मात्) कर्माण्यशेषतस्त्यक्तुं न शक्यम्, यस्तु कर्मफलत्यागी, स त्यागीत्यभिधीयते॥११॥ अत्यागिनां प्रेत्यानिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवति। सन्न्यासिनां तु क्वचिन्न॥१२॥

महाबाहो, साङ्ख्ये कृतान्ते प्रोक्तान्येतानि सर्वकर्मणां सिद्धये पञ्च कारणानि मे निबोध॥१३॥ अधिष्ठानं, तथा कर्ता, पृथग्विधं च करणं, विविधाश्च पृथक्चेष्टाः, अत्र पञ्चमं दैवं चैव॥१४॥ नरः शरीरवाङ्मनोभिर्यन्न्याय्यं वा विपरीतं वा कर्म प्रारभते, तस्यैते पञ्च हेतवः॥१५॥ एवं तत्र सत्यकृतबुद्धित्वाद्य आत्मानं केवलं तु कर्तारं पश्यति, स दुर्मतिर्न पश्यति॥१६॥ यस्याहङ्कृतो भावो न [अस्ति], यस्य बुद्धिर्न लिप्यते, स इमाल्ँलोकान्हत्वापि न हन्ति न निबध्यते॥१७॥

ज्ञानं ज्ञेयं परिज्ञाता [इति] त्रिविधा कर्मचोदना। करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः॥१८॥ गुणसङ्ख्याने ज्ञानं कर्म च कर्ता च [इति] गुणभेदतस्त्रिधैव प्रोच्यते। तान्यपि यथावच्छृणु॥१९॥ येन विभक्तेषु सर्वभूतेष्वेकमव्ययमविभक्तं भावमीक्षते, तज्ज्ञानं सात्त्विकं विद्धि॥२०॥ यत्तु ज्ञानं सर्वेषु भूतेषु पृथग्विधान्नानाभावान्पृथक्त्वेन वेत्ति, तज्ज्ञानं राजसं विद्धि॥२१॥ यत्त्वेकस्मिन्कार्ये कृत्स्नवत्सक्तं, [यद्] अहैतुकमतत्त्वार्थवदल्पं च, तद् [ज्ञानं] तामसमुदाहृतम्॥२२॥ यन्नियतं कर्म सङ्गरहितमरागद्वेषतोऽफलप्रेप्सुना कृतं, तत्सात्त्विकमुच्यते॥२३॥ कामेप्सुना तु साहङ्कारेण वा पुनर्बहुलायासं यत्कर्म क्रियते, तद्राजसमुदाहृतम्॥२४॥ अनुबन्धं क्षयं हिंसां पौरुषं चानपेक्ष्य मोहाद्यत्कर्मारभ्यते, तत्तामसमुच्यते॥२५॥ मुक्तसङ्गः, अनहंवादी, धृत्युत्साहसमन्वितः, सिद्ध्यसिद्ध्योर्निर्विकारः [च] कर्ता सात्त्विक उच्यते॥२६॥ रागी, कर्मफलप्रेप्सुः, लुब्धः, हिंसात्मकः, अशुचिः, हर्षशोकान्वितः [च] कर्ता राजसः परिकीर्तितः॥२७॥ अयुक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अलसः, विषादी, दीर्घसूत्री च कर्ता तामस उच्यते॥२८॥

बुद्धेर्धृतेश्चैव गुणतस्त्रिविधं भेदं पृथक्त्वेनाशेषेण प्रोच्यमानं शृणु, धनञ्जय॥२९॥ पार्थ, या प्रवृत्तिं च निवृत्तिं च, कार्याकार्ये, भयाभये, बन्धं मोक्षं च वेत्ति, सा बुद्धि सात्त्विकी॥३०॥ पार्थ, यया धर्ममधर्मं च, कार्यं चाकार्यं चैवायथावत्प्रजानाति, सा बुद्धिर्राजसी॥३१॥ पार्थ, या तमसावृताधर्मं धर्ममिति, सर्वार्थांश्च विपरीतान्मन्यते, सा बुद्धिस्तामसी॥३२॥ पार्थ, यया धृत्याव्यभिचारिण्या योगेन मनःप्राणेन्द्रियक्रिया धारयते, सा धृतिः सात्त्विकी॥३३॥ अर्जुन पार्थ, यया तु धृत्या फलाकाङ्क्षी प्रसङ्गेन धर्मकामार्थान्धारयते, सा धृतिर्राजसी॥३४॥ पार्थ, यया दुर्मेधाः स्वप्नं भयं शोकं विषादं मदमेव च न विमुञ्चति, सा धृतिस्तामसी॥३५॥

भरतर्षभ, इदानीं तु त्रिविधं सुखं मे शृणु। यत्राभ्यासाद्रमते, दुःखान्तं च निगच्छति, यत्तदग्रे विषमिव परिणामेऽमृतोपमम् [भवति], आत्मबुद्धिप्रसादजम्, तत्सुखं सात्त्विकं प्रोक्तम्॥३६–३७॥ यत्तद्विषयेन्द्रियसंयोगात्, अग्रेऽमृतोपमं परिणामे विषमिव [भवति], तत्सुखं राजसं स्मृतम्॥३८॥ यच्च सुखं निद्रालस्यप्रमादोत्थमग्रेऽनुबन्धे चात्मनो मोहनं, तत्तामसमुदाहृतम्॥३९॥

पृथिव्यां दिवि वा देवेषु वा पुनस्तत्सत्त्वं नास्ति, यदेभिः प्रकृतिजैस्त्रिभिर्गुणैर्मुक्तं स्यात्॥४०॥ परन्तप, ब्राह्मणक्षत्रियविशां शूद्राणां च कर्माणि स्वभावप्रभवैर्गुणैः प्रविभक्तानि॥४१॥ शमो दमस्तपः शौचं क्षान्तिरार्जवं ज्ञानं विज्ञानमास्तिक्यमेव च स्वभावजं ब्रह्मकर्म॥४२॥ शौर्यं, तेजः, धृतिः, दाक्ष्यं, युद्धे चाप्यपलायनं, दानम्, ईश्वरभावश्च

स्वभावजं क्षात्रं कर्म॥४३॥ कृषिगौरक्ष्यवाणिज्यं स्वभावजं वैश्यकर्म। परिचर्यात्मकमपि स्वभावजं शूद्रस्य कर्म॥४४॥

स्वे स्वे कर्मण्यभिरतो नरः संसिद्धिं लभते। यथा स्वकर्मनिरतः सिद्धिं विन्दति, तच्छृणु॥४५॥ यतो भूतानां प्रवृत्तिः, येनेदं सर्वं ततं, तं स्वकर्मणाभ्यर्च्य, मानवः सिद्धिं विन्दति॥४६॥ विगुणः स्वधर्मः स्वनुष्ठितात्परधर्माच्छ्रेयान्। स्वभावनियतं कर्म कुर्वन्, किल्बिषं नाप्नोति॥४७॥ कौन्तेय, सदोषमपि सहजं कर्म न त्यजेत्, सर्वारम्भा हि (=यस्मात्) दोषेणावृता धूमेनग्निरिव॥४८॥ सर्वत्रासक्तबुद्धिर्जितात्मा विगतस्पृहः सन्न्यासेन परमां नैष्कर्म्यसिद्धिमधिगच्छति॥४९॥

कौन्तेय, यथा सिद्धिं प्राप्तो ब्रह्माप्नोति, या ज्ञानस्य परा निष्ठा, तथा समासेनैव मे निबोध॥५०॥ विशुद्धया बुद्ध्या युक्तः, धृत्यात्मानं नियम्य च, शब्दादीन्विषयांस्त्यक्त्वा, रागद्वेषौ व्युदस्य च, विविक्तसेवी, लघ्वाशी, यतवाक्कायमानसः, नित्यं ध्यानयोगपरः, वैराग्यं समुपाश्रितः, अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं [च] विमुच्य, निर्ममः, शान्तः — ब्रह्मभूयाय कल्पते॥५१–५३॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति, सर्वेषु भूतेषु समः परां मद्भक्तिं लभते॥५४॥ [तया] भक्त्या मामभिजानाति, यावांस्तत्त्वतश्च योऽस्मि। ततो मां तत्त्वतो ज्ञात्वा, तदनन्तरं विशते॥५५॥ सर्वकर्माण्यपि सदा कुर्वाणः, मद्व्यपाश्रयः — मत्प्रसादाच्छाश्वतमव्ययं पदमवाप्नोति॥५६॥ चेतसा सर्वकर्माणि मयि सन्न्यस्य, मत्परः, बुद्धियोगमुपाश्रित्य सततं मच्चित्तो भव॥५७॥ मच्चित्तो मत्प्रसादात्सर्वदुर्गाणि तरिष्यसि।

अथ चेत्त्वमहङ्कारान्न श्रोष्यसि, विनङ्क्ष्यसि॥५८॥ यदहङ्कारमाश्रित्य "न योत्स्ये" इति मन्यसे, एष ते व्यवसायो मिथ्या। प्रकृतिस्त्वां नियोक्ष्यति॥५९॥ कौन्तेय, मोहाद्यत्कर्तुं नेच्छसि, तदवसोऽपि स्वभावजेन स्वेन कर्मणा निबद्धः करिष्यसि॥६०॥ अर्जुन, ईश्वरो मायया यन्त्रारूढानि [इव] सर्वभूतानि भ्रामयन्, सर्वभूतानां हृद्देशे तिष्ठति॥६१॥ सर्वभावेन तमेव शरणं गच्छ, भारत। तत्प्रसादात्परां शान्तिं शाश्वतं स्थानं प्राप्स्यसि॥६२॥

इति मया गुह्याद्गुह्यतरं ज्ञानं त आख्यातम्। एतदशेषेण विमृश्य, यथेच्छसि तथा कुरु॥६३॥ मे सर्वगुह्यतमं परमं वचो भूयः शृणु। मे दृढमिष्टोऽसीति, ततस्ते हितं वक्ष्यामि॥६४॥ मन्मना मद्भक्तो मद्याजी भव। मां नमस्कुरु। मामेवैष्यसि। सत्यं, [अहं] ते प्रतिजाने, मे प्रियोऽसि॥६५॥

सर्वधर्मान्परित्यज्य, मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि। मा शुचः॥६६॥

इदं ते [प्रोक्तम्] अतपस्काय न कदाचन वाच्यं, नाभक्ताय, न चाशुश्रूषवे, न च यो मामभ्यसूयति॥६७॥ य इमं परमं गुह्यं [संवादरूपं ग्रन्थं] मद्भक्तेष्वभिधास्यति, मयि परां भक्तिं कृत्वा मामेवैष्यति। असंशयः॥६८॥ मनुष्येषु च तस्मान्न कश्चिन्मे प्रियकृत्तमः, भुवि च तस्मान्नान्यो मे प्रियतरो भविता॥६९॥ यश्चेमावयोर्धर्म्यं संवादमध्येष्यते, तेन ज्ञानयज्ञेनाहमिष्टः स्यामिति मे मतिः॥७०॥ योऽपि श्रद्धावाननसूयश्च नरः शृणुयात्, सोऽपि मुक्तः पुण्यकर्मणां शुभाँल्लोकान्प्राप्नुयात्॥७१॥

पार्थ, कच्चिदेतत्त्वयैकाग्रेण चेतसैतच्छ्रुतम्। कच्चित्तेऽज्ञानसम्मोहः प्रनष्टः, धनञ्जय॥७२॥

अर्जुन उवाच।

नष्टो मोहः। मया त्वत्प्रसादात्स्मृतिर्लब्धा, अच्युत। स्थितो गतसन्देहोऽस्मि। तव वचनं करिष्ये॥७३॥

सञ्जय उवाच।

इत्यहं वासुदेवस्य महात्मनः पार्थस्य चेममद्भुतं रोमहर्षणं संवादमश्रौषम्॥७४॥ अहं व्यासप्रसादादेतत्परं गुह्यम् [शास्त्रम्] योगं साक्षात्कथयतः स्वयं योगेश्वरात्कृष्णाच्छ्रुतवान्॥७५॥ राजन्, केशवार्जुनयोरिममद्भुतं पुण्यं संवादं संस्मृत्य संस्मृत्य, मुहुर्मुहुर्हृष्यामि च॥७६॥ राजन्, हरेश्च तदत्यद्भुतं रूपं संस्मृत्य संस्मृत्य, मे विस्मयो महान्। पुनः पुनश्च हृष्यामि॥७७॥ यत्र योगेश्वरः कृष्णो यत्र धनुर्धरः पार्थः, तत्र श्रीः, विजयः, भूतिः, ध्रुवा नीतिः [इति] मम मतिः॥७८॥

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसन्न्यासयोगो नामाष्टादशोऽध्यायः॥१८॥

# Key to Terms in *Devanāgarī*

This key provides the transliteration of the *Devanāgarī* terms (proper names or epithets are capitalized) that appear in the English portions of this book so that, if you are reading an unfamiliar term, you can be sure you are reading the *Devanāgarī* correctly. All the *Devanāgarī* terms are listed alphabetically by section or chapter *in which they first appear*. *Devanāgarī* has been retained for all proper names in the verses, so you will find all characters and locations in the list.

English suffixes that have been appended to *Devanāgarī* are not included; for example, उपासन (*upāsana*) is listed in the chapter-two vocabulary rather than उपासन-s. The plural *-s* is left off.

If a *Devanāgarī* term appears in a new form, the new form is included in the vocabulary list for the chapter. For example, you will find the neuter word ब्रह्मन् (*brahman*) in the Introduction vocabulary list and the masculine version ब्रह्मा (*Brahmā*) in the chapter-eight list. Note that this author prefers the non-capitalization of the important term *brahman* (capitalization is non-existent in the *Devanāgarī* script of the Sanskrit language). The reason for not capitalizing in this instance is to try to avoid thinking this term refers to a God (ब्रह्मा) or a special, unique philosophical entity (like a Ground of Being), rather than the intension of the original scriptures that this term should be how we understand the reality all around us.

Guidelines for using this appendix are included in the Using This Book section (see "Using Appendix 1").

## Contents


| | |
|---|---|
| अक्षर-ब्रह्म-योग | *Akṣara-brahma-yoga* |
| अर्जुन-विषाद-योग | *Arjuna-viṣāda-yoga* |
| कर्म-योग | *Karma-yoga* Action |
| क्षेत्र-क्षेत्रज्ञ-विभाग-योग | *Kṣetra-kṣetrajña-vibhāga-yoga* |
| गुण-त्रय-विभाग-योग | *Guṇa-traya-vibhāga-yoga* |

| | |
|---|---|
| ज्ञान-कर्म-सन्न्यास-योग | *Jñāna-karma-sannyāsa-yoga* |
| ज्ञान-विज्ञान-योग | *Jñāna-vijñāna-yoga* |
| दैवासुर-सम्पद्-विभाग-योग | *Daivāsura-sampad-vibhāga-yoga* |
| ध्यान-योग | *Dhyāna-yoga* |
| पुरुषोत्तम-योग | *Puruṣottama-yoga* |
| भक्ति-योग | *Bhakti-yoga* |
| मोक्ष-सन्न्यास-योग | *Mokṣa-sannyāsa-yoga* |
| राज-विद्या-राज-गुह्य-योग | *Rāja-vidyā-rāja-guhya-yoga* |
| विभूति-योग | *Vibhūti-yoga* |
| विश्व-रूप-दर्शन-योग | *Viśva-rūpa-darśana-yoga* |
| श्रद्धा-त्रय-विभाग-योग | *Śraddhā-traya-vibhāga-yoga* |
| सन्न्यास-योग | *Sannyāsa-yoga* |
| साङ्ख्य-योग | *Sāṅkhya-yoga* |

# Introduction

| | |
|---|---|
| अर्जुन | *Arjuna* |
| आत्मन् | *ātman* |
| आसन | *āsana* |
| कुरु | *Kuru* |
| कृष्ण | *Kṛṣṇa* |
| चित्त | *citta* |
| चित्त-वृत्ति-निरोध | *citta-vṛtti-nirodha* |
| तमस् | *tamas* |
| तामसिक | *tāmasika* |
| दुर्योधन | *Duryodhana* |
| धर्म | *dharma* |
| धृत-राष्ट्र | *Dhṛta-rāṣṭra* |
| निरोध | *nirodha* |
| पाण्डु | *Pāṇḍu* |
| प्राणायाम | *prāṇāyāma* |
| प्रिय | *priya* |
| प्रेम | *prema* |
| ब्रह्मन् | *brahman* |
| भगवद् गीता | *Bhagavad Gītā* |
| भगवान् | *Bhagavān* |
| महा-भारत | *Mahā-bhārata* |
| योग | *yoga/Yoga* |
| रजस् | *rajas* |
| वृत्ति | *vṛtti* |
| वेदान्तिन् | *Vedāntin* |
| व्यास | *Vyāsa* |
| संसार | *saṃsāra* |
| सञ्जय | *Sañjaya* |
| सत्-चित् | *sat-cit* |
| सत्त्व | *sattva* |
| सम | *sama* |
| समाधि | *samādhi* |
| सात्त्विक | *sāttvika* |
| स्थित-प्रज्ञ | *sthita-prajña* |

# Chapter 1

| | |
|---|---|
| अधर्म | *adharma* |
| अनन्त-विजय | *ananta-vijaya* |
| अभिमन्यु | *Abhimanyu* |
| अश्वत्थामन् | *Aśvatthāman* |
| उत्तमौजस् | *Uttamaujas* |
| उपनिषद् | *Upaniṣad* |
| ओं | *Oṃ* |
| कर्ण | *Karṇa* |
| काशि | *Kāśi* |
| कुन्ती | *Kuntī* |
| कुन्ति-भोज | *Kunti-bhoja* |
| कुरु-क्षेत्र | *Kuru-kṣetra* |
| कृप | *Kṛpa* |
| क्षत्रिय | *kṣatriya* |
| गाण्डीव | *Gāṇḍīva* |

| | |
|---|---|
| चेकितान | *Cekitāna* |
| देव-दत्त | *Deva-datta* |
| द्रुपद | *Drupada* |
| द्रोण | *Droṇa* |
| द्रौपदी | *Draupadī* |
| धृष्ट-केतु | *Dhṛṣṭa-ketu* |
| धृष्ट-द्युम्न | *Dhṛṣṭa-dyumna* |
| नकुल | *Nakula* |
| पाञ्च-जन्य | *Pāñca-janya* |
| पाण्डव | *Pāṇḍava* |
| पुरुजित् | *Purujit* |
| पौण्ड्र | *Pauṇḍra* |
| ब्राह्मण | *brāhmaṇa* |
| भीम | *Bhīma* |
| भीष्म | *Bhīṣma* |
| मणि-पुष्पक | *Maṇi-puṣpaka* |
| युधामन्य | *Yudhāmanyu* |
| युधि-ष्ठिर | *Yudhi-ṣṭhira* |
| युयुधान | *Yuyudhāna* |
| विकर्ण | *Vikarṇa* |
| विराट | *Virāṭa* |
| शिखण्डिन् | *Śikhaṇḍin* |
| शैब्य | *Śaibya* |
| श्री | *Śrī* |
| सह-देव | *Saha-deva* |
| सात्यकि | *Sātyaki* |
| सुघोष | *Sughoṣa* |
| सुभद्रा | *Subhadrā* |
| सोम-दत्त | *Soma-datta* |
| हनुमान् | *Hanumān* |

# Chapter 2

| | |
|---|---|
| असत् | *asat* |
| आश्चर्यवत् | *āścaryavat* |
| उपासन | *upāsana* |
| कर्मन् | *karman* |
| कर्म-योग | *karma-yoga* |
| गुरु | *guru* |
| त्रैगुण्य | *traiguṇya* |
| देहिन् | *dehin* |
| पर | *para* |
| पाप | *pāpa* |
| बुद्धि | *buddhi* |
| बुद्धि-योग | *buddhi-yoga* |
| राग | *rāga* |
| राग-द्वेष | *rāga-dveṣa* |
| विवेक | *viveka* |
| वेद | *Veda* |
| वैराग्य | *vairāgya* |
| श्रुति | *śruti* |
| श्रेयस् | *śreyas* |
| सत् | *sat* |

| | |
|---|---|
| सान्दीपनि | *Sāndīpani* |
| साङ्ख्य | *sāṅkhya/Sāṅkhya* |
| सुख | *sukha* |
| स्थित-धी | *sthita-dhī* |
| स्व-धर्म | *sva-dharma* |

## Chapter 3

| | |
|---|---|
| कर्म-योगिन् | *karma-yogin* |
| काम | *kāma* |
| गुण | *guṇa* |
| जनक | *Janaka* |
| ज्ञान-योग | *jñāna-yoga* |
| द्वारका | *Dvārakā* |
| द्वेष | *dveṣa* |
| प्रकृति | *prakṛti* |
| मोक्ष | *mokṣa* |
| यज्ञ | *yajña* |
| योगिन् | *yogin* |
| रजस् गुण | *rajas guṇa* |
| लोक | *loka* |
| सन्न्यास | *sannyāsa* |
| सन्न्यासिन् | *sannyāsin* |

## Chapter 4

| | |
|---|---|
| अद्वैत | *advaita* |
| इक्ष्वाकु | *ikṣvāku* |
| कल्प | *kalpa* |
| कर्म-फल | *karma-phala* |
| कुरु-वंश | *Kuru-vaṃśa* |
| चन्द्र-वंश | *Candra-vaṃśa* |
| जीव | *jīva* |
| पुराण | *purāṇa* |
| प्राण | *prāṇa* |
| मनु | *manu* |
| माया | *māyā* |
| यदु-वंश | *yadu-vaṃśa* |
| युक्त | *yukta* |
| युग | *yuga* |
| राम | *Rāma* |
| वर्ण | *varṇa* |
| विवस्वत् | *Vivasvat* |
| सङ्कल्प | *saṅkalpa* |
| सर्वात्म-भाव | *sarvātma-bhāva* |
| सूर्य-वंश | *Sūrya-vaṃśa* |

## Chapter 5

| | |
|---|---|
| अधिकारत्वं | *adhikāratvaṃ* |
| आत्म-शुद्धि | *ātma-śuddhi* |
| ऋषि | *ṛṣi* |
| कर्म-सन्न्यास | *karma-sannyāsa* |
| क्रोध | *krodha* |
| ज्ञानिन् | *jñānin* |
| ध्यान | *dhyāna* |

| | |
|---|---|
| निदिध्यासन | *nididhyāsana* |
| मुनि | *muni* |
| स्व-भाव | *sva-bhāva* |

## Chapter 6

| | |
|---|---|
| ईश्वर | *Īśvara* |
| कुश | *kuśa* |
| ज्ञान-योगिन् | *jñāna-yogin* |
| तपस्विन् | *tapasvin* |
| परमात्मन् | *paramātman* |
| परमेश्वर | *Parameśvara* |
| ब्रह्म-चर्य | *brahma-carya* |
| योगं युञ्ज्यात् | *yogaṃ yuñjyāt* |
| योगारूढ | *yogārūḍha* |
| शम | *śama* |
| शान्ति | *śānti* |
| श्रद्धा | *śraddhā* |
| सन्न्यस्त | *sannyasta* |
| सिद्धि | *siddhi* |

## Chapter 7

| | |
|---|---|
| अधिदैव | *adhidaiva* |
| अधिभूत | *adhibhūta* |
| अधियज्ञ | *adhiyajña* |
| अध्यात्म | *adhyātma* |
| असुर | *asura* |
| ओम् | *Om* |
| ज्ञानं स-विज्ञामम् | *jñānaṃ sa-vijñānam* |
| तत् त्वम् असि | *tat tvam asi* |
| तेजस् | *tejas* |
| परं ब्रह्म | *paraṃ brahma* |
| प्रत्यग्-आत्मन् | *pratyag-ātman* |
| भक्त | *bhakta* |
| वासु-देव | *Vāsu-deva* |
| विज्ञान | *vijñāna* |

## Chapter 8

| | |
|---|---|
| अक्षर | *akṣara* |
| अक्षरः पुरुषः | *akṣaraḥ puruṣaḥ* |
| अव्यक्त | *avyakta* |
| कवि | *kavi* |
| पुरुष | *puruṣa* |
| फल | *phala* |
| ब्रह्म-लोक | *Brahma-loka* |
| ब्रह्म-विद्या | *brahma-vidyā* |
| ब्रह्मा | *Brahmā* |
| महात्मन् | *mahātman* |
| महा-युग | *mahā-yuga* |
| यति | *yati* |
| विद्या | *vidyā* |
| व्यक्ति | *vyakti* |
| हिरण्य-गर्भ | *Hiraṇya-garbha* |

## Chapter 9

| | |
|---|---|
| आत्मा | *ātmā* |
| आसुरी | *āsurī* |
| इन्द्र | *Indra* |
| उपादान-कारण | *upādāna-kāraṇa* |
| ऋग्-वेद | *Ṛg-Veda* |
| ज्ञान | *jñāna* |
| दैवी | *daivī* |
| धर्म्य | *dharmya* |
| पुण्य | *puṇya* |
| यजुर्-वेद | *Yajur-Veda* |
| याज्ञ-वल्क्य | *Yājña-valkya* |
| राक्षसी | *rākṣasī* |
| साधु | *sādhu* |
| साम-वेद | *sāma-Veda* |
| सोम | *soma* |

## Chapter 10

| | |
|---|---|
| अग्नि | *Agni* |
| अनन्त | *Ananta* |
| अर्यमन् | *Aryaman* |
| अवतार | *avatāra* |
| असित | *Asita* |
| उच्चैः-श्रवस् | *Uccaiḥ-śravas* |
| उपादान-कारण | *upādāna-kāraṇa* |
| ऐरावत | *airāvata* |
| ऐश्वर | *aiśvara* |
| कपिल | *Kapila* |
| काम-धेनु | *Kāma-dhenu* |
| कुबेर | *Kubera* |
| गङ्गा | *Gaṅgā* |
| गरुड | *Garuḍa* |
| गायत्री | *Gāyatrī* |
| चित्र-रथ | *Citra-ratha* |
| जप | *japa* |
| दिति | *Diti* |
| देवल | *Devala* |
| देश-काल | *deśa-kāla* |
| द्वन्द्व-समास | *dvandva-samāsa* |
| नारद | *Nārada* |
| नारायण | *Nārāyaṇa* |
| निमित्त-कारण | *nimitta-kāraṇa* |
| परं ब्रह्मन् | *paraṃ brahman* |
| प्रजा-पति | *Prajā-pati* |
| प्रह्लाद | *Prahlāda* |
| बीज | *bīja* |
| बृहती | *Bṛhatī* |
| बृहस्-पति | *Bṛhaspati* |
| भाव | *bhāva* |
| भृगु | *Bhṛgu* |
| मकर | *Makara* |
| मनस् | *manas* |

| | |
|---|---|
| मनु | *Manu* |
| मरीचि | *Marīci* |
| मृत्यु | *Mṛtyu* |
| मेरु | *Meru* |
| यम | *Yama* |
| रामायण | *Rāmāyaṇa* |
| लक्ष्मी | *Lakṣmī* |
| वरुण | *Varuṇa* |
| वसु | *Vasu* |
| वायु | *Vāyu* |
| वाल्मीकि | *Vālmīki* |
| वासुकि | *Vāsuki* |
| विष्णु | *Viṣṇu* |
| वृष्णि | *Vṛṣṇi* |
| वेद-व्यास | *Veda-vyāsa* |
| शङ्कर | *Śaṅkara* |
| शिव | *Śiva* |
| शुक्राचार्य | *Śukrācārya* |
| संस्कृत | *Saṃskṛta* |
| सरस्वती | *Sarasvatī* |
| सिद्ध | *siddha* |
| सुब्रह्मण्य | *Subrahmaṇya* |
| स्कन्द | *Skanda* |
| हिमालय | *Himālaya* |

# Chapter 11

| | |
|---|---|
| अश्विन् | *aśvin* |
| आदित्य | *Āditya* |
| इष्ट-देवता | *iṣṭa-devatā* |
| जयद्-रथ | *Jayad-ratha* |
| परं | *paraṃ* |
| मरुत् | *Marut* |
| यक्ष | *yakṣa* |
| यादव | *Yādava* |
| रुद्र | *Rudra* |
| विश्व | *viśva* |
| सद्-असत्-परं | *sad-asat-paraṃ* |
| साध्य | *sādhya* |
| हरि | *Hari* |
| हुताश | *hutāśa* |

# Chapter 12

| | |
|---|---|
| अभ्यास | *abhyāsa* |
| कर्म-फल-त्याग | *karma-phala-tyāga* |
| देहवत् | *dehavat* |
| निवृत्ति | *nivṛtti* |
| प्रवृत्ति | *pravṛtti* |
| मत्-कर्म-कृत् | *mat-karma-kṛt* |
| विश्व-रूप | *viśva-rūpa* |
| साधन | *sādhana* |

# Chapter 13

| | |
|---|---|
| अहङ्कार | *ahaṅkāra* |
| आकाश | *ākāśa* |
| आपः | *āpaḥ* |
| ईश्वर-शक्ति | *Īśvara-śakti* |
| कर्तृ | *kartṛ* |
| क्षेत्र | *kṣetra* |
| क्षेत्रज्ञ | *kṣetrajña* |
| ज्ञेय | *jñeya* |
| ज्ञेयं ब्रह्मन् | *jñeyaṃ brahman* |
| पूजा | *pūjā* |
| पृथिवी | *Pṛthivī* |
| संयोग | *saṃyoga* |

# Chapter 14

| | |
|---|---|
| कठ उपनिषद् | *Katha Upaniṣad* |
| गुणातीत | *guṇātīta* |
| छान्दोग्य उपनिषद् | *Chāndogya Upaniṣad* |
| प्रतिष्ठा | *pratiṣṭhā* |
| महत् ब्रह्मन | *mahat brahman* |
| महेश्वर | *Maheśvara* |
| श्वेताश्वतर उपनिषद् | *Śvetāśvatara Upaniṣad* |
| सत्यं ज्ञानं | *satyaṃ jñānaṃ* |
| साङ्ख्य | *sāṅkhya/Sāṅkhya* |

# Chapter 15

| | |
|---|---|
| अधस् | *adhas* |
| अव्यक्त ब्रह्मन् | *avyakta brahman* |
| अश्वत्थ | *Aśvattha* |
| उत्तम | *uttama* |
| ऊर्ध्व | *ūrdhva* |
| कूट-स्थ | *kūṭa-stha* |
| पुरुषोत्तम | *Puruṣottama* |
| प्रधान | *pradhāna* |
| व्यक्त | *vyakta* |
| सत्य-ज्ञान | *satya-jñāna* |

# Chapter 16

| | |
|---|---|
| अपैशुन | *apaiśuna* |
| अलोलुप्त्वं | *aloluptvaṃ* |
| त्वम् | *tvam* |
| देव | *deva* |
| दैव | *daiva* |
| पारमार्थिक | *pāramārthika* |
| प्रमाण | *pramāṇa* |
| प्रातिभासिक | *prātibhāsika* |
| व्यावहारिक | *vyāvahārika* |

# Chapter 17

| | |
|---|---|
| अस् | *as* |
| ओं तद् सत् | *Oṃ tad sat* |

| | |
|---|---|
| तद् | *tad* |
| तपस् | *tapas* |
| दक्षिणा | *dakṣiṇā* |
| दान | *dāna* |
| मन्त्र | *mantra* |
| रक्षस् | *rakṣas* |
| स्थिति | *sthiti* |

## Chapter 18

| | |
|---|---|
| केशिन् | *Keśin* |
| क्षात्रं कर्म | *kṣātraṃ karma* |
| तपस् कर्मन् | *tāpas karman* |
| त्याग | *tyāga* |
| त्यागिन् | *tyāgin* |
| परित्याग | *parityāga* |
| पृथा | *Pṛthā* |
| मिथ्या | *mithyā* |
| लोक-सङ्ग्रह | *loka-saṅgraha* |
| विजय | *vijaya* |
| वेदान्त | *Vedānta* |
| वैश्य | *vaiśya* |
| शूद्र | *śūdra* |

# About the Author



Photo by Cassia Reis, GayatriYoga.eu

A.K. Aruna started his studies in Advaita Vedanta and the Sanskrit language in 1976 at an intensive three-year program in a traditional gurukulam, outside Bombay, India, under Shri Pujya Swami Dayananda Saraswati, the most renowned Sanskrit and Advaita Vedanta scholar of the past century. Stepping outside his academic background in Western philosophy, Aruna immersed himself in the deepest, oldest spiritual tradition in the world. This detailed study opened his eyes. In this ancient teaching, Aruna found a complete merging of the intellect and heart. From that point on, he dedicated his life to the inclusive vision of Vedanta.

Returning to his native United States, Aruna earned a master's degree in South Asian languages and literature from the University of Washington. Aruna later studied computer languages, becoming a programmer and manager of information technology in San Diego, California. Retiring to India in 2000, Aruna dedicated himself to studies in Advaita Vedanta and the Sanskrit Language. He created a set of tools for those students interested in a thorough study of Sanskrit to better understand the Bhagavad Gita. These tools consist of a five-book set under the title, *The Aruna Sanskrit Language Series*. They are: *The Aruna Sanskrit Grammar Reference*; *The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita*; *The Bhagavad Gita Dictionary*; *The Bhagavad Gita Reader: Sanskrit/English Parallel Text*; and *The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary*. Additionally, there is now a reading and pronunciation guide, *The Sanskrit Reading Tutor: Read It, Click It, Hear It!* Using these tools, Aruna has been teaching Sanskrit at the Arsha Vidya Gurukulams in both South India and in the U.S.

Aruna has lived and studied in a traditional teaching gurukulam for over nine years in India and two years in the U.S. Wishing to help yoga students ground the traditional purpose of yoga in the revered scriptures of India, Aruna releases *Patanjali Yoga Sutras: Translation and Commentary in the Light of Vedanta Scripture*. This presents the yoga discipline as its practitioners in the ancient scriptures understood and practiced. All of these works are available his via www.UpasanaYoga.org website.

# About the Publisher

## Upasana Yoga Media

Upasana Yoga (www.UpasanaYoga.org) connects yoga students and teachers from all yoga lineages to the central, traditional meditation tradition of India. These are reality based meditations, where teaching on the nature of the individual and the whole is presented and then re-presented in meditation form to assist its assimilation in one's life and relationships. Because this teaching is basic to the human condition and the nature of the universe around, it can bring supporting expressions from other ancient and modern traditions from around the world to offer meditators an inclusive entrance into this timeless, universal tradition.

We offer, via Upasana Yoga Media, our publishing arm, the *Patanjali Yoga Sutras*: *Translation and Commentary in the Light of Vedanta Scripture* and *The Bhagavad Gita: Victory over Grief and Death*. Additionally, for the interested students, we offer the five book set of the *Aruna Sanskrit Language Series* plus *The Sanskrit Reading Tutor: Read It, Click It, Hear It!* that teach the script and pronunciation of this tradition's source materials. For teachers, these publications grow meditation skills, and the ability to teach with authority and confidently answer questions from their students.

Please visit our website, www.UpasanaYoga.org, to see our entire, growing volume of resources and services.

# Resources

## The Aruna Sanskrit Grammar Reference

The *Grammar Reference* follows the reference style presentation of grammar. This will provide a logical, consistent and complete exposition of the grammar for reading-only proficiency. The grammar uses minimal wording and presents the material in outline and chart form as much as possible to maximize your visual memory of the information. This method also greatly assists review and re-review of the grammar, necessary to master the subject. Several of the charts have multiple forms within them that demonstrate simple, easy to remember patterns which are overlooked by many grammar books. This helps you to also logically remember the information. The grammar is presented in the Western style, which emphasizes analytic, reading skills, as opposed to the more difficult composition and speaking skills. As much as possible, the examples in the book are taken from the *Bhagavad Gītā*, so your targeted vocabulary builds quickly.

## The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita

The exercise in the first lesson of the *Aruna Coursebook* directs the student to the *Script Reading Exercise*, given as an appendix. This section provides the complete *Bhagavad Gītā* second chapter in large-print Sanskrit with transliteration using the English alphabet under each line, followed with the entire chapter again with only the large-print Sanskrit to test your progress. The text and transliteration are broken down in two separate ways to show the separate syllables and then the individual words, thus progressively showing the student the proper methodology for correctly pronouncing the original Sanskrit text. This section should provide all the necessary practice material for the student to learn the Sanskrit script—essential for proceeding through the rest of this work and any other Sanskrit work. For students who need help in pronunciation of Sanskrit words, I highly

advise finding a teacher, a friend or someone in your community who will surprise you with their readiness to assist you—knowledge of Sanskrit and its literature seems to nurture this helpful attitude. These people need not know the meaning of all the Sanskrit words, but they can read the Sanskrit script. Additionally, a tape or CD of the *Bhagavad Gītā* is available through the Arsha Vidya Gurukulam (www.arshavidya.org).

An alternative help for this *Script Reading Exercise* is the specially developed *Sanskrit Reading Tutor: Read It, Click It, Hear It!*, a uniquely formatted PDF file that has the alphabet sections from the *Grammar Reference* plus the *Script Reading Exercise* of the *Grammar Coursebook*. The special feature of the PDF is that one can click on any of the characters in the alphabet section to hear its pronunciation, and on any of the individual lines, quarter verses, or their syllables of Script Reading Exercise to hear their pronunciation. In this way one can have each of these script elements individually re-read to you over and over while you are seeing the script on your screen—a unique and invaluable tool for learning the script and its pronunciation.

The rest of the lessons gives a relatively quick overview of the entire *Grammar Reference*—its layout, its methodology and how its grammar rules are to be understood. Enough explanation with little redundancy is provided to explain the outlined and charted grammar presented in the reference grammar so that you can learn on your own with little or no assistance from a teacher, assuming you can apply a post-high school aptitude toward this work. The examples and exercises in the *Aruna Coursebook* are drawn from the second chapter of the *Bhagavad Gītā*, which is taught completely. In the *Aruna Coursebook*, vocabulary is presented by giving the English meaning of the individual words, their grammar and also their contextual use within expressions from the Gita. This should make it very easy to learn the vocabulary. By teaching the vocabulary of the verses in a consistent Sanskrit prose order, which is syntactically based, the student gains a quicker grasp of Sanskrit syntax. All exercise expressions and sentences are taken directly from the Gita—no extraneous material is presented. These words, expressions and sentences are repeated throughout the *Aruna Coursebook* in the lessons and exercises to assist your memory; nothing is taken for granted as you progress through

the *Aruna Coursebook*. All the examples and lessons are cross-referenced to their specific verses in the Gita, so the context and the English translation given therein will provide an answer-key and guide for the student's work. After knowing the prose order of all the verses of the second chapter, the student is then introduced to the analysis of verses so that he or she can quickly and confidently see the meaning of the *Bhagavad Gītā* verses directly. Concepts presented in the Gita are expounded, so that non-Indian and Indian students alike can appreciate the depth of discussion within the Gita. The *Aruna Coursebook* forms a four to twelve month full-time course in itself, depending on the effort put forth and any previous exposure to this language or familiarity with other languages that may have affinity to the Sanskrit language. At the completion of The *Aruna Coursebook* you will be familiar with the entire range of Sanskrit grammar for reading proficiency and be able to sight read with understanding all the verses of the second chapter of the *Bhagavad Gītā*, which briefly presents the entire teaching of the Gita. Like for the first book, a specially developed computer CD disk is available with a PDF formatted file that includes the vocabulary and exercise sentences individually read out when clicked. Again, this is a unique and invaluable tool for learning the correct pronunciation of Sanskrit that is impossible to attain through any other of the teaching materials currently available, short of having a teacher continually available to help your pronunciation of these sentences.

## The Bhagavad Gita Dictionary

The *Gita Dictionary* is a Sanskrit to Sanskrit and English dictionary of the entire *Bhagavad Gītā*. Many entries include reference citations to grammatical rules for their peculiar formations presented in the *Grammar Reference*. The derivation of many words is included as appropriate. The entries also provide Sanskrit synonyms and/or meanings plus contextual Sanskrit analysis of compound words, so that your vocabulary builds beyond the Gita with each use. The goal of this vocabulary building is to encourage you to start to think in Sanskrit while you read Sanskrit – a multiplying effect that greatly enhances learning and builds the skills necessary to progress to Panini and the full grasp of the

Sanskrit language.

## The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary

The fifth book in the *Aruna Sanskrit Language Series* consists of the vocabularies verse-by-verse of the entire *Bhagavad Gītā*, in verse order, and is titled *The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary*. The *Gita Sanskrit Key* also can be used as a quick answer key to the *Aruna Coursebook* exercises. By collecting the vocabularies together, this becomes a marvelous tool to study the grammar, syntax and meaning of the verses of the Gita.

The English translation of the verses also doubles as an **answer key** to the exercises found in the *Grammar Reference*, which are cross-referenced to the verses. The *Aruna Coursebook's* vocabularies and exercises provide chapter/ verse references for all of the phrases and verses so that you can find them in this text in their full verse, prose, and translation—and in the context of surrounding verses. If only our classroom teachers were as thorough in their lessons and answers!

This series was arranged for the following reasons. the *Grammar Reference* and *Coursebook* are meant to stand by themselves as an introduction to Sanskrit, without needing the other three books. If the student wants to proceed in this learning, then minimally the *Gita Sanskrit Key* is also required. The *Gita Dictionary* was separated from the other books as it is more convenient to have a separate dictionary that can be opened as a reference for the *Aruna Coursebook, Gita Reader*, and *Gita Sanskrit Key*, or as a reference tool apart from this series of books. If one is not interested in learning Sanskrit grammar and can read the Sanskrit script, yet wants to know the *Bhagavad Gītā* and how its meaning is arrived, then just the *Gita Sanskrit Key* will more or less suffice. If one simply wants a very good translation of the *Bhagavad Gītā* and can read the Sanskrit script, then the *Gita Reader* is complete in itself. If you cannot read the Sanskrit script, but still want to see this same good translation, then see this author's *The Bhagavad Gita: Victory Over Grief and Death*, it has the entire *Bhagavad Gītā* within it.

# Divine Verses of the Bhagavad Gita

On this two-CD set, Swami Dayananda Saraswati chants all the verses of the *Bhagavad Gītā*. Also includes an introduction. 151 minutes. Available from:

**Oriental Records**
www.orientalrecords.com
Phone: 516-746-0140
PO Box 387
Williston Park, NY 11596, USA

# Bhagavadgita Home Study Course

In this comprehensive home study course, Swami Dayananda Saraswati unfolds each verse of the *Bhagavad Gītā*, giving the verses immediate relevance for modern readers. Print and CD versions (PC and Mac) available from:

**Arsha Vidya Gurukulam Bookstore**
www.arshavidya.org
books@arshavidya.org
Phone: 570-992-2339 ext. 567
PO Box 1059
Saylorsburg, PA 18353, USA

or

**Swami Dayananda Ashram Books Department**
www.dayananda.org
ashrambookstore@yahoo.com
Phone: 0135 243 0769
Purani Jhadi, PB No 30
Rishikesh 249 201, Uttaranchal, India

or

**Arsha Vidya Gurukulam**
www.arshavidya.in
books.cds@arshavidya.in
Phone: 0422 265 7001
Anaikatti PO
Coimbatore 641 108,
Tamil Nadu, India

# References


Apte, V. S. (1973). *The Student's English-Sanskrit Dictionary*. Dehli: Motilal Banarsidass.

—(1978). *The Practical Sanskrit-English Dictionary*. Dehli: Motilal Banarsidass.

—(2001). *Sanskrit-Hindi Kosha*. Delhi: Motilal Banarsidass.

Aruna, A.K. (2012). *The Aruna Sanskrit Grammar Reference*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita Chapter Two*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Bhagavad Gita Dictionary*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Bhagavad Gita Reader: Sanskrit/English Parallel Text*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Sanksrit Reading Tutor: Read It, Click It, Hear It!* Palm Desert, CA: Upasana Yoga Press.

—(2012). *The Bhagavad Gita: Victory Over Grief And Death*. Palm Desert, CA: Upasana Yoga Press.

—(2012). *Patanjali Yoga Sutras: Translation and Commentary in the Light of Vedanta Scripture*. Palm Desert, CA: Upasana Yoga Press.

Bhattacharya, T. (1967). *Sabdastoma-Mahanidhi: A Sanskrit Dictionary*. Varanasi: Chowkhamba Sanskrit Series Office.

Macdonell, A. A. (1976). *A Practical Sanskrit Dictionary*. London: Oxford University Press.

Monier Williams, Sir. (1960). *A Sanskrit-English Dictionary*. Oxford: Clarendon.

—(1976). A Dictionary, English and Sanskrit. Delhi: Moltilal Banarsidass.

Ram Bhanot, A. (1975). *Shrimad Bhagavad Gita with Amritavarshini Tika: Part 1 & 2*. Delhi: Motilal Banarasidaas.

—(1976). *Shrimad Bhagavad Gita with Amritavarshini Tika: Part 3 & 4*. Jalandar: Raj Publishers.

Ramasubba Sastri, Pandit S. (1966). *Kridantarupamala*. Madras: The Samskrit Education Society.

Sankaracarya (1983). *Srimad Bhagavad Gita Bhasya of Sri Samkaracarya: With Text in Devanagiri & English Rendering, Translated by Dr. A.G. Krishna Warrier*. Madras: Sri Ramakrishna Math.

—(1988). *Srimad-Bhagavad-Gita: Sankara-Bhashya Hindi-Anuvada-Sahita by Sri Harikrisnadas Goyandaka*. Gorakhapur: Gita Press.

—(2006). *Bhagavadgita: with the Commentary of Sankaracarya, Translated by Swami Gambhirananda*. Kolkata: Advaita Ashrama.

—(2006). *Srimad-Bhagavad-Gita: Padaccheda Anvaya*. Gorakhapur: Gita Press.

Srivatsankacharya, Sri. Pt. V. (1971). *Avyaya Kosa*. Madras: The Samskrit Education Society.

Swami Dayananda Saraswati (2006). *Bhagavadgītā: Home Study Course*. Coimbatore: Arsha Vidya Gurukulam.

Swami Swarupananda (1972). *Srimad-Bhagavad-Gita*. Calcutta: Advaita Ashrama.

Vishor, K. (1992). *Gītā Prakāśa*. Kalakatta: Sritrilocana Jnana-Vijnana Samstha.